

# अत्त दीपो भव

(पालि-बौद्धविद्यायाः गवेषणात्मक-परिचयः)

लेखकः - डॉ० विजयकुमार जैनः

# अत्त दीपो भव

(पालि-बौद्धविद्यायाः गवेषणात्मक-परिचयः)

# अत्त दीपो भव

## (पालि-बौद्धविद्यायाः गवेषणात्मक-परिचयः)

लेखकः

डॉ० विजयकुमार जैनः

प्रवाचकः-बौद्धदर्शनम्

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)

गोमती नगर, लखनऊ (उत्तरप्रदेश)

मैत्री-प्रकाशनम्, लखनऊ

# अत्त दीपो भव

(पालि-बौद्धविद्यायाः गवेषणात्मक-परिचयः)


| | | |
|---|---|---|
| © लेखकः | - | डॉ० विजयकुमार जैनः |
| प्रकाशिका | - | डॉ० राका जैन, मैत्री-प्रकाशनम् 3/65, विकास खण्ड, गोमतीनगर, लखनऊ (उत्तरप्रदेश) |
| मूल्यम् | - | 200/- सजिल्दः 100/- अजिल्दः |
| प्रथम-संस्करणम् | - | 2005 |


---

# Atta Deepo Bhav

(An Innovative Approach to Pali & Buddhist Studies)


| | | |
|---|---|---|
| © Author | - | Dr. Vijay Kumar Jain |
| Publisher | - | Dr. Raka Jain, Maitree Publication 3/65, Vikas Khand, Gomti Nagar, Lucknow-226020 |
| Price | - | Rs. 200/- hard bond Rs. 100/- Paper bond |
| First Edition | - | 2005 |
| Composed by | - | Singhai Computor, Lucknow. |
| Printed by | - | Mahaveer Press, Aliganj (Etah) |

ISBN 978-93-5174-867-0

दिल्ली-संस्कृत-अकादमी-सचिव-

राष्ट्रपति-सम्मानित-

**डॉ० श्रीकृष्णसेमवाल-महोदयेभ्यः**

सादरं

समर्पयामि

**विजयकुमार जैनः**

को नु हासो किमानन्दो निच्चं पज्जलिते सति
अन्धकारेण ओनद्धा पदीपं किं न गवेसथ।।

अतीते नानु सोचन्ति नानु जप्पेन्ति नागतं
पच्चुप्पन्नेन यापेन्ति तेण वण्णो पसीदति।।

# आत्म-निवेदनम्

**अत्ता हि अत्तनो नाथो को हि नाथो परो सिया।**
**अत्ता हि सुदन्तेन नाथं लभति दुल्लभं।।**

भगवतो बुद्धस्य शिक्षा आसीत् यद् अहं स्वयमेव हि स्व नियन्त्रकोऽस्मि, अस्माकं नियन्त्रकः (स्वामी) अन्यः कथं भवितुं शक्नोति, इति अनुशासनेनैव साफल्यं प्राप्तुं शक्यते। भगवतः बुद्धस्य देशना आसीत्-**अत्त दीपो भव**, इति ध्येयवाक्यमनुसृत्य प्रस्तुतलघुग्रन्थस्य नामकरणं कृतम्। सर्वपल्ली राधाकृष्णन-महाभागस्य विचारोऽस्ति यत् बुद्धः वाञ्छति स्म यत् स्वतंत्ररूपेण नवरूपत्वेन मनुष्यस्य विकासः भवेत्। यः सकलपूर्वमान्यताभिः स्वतन्त्रः भवेत् यः स्वकीयं भविष्यं स्वयमेव रचयेत् यः आत्मदीपः स्वयमेव भवेत्-**अत्त दीपो भव**। तदा मानवः जातिभ्यः राष्ट्रियसीमाभ्यश्च उन्नतः भविष्यति।

अत्र अष्टादश-शोध-निबन्धानां सङ्ग्रहोऽस्ति। बौद्धदर्शनस्य पृष्ठभूमि इति निबन्धे सौत्रान्तिक-वैभाषिक-माध्यमिक-योगाचाराणां विकासे पृष्ठभूमि रूपत्वेन महत्त्वपूर्णानि तत्त्वानि सूच्यन्ते। सत्तायाः प्रश्ने परस्परं वैमत्यमस्ति। मूलभावना अनित्य-अनात्मयोः विषये एकता सदैव परिलक्ष्यते। अतः अनात्मं नैरात्म्यं अपि अस्मिन् पत्रे प्रतिपादितम्। पालि-बौद्धसंस्कृतवाङ्मये प्रतिपादितं जीवन-दर्शनं तस्य च वैज्ञानिकता, मानवाधिकारः, पर्यावरण-संरक्षणस्य सन्दर्भाः प्रस्तूयन्ते। पालि त्रिपिटकस्य प्रामाणिकता इत्यस्मिन् पत्रे पालि-त्रिपिटकस्य सङ्ग्रहकथा अस्ति यत् सङ्गीति-माध्यमेन त्रिपिटकस्य सङ्ग्रहः अभवत्। भगवतः बुद्धस्य वचनरूपेण त्रिपिटकस्य प्रामाणिकता सिद्ध्यति। संस्कृतं-बौद्धसंस्कृतिश्च इत्यस्मिन् शोधपत्रे बौद्ध-परम्परायां संस्कृतभाषायाः महत्त्वं प्रतिपादितम् अस्ति। अनेन पत्रेण सह पटना नगरे उपलब्ध-पाण्डुलिपीनां 'सूची' अपि प्रस्तूयते। बौद्धसंस्कृतस्य वैशिष्ट्य-कारणाद् बौद्धसंस्कृतम् मिश्रसंस्कृतं

वा कथ्यते। अस्यां भाषायां सरलीकरणस्य परम्परा द्रष्टुं शक्यते। बौद्धसंघस्य सम्प्रदायः इति निबन्धे अष्टादश-निकायानां सिद्धान्तः परिचयश्च प्रस्तुतः। महायानस्युद्भवः विकासश्च इति निबन्धे ऐतिहासिक- सैद्धान्तिकदृष्ट्या च वर्णनं कृतम्। विज्ञानवाद इति शीर्षके विज्ञानवाद-सिद्धान्तस्य सरलरीत्या संक्षिप्तः परिचयः प्रस्तुतः। शून्यवाद-निबन्धे अस्य सिद्धान्तस्य परम्परायाः परिचयः प्रस्तुतः। पुनः शून्यवादे आक्षेपः परिहारश्चापि प्रस्तुतः। बौद्धन्यायस्य वैशिष्ट्यं इति शोध निबन्धे बौद्ध-न्यायस्य परिचयात्मकं वैशिष्ट्यम् च वर्णितम्। भारतीयदर्शनेषु साम्य-विवेचनम् इति शोधनिबन्धे बौद्धसन्दर्भे भारतीयदर्शनानां पृथक् पृथक् तुलना कृता। बौद्धसंस्काराः इति निबन्धे वर्तमानसमये प्रचलित बौद्धसंस्काराणां परिचयः विधिश्च विस्तारेण प्रस्तुतः।

त्रिकाय-वर्णनम् इति शीर्षके भगवतः लोकोत्तर स्वरूपस्य महायानीया मान्यता अस्ति। महायान परम्परा भगवतः बुद्धस्य विशिष्टप्रकारेण त्रिकायरूपं स्वीकरोति। त्रिकायस्य तुलना अवतारेण सह क्रियते, अत्र त्रिकायस्य वैशिष्ट्यम् प्रतिपादितम्।

बौद्धधर्मस्य परिणतिः इति निबन्धे बौद्धधर्मस्य विकासः ह्रासश्च वर्ण्यते। सप्तम् शताब्दीतः विंशतिशताब्दिपर्यन्तं भारतदेशस्य विभिन्नेषु प्रान्तेषु बौद्धधर्मस्य स्थितिं वर्णयित्वा तस्य ह्रासस्य कारणम् अपि प्रतिपादितम् यद्यपि अस्मिन् विषये मतभेदाः दृश्यन्ते।

पालिभाषाविद्-प्रोफेसर-महेशतिवारी-महोदयेन निबन्धानां प्रकाशनस्य परामर्शः प्रदत्तः। अस्याः भावनायाः समर्थनं तदा अभवत् यदा राष्ट्रपतिसम्मानित-पूज्य-गुरुवर-प्रोफेसर एन. एच. साम्ताणी-महोदयेन कथितम् यत् स्वशोधनिबन्धानां विषयानुसारं विभाजनं कुरु, यथा-पालि-बौद्धदर्शनं, जैनदर्शनं, तुलनात्मकमध्ययनं च। पालिबौद्ध-वाङ्मय-मन्थनस्य अवसरः विविध संगोष्ठि- माध्यमेन अलभम्। संस्कृत-निबन्धानाम् महत्त्वं नवनीतरूपत्वेन मन्येऽहं प्रकाशने उत्साहितः, अस्य संकल्पस्य पूर्तिः डॉ. राकाजैन (मम धर्मपत्नी)-परिश्रमेण सम्पन्ना जाता। यदि एषः प्रयासः सफलः भविष्यति तर्हि जैन-बौद्धपरम्परायाः हिन्दीभाषायां

निबन्ध-संग्रहः तथा च जैन-बौद्ध-परम्परायाः तुलनात्मकध्ययन-सन्दर्भे शोध-निबन्धाः पुनः उत्साहेन प्रकाश्यन्ते।

वर्तमान-समये भाषां प्रति चेतना जागृताऽस्ति। संस्कृतमाध्यमेन व्यवहारः करणीयः -अस्य उद्देश्यस्य सम्पूर्तये राष्ट्रियस्तरे विविधाः कार्यक्रमाः प्रचलन्ति। संस्कृतभाषायाः प्रचाराय प्रसाराय च ये संस्कृतानुरागिणः संलग्नाः ते वन्दनीयाः। संस्कृतभाषायाम् अस्माकं प्रथमा कृतिः। पालि-प्राकृत-विद्यायाः छात्रत्वेन पालिप्राकृतयोः प्रभावः स्वाभाविकोऽस्ति। बौद्धपारिभाषिक-शब्दानां मौलिकता तथैव प्रदत्ता। पिपठिषूणां सौलभ्याय ग्रन्थेऽस्मिन् सरलभाषायाः प्रयोगः कृतः, त्रुटयः क्षन्तव्याः।

अस्मिन सन्दर्भे सहयोगकर्तृषु डॉ. लक्ष्मीनिवासपाण्डेयः, डॉ. लोकमान्यमिश्र, डॉ. एम. चन्द्रशेखरः, डॉ. सुरेन्द्र पाठकः, डॉ. भारतभूषण त्रिपाठी महोदयाः प्रमुखाः सन्ति। प्रोफेसर सुरेन्द्र झा, डॉ. सर्वनारायण झा, डॉ. बटोही झा, डॉ. गजेन्द्रशर्मा, डॉ. रामसागर मिश्रः डॉ. धनीन्द्र झा प्रभृतयो मित्राणि सदैव स्मरणीयाः। स्वगुरुजनान् प्रति-कृतज्ञोऽस्मि। गुरूणां आशीर्वाद एव सदैव पाथेयः। प्रो. एन. एच. साम्ताणी-डॉ. कोमलचन्दजैन-प्रो. संघसेन सिंह-डॉ. श्रीकृष्णसेमवाल-डॉ. कमलेशकुमारजैन-डॉ. जयकुमारजैन- महोदयान् पुनः पुनः प्रणमामि।

टङ्कणकार्ये श्री विकासजैनः धन्यवादार्हः। ज्येष्ठभ्राता-श्री प्रीतमचन्द्रजैन-श्री सन्तोषकुमारजैन-डॉ. त्रिलोकचन्द्रजैन पुत्र मैत्रेय-पुत्री मैत्री प्रभृतीनां मित्राणां सम्बन्धीनां स्नेहः मम सम्बलोऽस्ति।

**यदत्र सौष्ठवं किञ्चत्तद्गुरोरेव मे नहि।**
**यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्नहि।।**

भवतु सब्ब मंगलम्

१४, नवम्बर २००५ — विजयकुमार जैनः

# विषयानुक्रमणिका


आत्मनिवेदनम्

1. बौद्धदर्शनस्य पृष्ठभूमिः 1—4

2. पालि-बौद्धसंस्कृतवाङ्मये प्रतिपादितं जीवनदर्शनं तस्य च वैज्ञानिकता 5—12

3. पालि-बौद्धसंस्कृतवाङ्मये प्रतिपादितः मानवाधिकारः 13—19

4. पालि-बौद्धसंस्कृतवाङ्मयेषु पर्यावरण-संरक्षणम् 20—25

5. पालि-त्रिपिटकस्य प्रामाणिकता 26—29

6. संस्कृतं बौद्ध-संस्कृतिश्च 30—35

7. बौद्धसंस्कृतवाङ्मयस्य परिचयः 36—46

8. बौद्धमिश्रसंस्कृतस्य वैशिष्ट्यम् 47—52

9. बौद्ध-संघस्य सम्प्रदायः 53—59

10. महायानस्युद्भवः विकासश्च 60—67

11. विज्ञानवादः/योगाचारः 68—71

12. शून्यवादः 72—75

13. शून्यवादः-आक्षेपः परिहारश्च 76—78

14. बौद्धन्यायस्य वैशिष्ट्यम् 79—83

15. बौद्धदर्शनसन्दर्भे भारतीयदर्शनेषु साम्य-विवेचनम् 84—93

16. वर्तमानसमये प्रचलिताः बौद्धसंस्काराः 94—102

17. त्रिकायवर्णनम् 103—110

18. बौद्धधर्मस्य परिणतिः 111—117

# बौद्धदर्शनस्य पृष्ठभूमिः

**को नु हासो किमानन्दो निच्चं पज्जलिते सति।**
**अन्धकारेण ओनद्धा पदीपं किं न गवेसथ।।**

एतेषां सकलविचाराणां मूले भगवतः बुद्धस्य तानि वचनानि विलसन्ति यै विविध-धात्वध्याशयाधिमुक्तिसंयुतविनेयजनानां कल्याणार्थं विविधेषु स्थलेषु धर्मचक्रप्रवर्तनम् अकरोत् ।

प्राचीनपरम्परानुसारं भारतीयदर्शनं द्विविधं विभज्यते-आस्तिकं नास्तिकं च। आस्तिकदर्शनेषु षड्दर्शनानि अवगम्यन्ते। नास्तिकदर्शने चार्वाकः, जैनः बौद्धश्च गण्यन्ते। आस्तिक-नास्तिकयोः विभाजनमिदं वेदस्य प्रामाणिकत्वेनाभवत्। वेदप्रामाणिकत्वेन आस्तिकः, वेदाप्रमाणिकत्वे नास्तिकः इति कथ्यते-'नास्तिको वेदनिन्दकः'। आधुनिकसमये दर्शनपरम्परायाम् आस्तिक-नास्तिक-विभाजनयोराधारः परिवर्तते। ये पुण्यं पापं परलोकं च मन्यन्ते ते सर्वे आस्तिकाः। एतया दृष्ट्या जैन-बौद्धधर्मौ आस्तिकौ। उभौ धर्मौ अपि पापं पुण्यं स्वर्गं नरकं इत्यादीनि कर्माणि स्वीकुरुतः।

बौद्धधर्मस्य भारतीयदर्शनेषु विशिष्टं स्थानं वर्तते । बौद्धधर्मः विश्वधर्मत्वेन दृश्यते। बौद्धधर्मस्य शिक्षाः वैज्ञानिकाः मन्यन्ते। बौद्धधर्मस्य आस्तिकदर्शनेषु वैशिष्ट्यं वर्तते यत् अयं धर्मः आत्मानम् ईश्वरं च न स्वीकुर्वन् पापं, पुण्यं, स्वर्गं नरकं परलोकं च स्वीकरोति। बौद्धधर्मस्य चार्वाकदर्शनात् वैशिष्ट्यं वर्तते यत् बौद्धधर्मः चार्वाक सदृशं प्रत्यक्षप्रमाणातिरिक्तम् अनुमानं प्रमाणमपि स्वीकरोति। सामाजिक-व्यवस्थार्थं पंचशील-दशशील पालनस्य शिक्षां ददाति मोक्षं च स्वकीयं परमं लक्ष्यं उद्घोषयति-

**सब्बपापस्स अकरणं कुशलस्स उपसम्पदा ।**
**सचित्त परियोदपनं एतं बुद्धान सासनम् ।।**

**ये धम्मा हेतुप्पभवा तेसं हेतुं तथागतो आह ।**
**तेसं च यो निरोधो एवं वादी महासमणो ।।**

भगवान् बुद्धः प्रज्ञाकरुणयोः मूर्तिः आसीत्। स जनानां विचारस्वभाव-परिस्थित्यादीन् ध्यात्वा उपदिष्टवान्। अवतारादयः यथा वरदानेन ऋद्धिबलेन वा भक्तजनानामुद्धारं अकुर्वन्, बुद्धः न करोति अपितु स उपदेशेनैव विनेयजनान् संसारात् मुक्तं कर्त्तुं वाञ्छति यथा-

**न क्षालयन्ति मुनयो जलेन पापम्,**
**नैवापकर्षन्ति करेण जगद् दुखम्।**
**नैवं च संक्रमते हन्यन्ये स्वाधिगमम्,**
**सद्धर्मता देशनया विमोचयन्ति।।**

भगवतः बुद्धस्य विभिन्नाः विषयाः, प्रयोजनानि पात्राणि च भिन्नानि आसन्। बौद्धधर्मः प्रारम्भिकसमये एवम् आसीत् यत् बुद्धः तत्त्वम् अनिर्वचनीयं अव्याकृतं च निगद्य शिष्यान् विवादैः सर्वदा अवरोधयति स्म। तस्य जीवन-काले तत्त्वज्ञानस्य विवेचनं प्रति शिष्याणां धारणा तार्किकीनासीत्। कालान्तरे बौद्ध-पण्डितैः तथागतस्य उपदेशानां गहनाध्ययनं कृत्वा सूक्ष्माः सिद्धान्ताः अन्वेषिताः। महायानीयपरम्परायारनुसारं भगवान् त्रिधर्मचक्राणां प्रवर्तनं चकार-प्रथमं वाराणस्याः मृगदावे (सारनाथे) द्वितीयं राजगृहे तृतीयं च धान्यकटके। बौद्ध-दर्शनस्य विभिन्नाः अष्टादशाः सम्प्रदायाः प्रचलिताः आसन् परं ब्राह्मण जैन-दार्शनिकैः एतान् भेदान् न दृष्ट्वा बौद्ध-दर्शनं प्रधानतया चतुर्सम्प्रदायेषु विभज्यते।

**बौद्धदर्शनस्य सम्प्रदायः** -भगवता बुद्धेन प्रवर्तितं बौद्ध-दर्शनम् एकं दर्शनं न अपितु दर्शनानां समूहोऽस्ति। केषुचित् वृत्तेषु शब्दसाम्येऽपि अर्थभेदः अधिकोऽस्ति। विविधशाखोपशाखानां बौद्धविचाराणां चतुर्विभागेषु वर्गीकरणं क्रियते यथा-वैभाषिकः, सौत्रान्तिकः, योगाचारः (विज्ञानवादः) माध्यमिकश्च (शून्यवादः)।

एतेषां चतुर्सम्प्रदायानां नाम विशिष्टदार्शनिकसिद्धान्तेन सह इत्थमस्ति -

१ - वैभाषिकः - बाह्यार्थः प्रत्यक्षवादः
२ - सौत्रान्तिकः - बाह्यार्थानुमेयवादः

३ – योगाचारः – विज्ञानवादः

४ – माध्यमिकः – शून्यवादः

अयं श्रेणी-विभागः सत्तायाः महत्त्वपूर्णं प्रश्नमादाय क्रियते। प्रथमं मतं तेषां दार्शनिकानामस्ति ये बाह्याभ्यन्तरसकलधर्माणां स्वतन्त्रास्तित्त्वं स्वीकुर्वन्ति। जगति बाह्यवस्तूनां अभ्यासः कथमपि न कर्तुं शक्यते। यानि वस्तूनि आदाय अस्माकं जीवनमस्ति तेषां सत्ता स्वयमेव स्फुटा, इत्थं बाह्यार्थं प्रत्यक्षरूपेण तथ्यानुगामिबौद्धानां प्रथमो सम्प्रदायः, यः वैभाषिकः इति कथ्यते।

अस्यानन्तरं केचित् दार्शनिकाः अग्रे विचारयन्तः इदं कथयन्ति यत् बाह्यवस्तूनां वयं प्रत्यक्षं ज्ञानं कुर्मः इति। यदा सकलपदार्थः क्षणिकः तर्हि कस्यचित् वस्तुनः स्वरूपस्य प्रत्यक्षज्ञानं न संभाव्यते। प्रत्यक्षज्ञानोपरान्तं पदार्थानां नीलपीतादिकचित्रं चित्रपटे प्रतिबिम्बितं भवति-यथा दर्पणे प्रतिबिम्बं दृष्ट्वा बिम्बस्य सत्तां वयं अनुभवामः तथैव चित्रपटस्य एतैः बिम्बैः वयं अनुभवामः यत् बाह्यार्थस्यापि सत्ता अवश्यमस्ति, अतः बाह्यार्थस्य सत्ता अनुमानेन अवलम्बते। अयं बौद्धानां द्वितीयो सम्प्रदायः यः सौत्रान्तिकः इति निगद्यते।

तृतीयं मतं विज्ञानवादोऽस्ति-इदं मतं बाह्यार्थस्य सत्तां न स्वीकरोति। सौत्रान्तिकैः कल्पित-प्रतिबिम्बत बिम्बसत्तायाः अनुमानम् एतेषां नाभीष्टमस्ति। एतेषां दृष्टौ बाह्य-भौतिक-जगत् नितान्तं मिथ्याऽस्ति। चित्तमेव एकमात्रं सदस्ति। नानाप्रकाराणां आभासं वयं जगत् नाम्ना कुर्मः। चित्तमेव विज्ञानं इति उच्यते। इदं मतं विज्ञानवादिनामस्ति।

सत्ता-विषयकं चतुर्थं मतं तदस्ति यत् चित्तस्यापि सत्तां न स्वीकरोति। यथा बाह्यार्थः असत् इति अस्ति तथैव विज्ञानमपि। शून्यमेव परमार्थः। जगतः सत्ता व्यावहारिकी अस्ति। शून्यस्य सत्ता पारमार्थिकी। अस्य मतस्यानुयायी शून्यवादी माध्यमिको वा उच्यते। स्थूलात् सूक्ष्मतत्त्वं प्रति अनुगामिनः चतस्रः एव श्रेणयः विभक्तुं शक्यन्ते –

**मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगत्।**
**योगाचार-मते तु सन्ति मतयस्तासां विवर्तोऽखिलः।।**

**अर्थोऽस्ति क्षणिकस्त्वसानुमितो बुद्ध्येति सौत्रान्तिकः।**
**प्रत्यक्षं क्षणभंगुरं च सकलं वैभाषिको भाषते।।**

एतेषु वैभाषिकस्य सम्बन्धः हीनयानेन सह अस्ति। अवशिष्टानां मतानां च सम्बन्धः महायानेन सह अस्ति। एतानि त्रीणि सत्तायाः विषये स्वतन्त्रमतानि स्वीकृत्यापि महायानस्य सामान्य-सिद्धान्तं स्वीकुर्वन्ति। तत्त्व-समीक्षायाः दृष्ट्या एकतः वैभाषिकः विलसति द्वितीयतः योगाचारः माध्यमिकश्च शोभेते। सौत्रान्तिकः एतयोः मध्ये विराजते। कतिपयेषु अंशेषु सः सर्वास्तिवादस्य समर्थकोऽस्ति परम् अन्येषु सिद्धान्तेषु योगाचारं प्रति गच्छति। निर्वाणस्य महत्त्वपूर्णे विषये एतेषां मतानां वैशिष्ट्यम् इत्थं प्रदर्शयितुं शक्यते-

| | | |
|---|---|---|
| वैभाषिकः- | संसारः सत्यः | निर्वाणं सत्यम् |
| सौत्रान्तिकः - | संसारः सत्यः | निर्वाणम् असत्यम् |
| योगाचारः - | संसारः असत्यः | निर्वाणं सत्यम् |
| माध्यमिकः - | संसारः असत्यः | निर्वाणम् असत्यम्। |

बौद्धदर्शनस्य मन्तव्योऽयमस्ति यत् 'आत्मा अस्ति' इत्यादि प्रतीतिः विकल्पैरुत्पद्यते। विकल्पानामुद्भवः अनादिकालिकवासनायाः कारणात् भवति। तेषां विकल्पानामाधारे शब्दार्थयोः सम्बन्धः संयुज्यते अतएव कस्यचित् शब्दस्य प्रयोगेन एव कस्यचित् वस्तुनः बाह्यजगति सत्ता न सिध्यति। शब्दप्रयोगः त्रिविधः १. भावार्थं २. अभावार्थं ३. भावाभावार्थं च। **अयं नीलः** अस्मिन् प्रयोगे 'नीलः' स्वलक्षणस्य बाह्य जगति अस्तित्त्वमस्ति। अतएव वस्तुभूतः नीलः स्वलक्षणाय पश्चात् शब्दः प्रयुज्यते। **शशविषाणम्** आदि वस्तु बाह्यजगति नास्ति। तस्मै यः शब्दः प्रयुज्यते स अभावरूप पदार्थाय एव अस्ति। अमूर्तादिशब्दाः वस्तुभूतविज्ञानादिभ्यः प्रयुज्यते, अपि च मिथ्याकल्पित 'शशविषाणादयः' एवं मिथ्याकल्पितवस्तूनि अपि शब्द-प्रयोगस्य विकल्पानां च विषयाः सन्ति अतएव आत्मविषयकविकल्पाः शब्दप्रयोगश्च आत्मानं न साधयन्ति। यथार्थं तु इदं यत् आत्मादिविषयकविकल्पाः शब्दप्रयोगाश्च बाह्यवस्तु-निमित्तकाः न भवन्ति। आत्मादीनां च बाह्यरूपे अनुपलब्धेः कारणात् एषां सत्ता न सिध्यति।

# पालि-बौद्धसंस्कृवाङ्मये प्रतिपादितं जीवनदर्शनं तस्य च वैज्ञानिकता

संस्कृतभाषायां निबद्ध-बौद्धानां विशालः वाङ्मयोऽस्ति। भाषायाः विशेषतायाः कारणादिदं बौद्धसंस्कृतं बौद्धमिश्रसंस्कृतं वा कथ्यते। अस्मिन् वाङ्मये सामान्यजनानां कृते पंचशीलः दशशीलः वा प्रतिपादितः तथा बोधिसत्त्वस्यादर्शोऽपि वर्ण्यते येन आदर्श-समाजस्य निर्माणं भवति। बोधिसत्त्वस्यादर्शोऽस्ति यत् यावत्कालपर्यन्तं सर्वेजनाः दुःखात् मुक्ताः न भविष्यन्ति तावत् कालपर्यन्तं स्वमुक्तेः कामनया किं प्रयोजनम्। शिक्षासमुच्चये कथ्यते-

**यदा मम परेषां च भयं दुःखं च न प्रियम्।**
**तदात्मनः को विषयो यत्तं रक्षामि नेतरम्।।**[१]

थेरवादपरम्परायां 'दसपारमितायाः' वर्णनं प्राप्यते। पारमितानाम् अभ्यासात् बुद्धत्वप्राप्तिः भवति। बुद्धत्वकारकधर्माणां पारमीं 'पारमिता वा' कथ्यते। बुद्धत्व-प्राप्त्यर्थं दशधर्माणां पालनमत्यावश्यकं वर्तते। दशपारमिताः इत्थं सन्ति-दानपारमिता, शीलपारमिता, नैष्क्रम्या, प्रज्ञा, वीर्यम्, शान्तिः, सत्यपारमिता, अधिष्ठानपारमिता, मैत्रीपारमिता उपेक्षापारमिता च।[२] महायानपरम्परायां दशभूमयः वर्ण्यन्ते। भूमिभिः जनैः सम्पूर्णता प्राप्यते। भगवतः बुद्धस्य शिक्षायां जीवनदर्शनं प्राप्यते, मूलतः अव्याकृतेन मध्यममार्गेण वा। मध यममार्गे बौद्धशिक्षायाः सारांशः वर्तते। भगवान् बुद्धोऽकथयत्-अन्तद्वयं परित्यज्य मध्यममार्गः सेवनीयः। मध्यममार्गः आर्यअष्टांगिकमार्गः अस्ति- सम्यग्दृष्टिः, सम्यक् सङ्कल्पः, सम्यक् वाणी, सम्यक् कर्म, सम्यक् आजीविका, सम्यक् व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिश्च। मध्यममार्गोऽस्ति-शाश्वतवादोच्छेदवादौ विसृज्य प्रतीत्यसमुत्पादस्य विचारः मननम् वा।

पालि-बौद्धसंस्कृत-साहित्ये 'विज्ञानम्' इति शब्दः बहुवारं प्रयुज्यते। पञ्चस्कन्धेषु विज्ञानमस्ति यथा- रूपं, वेदना, संज्ञा, संस्कारः, विज्ञानञ्च।

द्वादशाङ्गप्रतीत्यसमुत्पादेषु एकोऽङ्गोऽस्ति विज्ञानं, षडायतनेऽपि विज्ञानं प्रयुज्यते यथा-स्पर्शविज्ञानं, श्रोत्रविज्ञानं, घ्राणविज्ञानं, जिह्वाविज्ञानं, कायविज्ञानं, मनोविज्ञानञ्चेति। विज्ञानस्यार्थोऽस्ति 'विजानाति इति विज्ञानम्' इति।

**अनात्मवादः**-बौद्धदर्शनस्य वैशिष्ट्यमस्ति यत् बौद्धदार्शनिकाः आत्मनः सत्तां नित्यं न स्वीकुर्वन्ति अर्थात् बौद्धदार्शनिकपरम्परा अनात्मवादी अस्ति किन्तु अत्र पूर्वजन्मनः भाविजन्मनः च विचारः वर्तते। जातककथायाः माध्यमेन भगवतः बुद्धस्य पूर्वजन्मनः ५४३ कथाः विद्यन्ते। अतः जनानां मध्ये प्रश्नो भवति यत् आत्मानं विना अपरः जनः सत्तां स्वीकर्तुं कथं शक्नोति इति ? अयं प्रश्नः इत्थम् अस्ति यथा तारं विना दूरभाषध्वनिः कथं श्रूयते। क्वार्कॉर्डलेस्-दूरभाषः सामान्यजनानां समक्षे कौतूहलस्य प्रश्नोऽस्ति। आत्मवादिनः कथयन्ति यत् आत्मानं विना पुनर्जन्म कस्य भवेत् अर्थात् पुनर्जन्मनः व्याख्यया तथा पापपुण्ययोः भोक्ता आत्मनः प्रतिष्ठा मन्यते किन्तु बौद्धाः कथयन्ति यत् आत्मनः नित्यत्वे कर्मव्यवस्था कथं सम्भाव्यते। शून्यवादपरम्परानुसारं समस्या तदा भवति यदा अहम् आत्मानं नित्यं स्वीकरोमि। यतः उत्पाद-स्थिति-भङ्गात् वस्तुसत्ता सिद्ध्यति। नित्यवस्तुनि उत्पाद-स्थिति-भङ्गस्य व्याख्या न सम्भाव्यते। आचार्य शान्तरक्षितः कथयति यत्-

**शुभाशुभं च कर्मास्ति नैव चेदात्मना कृतम्।**
**तदेव भोगभेदोऽस्य कुतः समुपजायते।।**[3]

अर्थात् आत्मा यदि शुभाशुभयोः कर्मणोः कर्ता नास्ति तर्हि भोक्ता कथं सम्भाव्यते। विज्ञानवादानुसारेण आलयविज्ञान-कारणात् पुनर्जन्म भवति। अश्वघोषः कथयति यत्-**'स्नेहात् क्षयः केवलमेति शान्तिम्'** इत्थं बौद्धपरम्परायां कर्मविपाकस्य स्थितिः वैज्ञानिकी वर्तते।

**अनात्मवादः कर्मविपाकश्च** -प्रथमं तु इदं ज्ञातव्यम् यत् बौद्धाः कर्मविपाकं कथं मन्यन्त इति ? ते इदं न मन्यन्ते यत् वयं यत् सुकर्म दुष्कर्म वा कुर्मः, तान् लेखितुं ईश्वरेण द्रुतलेखकः माम् अनुसरति। वयं सुकर्म दुष्कर्म वा यद्यपि कायिक-वाचिक कर्म कुर्मः सर्वेषां कर्मणामुद्गमस्थानं मन एव।

**कर्मणां लोकवैचित्र्यं चेतना तत्कृतं च तत्।**
**चेतना मानसं कर्म तत्तेजकायवाचकर्मणी।।**

अत एव द्वेषयुक्तकर्म कर्तुं मनसः द्वेषमयं भवनम् आवश्यकमस्ति। रागमयकर्म कर्तुं मनसः रागयुक्तं भवनम् आवश्यकमस्ति। मनसः तदाकृतेः तद्ध्वनेः गुंजनं तावत्कालपर्यन्तं निरन्तरं भवति यावत् कालपर्यन्तं तत् व्ययेन विरोधिध्वनेः संघटनेन वा न विनश्यति। मानवः दिवसमात्रं क्रूरः न भवति। चिकित्सकोऽपि शनैः शनैः स्वमनः कठोरं करोति, तदा हन्तुः वार्ता वा ? यदा काञ्चित् असहायनिरपराध-बालिकां ताडयन्तम् अवलोक्य दर्शकानां मनः द्रवितम् एव सम्भाव्यते तर्हि स्वयं हन्तुः मनः कषायभूतं विना कथं सम्भवति? सुतरां, वयं यत्कर्म कुर्मः तस्य प्रभावः तत्कालात् मनसि वर्तते। यावदेव मनः कटुतरः भवति तावदेव तस्मिन् सूक्ष्म-मानसिक-चिन्तनं विकासस्य योग्यता च लघुतरी भवति।

सुकृत-दुष्कृत-मनोभावाः धन-ऋणवत् सन्ति। यदि धनस्य राशिः अधिका भवति, ऋणस्य च लघुतरं तर्हि धनस्य पक्षः भारवहः भविष्यति। अयमनुक्रमः मनसः प्रतिक्षणस्य आकृतौ स्वयमेव भवति। अत्र अयमनुक्रमः मासस्य, सप्ताहस्य, दिवसस्य वा पश्चात् न, अपितु तत्क्षणे एव निरन्तरं भवति। किं नाम मानवः ? सुकृत-दुष्कृतानुमतानां पूर्णयोगः। द्वितीये क्षणे समुद्मानकमनः सर्वं तु स्वजनकमनसा परम्परया प्राप्यते। अस्याः परम्परायारनुक्रमः अस्माकं बाल्यकालात् वृद्धावस्थापर्यन्तम् अनुचरति। अत्र किञ्चिदपि कष्टं न भविष्यति किन्तु भगवतः बुद्धस्य शिक्षानुसारमयमनुक्रमः जन्मनः पूर्वमपि आसीत् मृत्योरुपरान्तमपि भविष्यति। स्वकृतपूर्वानुभवैः संयोजितमनसः उपमा, मृत्युक्षणे यस्मिन् काले सः (मानवः) इदं शरीरं विसर्जयितुं तत्परः भवति, तेन तप्त-लौह-धारेण कर्तुं शक्नोति। यः एतादृशी नालिका सहाय्येन नीचैः वहन् आगच्छेत्। यश्च एकस्य पाषाणस्य समीपम् आगत्य अवरुद्धेत्। तस्य पाषाणस्य द्वितीयतः एका एतादृशी द्वितीया नालिका अस्ति, यस्यारम्भे पर्याप्तचुम्बक-राशिः वर्तते, तर्हि सा चुम्बकराशिः अवश्यमेव इमां धारां नवनालिकायां प्रक्षेपयितुं समर्था भविष्यति। एवमेव मृत्युकाले चित्तप्रवाहः स्वकीयया संस्कार-राशिना सह अस्य जीवनस्य तटेऽवतिष्ठति। सः (मानवः)

संस्कार-राशिरूपचुम्बकवत् धर्मयुते समीपतमे शरीरे आकृष्य पुनरपि तस्य स एव पुरातनानुक्रमोऽऽरभते। अयमेव क्रमः तावत्कालपर्यन्तं निरन्तरं भवति, यावत् तृष्णायाः क्षयात् एषा सन्ततिः विश्रृंखलिता भवेत् तावदेव निर्वाणं न प्राप्नोति। इत्थं कर्म, कर्मफलं जन्मान्तरं च भवति।[४]

बौद्धदार्शनिककविनाअश्वघोषेण निर्वाणस्य स्थितिः एवं वर्णिता-

**दीपो यथा निवृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं नं काञ्चिद्विदिशं नः काञ्चित्स्नेहक्षयात्केवलमेति शान्तिम्।।**
**एवं कृती निवृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं न काञ्चिद्विदिशं न काञ्चित्क्लेशक्षयात्केवलमेति शान्तिम्।।**[५]

अर्थात् यथा निर्वाणप्राप्तः दीपकः न पृथिव्यामवतिष्ठति, न नभः गच्छति, न च काञ्चित् दिशां विदिशां वा प्रत्युत् स्नेहे समाप्ते सति, मात्रं शान्तिं प्राप्नोति। एषा दशा आत्मनः अपि अस्ति अर्थात् निवृत्तजनः निर्वाणावस्थायां न तु पृथिव्याम् अवतिष्ठति न च अन्तरिक्षं गच्छति, न च कस्याञ्चित् दिशायां न वा विदिशायाम् अपितु क्लेशानां विनाशात् केवलं शान्तिं प्राप्नोति। इत्थं निर्वाणं दुःखपूर्णं जगतः मुक्तावस्थाऽस्ति।

**चिकित्साविज्ञानम्-** खीष्टाब्दपूर्वषष्ठशताब्द्यां भगवान् बुद्धः आविर्भूतः। चत्वार्यार्यसत्यानां ज्ञानोपरान्तं भगवता बुद्धेन आत्मानं 'बुद्धः' इति उद्घोषितः पश्चात् 'बहुजन हिताय बहुजन सुखाय' विचरितः। भगवता बुद्धेन उपदिष्टे साहित्ये बौद्धाचार्यैश्च विरचिते साहित्ये चिकित्सानां विविधाः सन्दर्भाः प्राप्यन्ते।

भगवता बुद्धेन या पद्धतिः आर्यसत्ये साक्षात्कृता तां पद्धतिम् आयुर्वेदः चिकित्साशास्त्रं वा स्वीकरोति। यथा प्रथमे आर्यसत्ये दुःखं आर्यसत्यमस्ति। अस्मिन् जगतः यथार्थस्वरूपं दृश्यते यत् जन्मतः मृत्युपर्यन्तं विविधैः दुःखैः जनाः आवृताः सन्ति। अपरे सत्ये दुःखस्य कारणम् अन्विष्यते यत् इदं दुःखं तृष्णायारुद्भूयते। तृतीये सत्ये दुःखस्य विनाशः कथं भविष्यति, अत्र इदं विचार्यते यत् तृष्णायाः निरोधेन दुःखस्य निरोधः भवितुं शक्नोति। चतुर्थम् आर्यसत्यम् उपायरूपं यत्र आर्याष्टाङ्गिकमार्गः निरूप्यते-सम्यक्दृष्टिः,

सम्यक्सङ्कल्पः, सम्यक्वाक्, सम्यक्कर्म, सम्यग्आजीविका, सम्यक्व्यायामः, सम्यक्स्मृतिः सम्यक्समाधिश्च ।

एषा पद्धतिः चिकित्साशास्त्रे मान्याऽस्ति, यथा सर्वप्रथमं रोगस्याधिज्ञानं, द्वितीयतः रोगस्य निवारणम्, तृतीयतः रोगस्य निदानं सम्भवति अपि च रोगनिदानस्य औषधिः का अस्ति ।

भगवता बुद्धेन भिक्षु-भिक्षुणीनां चतुर्प्रत्ययाः विधीयन्ते स्म-चीवरः, पिण्डपातं, शयनासनं, ग्लानप्रत्यय-भैषज्यपरिष्कारश्च। अयं चतुर्थप्रत्ययः औषधिना सम्बन्धितोऽस्ति अर्थात् रोगावस्थायाम् औषधि अपेक्ष्यते। भिक्षुभ्यः औषधि ारूपेण गोमूत्रं निर्धार्यते, अपि च नवनीत-घृत-तैल-मधु-शर्करादयः सेव्यन्ते ।

**पूतिमुक्तभेषज्ज निस्साय पव्बज्जा, तत्थ ते यावज्जीवं उस्साहो करणीयो, अतिरेकलाभि सप्पि, नवनीतं, तेलं मधुफाणितंति।।**[६]

भगवतः बुद्धस्य समये कुमारः जीवकः यः जीवक-कौमारभृत्यः इत्यपि कथ्यते, प्रसिद्धः वैद्योऽऽसीत्। भगवतः बुद्धस्य चिकित्साऽपि तेन कृता शल्यक्रियायामपि च सः निपुणः उच्यते। आचार्यः नागार्जुनोऽपि आयुर्वेदस्य प्रसिद्धाचार्योऽस्ति। बौद्धदर्शनशून्यवादस्य प्रतिष्ठापकः आचार्योऽपि नागार्जुनोऽस्ति। चीनपरम्परा तिब्बतपरम्परा च स्वीकुरुतः यत् बौद्धदार्शनिकः तान्त्रिकः रासायनिकः एक एव आसीत्। कुमारजीवेन अस्य समयः त्रिशतवर्षाणि निगद्यते। तारानाथेनायं कनिष्कस्य समसामायिकः मन्यते। विद्वांसोऽस्य समयः बुद्धस्य परिनिर्वाणोपरान्तं ४००-७०० इति मन्यन्ते नवीनविद्वांसश्च नागार्जुनस्य स्थितिकालः आन्ध्रमहाराजादयः गौतमी तन्त्रयज्ञश्री (१६६-१९६ खीष्टाब्दः) इत्यस्य समसामायिकः मन्यन्ते।[७]

मिलिन्दपञ्हः प्रथमशताब्द्याः ऐतिहासिकरचना मन्यते। एतासु एकोनविंशतिविद्यासु 'वैद्यकः' एकविद्यायाः रूपेण गण्यते। एवमेव अनुभूय शास्त्र-लेखकाचार्याणां नामानि अपि गण्यन्ते। वैद्यकशास्त्रस्याचार्याः सन्ति-नारदः, धन्वन्तरिः, अंगीरसः, कपिलः, कण्डराग्निः, सामः, अतुलः, पूर्वकात्यायनश्च।[८]
मिलिन्दपञ्हः नाम्नि ग्रन्थे शरीरस्य विविधानि तत्त्वानि वर्ण्यन्ते यथा-नखः,

दन्तः, चर्म, मांसम्, स्नायुः, अस्थि, मज्जा, वृक्कः, हृदयः, यकृतम्, क्लोम, प्लीहा, फुफ्फसादयः।[९]

व्याधीणां संख्या ९८ निगद्यते।[१०] व्याधयः अनुमतिं विना प्रविशन्ति। व्याधीणां कारणं पूर्वजन्मकृत पापमस्ति। सद्धर्मपुण्डरीकसूत्रस्य द्वाविंशतितमः पर्वः भैषज्यराजपूर्वयोगः अस्ति। बोधिसत्त्वः भैषज्यराजः निगद्यते। वातरोगेन पीडिते सति बुद्धः गुडमिश्रितम् उष्णोदकं (विलपनं) पिबति स्म तथा च नीरोणः अभवत्।[११] शारीरिक कष्टानां कारणं पित्तस्य बाधा निगद्यते।[१२] दश-रोगानां प्रकृतिः आजन्म भवति यथा-शीतम्, ऊष्णं, क्षुधा, पिपासा, मलं, मूत्रं, श्रान्ति, वृद्धावस्था, मृत्युश्च।[१३] शरीरस्य दौर्बल्यं वर्णितम् यत् इदं शरीरं विविधप्रकारैः पोषितैः अपि, यथा शयनेन, स्थितेन, भोजनेन, पानेन अपि एकां व्याधिम् अपि न सहते।[१४]

अस्मिन् लोके कोऽपि प्रदेशः ईदृशो नास्ति यत्र प्राणी पूर्णानन्दं भवेत्।[१५]

- आहारेण विना प्राणी जीवितुं न शक्नोति।[१६]
  जरा-व्याधि-मृत्युश्च एते त्रयः लोके भयोत्पादकाः कथ्यते।[१७]
- स्वप्नस्य हेतवः षड्प्रकाराः वर्णिताः सन्ति-वायुः, पित्तम्, कफः, देवतानां प्रभावः, अभ्यासः यदा कदा भविष्यकालिक-सूचना।[१८]
- सर्वेषां कृते इदं कथ्यते यत् अस्माभिः भोजनेन वस्त्रेण च स्वशरीरस्य रक्षा करणीया इति।[१९]
- आरोग्यतायाः कृते सीमितमात्रायां भोजनम् करणीयम्।[२०]
- राजाप्रसेनजितः बुद्धे कथिते सति एकं परिचायकं निर्धारयति यः भोजनमात्राविषयकगाथां वदति।[२१]
- अन्यस्मिन् सन्दर्भे कथ्यते आरोग्याय संयमितं भोजनं आलस्यविरहितं चापेक्ष्यते।[२२]
- रात्रिभोजनत्यागोऽपि आरोग्य-उत्साह-बल-सुखपूर्वकं विहारस्य कारणमस्ति।[२३]
- यथासमयं औषधिसेवनस्य महत्त्वं प्रतिपादितम्।[२४]
- स्वास्थ्यवर्धकं भोजनं अप्रिये भूते सति श्रेष्ठतमम् भवति।[२५]

●अनुपयुक्तस्थले अस्थाने वा औषधिप्रयोगः विषतुल्यः भवति।[२६]
●स्त्रीणाम् औषधिः औदार्यं (उदारता) निगद्यते।[२७]
●औषधिना सार्धं मन्त्रे एव व्याधिः दूरीकर्तुं शक्यते।[२८]
●औषधिसेवनेन विना वैद्यस्य दर्शनमात्रेण रोगमुक्तिः न भवति।[२९]
●विपश्यनापद्धतिना मानसिकस्वास्थ्यस्य बलं प्रदीयते। अस्यां पद्धत्यां चतुर्प्रकारेण श्वासप्रश्वासस्य नियन्त्रणात् रक्तचापः नियन्त्रितः भवति। अस्याः प्रायोगिक केन्द्रम् वर्तमाने **विपश्यना रिसर्च इन्स्टीट्यूट**, इगतपुरी महाराष्ट्रे, पूजनीय गोयनका-महाभागस्य निर्देशने प्रचलति।[३०]

बहुविधसन्दर्भेन एवं ज्ञायते यत् पालि- संस्कृतबौद्धवाङ्मययोः पर्यावरण-संरक्षणस्य आभ्यान्तरे-बाह्य चेतना समुपलभ्यते। परवर्तीबौद्धाचार्यैः संस्कृतभाषायां बौद्धवाङ्मयाः विरचिताः येषु पर्यावरण-संरक्षणस्य सन्दर्भे प्रकृतिचित्रणस्य विश्लेषणं कृतम्।

तृष्णायाः वशीभूयाद्य मानवः प्राकृतिकसंसाधनानि संदोग्धि यस्मात् पर्यावरण-संतुलनं विनाशभूतेऽपि तिष्ठति।

भगवान् बुद्धः स्वशिक्षासु तृष्णायाः समूलं विनाशस्य शिक्षां प्रददाति स्म। भगवता बुद्धेन स्थापिते संघेऽपि अस्य सकलः प्रयासः कृतः यत् संघे तृष्णावतां भोगीनां जनानां किमपि स्थानं न प्राप्येत।

बौद्धानां क्षणभंगवादः विज्ञानसम्मतोऽस्ति। विज्ञानानुसारेण प्रत्येकं वस्तु क्षणिकमस्ति। बौद्धदार्शनिकः प्रारम्भकालात् एव वस्तु क्षणिकं मन्यते स्म। प्रो० दौलतसिंह कोठारी भौतिकविशेषज्ञः क्षणिकवादस्य विज्ञानेन सह सादृश्यं स्वीकरोति स्म। अपरलेखकस्य **'बुद्धिज्म एण्ड साइंस'** इति शीर्षके एकः ग्रन्थोऽपि प्रकाशितः।

## सन्दर्भ-संकेतः


१ - शिक्षासमुच्चयः
२ - निदानकथा
३ - तत्वसंग्रहः २६१
४ - सौत्रान्तिक दर्शनम्-डा० रामशंकर त्रिपाठी
५ - सौन्दरनन्द

६ - महावग्ग, ५५
७ - बौद्धसंस्कृत काव्य समीक्षा पृ० २६०
८ - मिलिन्दपञ्हो पृ० २६०
६ - तदेव
१० - तदेव पृ० २४
११ - संयुत्तनिकाय
१२ - मिलिन्दपञ्हो पृ० ११६
१३ - तदेव पृ० २१४
१४ - सौन्दरनन्द ३/१४
१५ - तदेव १५/४७
१६ - तदेव १४/६
१७ - तदेव १५/४६
१८ - मिलिन्दपञ्हो २४६
१६ - शिक्षासमुच्चयः १३
२० - सौन्दरनन्द ५/४६
२१ - संयुत्तनिकाय
२२ - मिलिन्दपञ्हो पृ० १८०
२३ - मज्झिमनिकाय २/२/१०
२४ - बुद्धचरितम् २६/७६
२५ - सौन्दरनन्द ५/४६
२६ - चतुःशतक १६३
२७ - बुद्धचरितम् ४/७०
२८ - जातकमाला १२५
२६ - बुद्धचरितम् २५/७८
३० - पालि एवं बौद्ध संस्कृत ग्रन्थों में आयुर्वेद सन्दर्भ - डॉ. विजय कुमार जैन

# पालि-बौद्धसंस्कृतवाङ्मये प्रतिपादितः मानवाधिकारः

मानवाधिकारः धरायामस्यां मानवस्य विकासेन सह प्रादुरभवत् यतोहि सः न तु एतैरधिकारैः विना गौरवपूर्णजीवनं व्यतीतं कर्त्तुं शक्नोति स्म न च सभ्यतायाः संस्कृतेः विकासं कर्त्तुं शक्नोति स्म परम् अनेन सह मानवाधिकाराणां दमनस्य प्रक्रिया प्रारभत यतोहि बलशाली जनः समूहः वा परेषां शोषणं कृत्वा स्वकीयं वर्चस्वं स्थापयति स्म। विगतपञ्चसहस्रवर्षेषु एकतः अस्य वर्चस्वस्य रूपं परिवर्तते द्वितीयतः इदमपि अपेक्ष्यते यत् मानवाधिकारं प्रतिचेष्टते। मानव-समाजस्य व्यवस्थायां समस्यायाः प्राधान्यात् निरन्तरं मानवाधिकाराणां विविधरूपाणि दरीदृश्यन्ते षड्विंशत्यधिक-एकोनविंशतितमस्य वर्षस्य सितम्बरमासस्य पंचविंशतिदिनाङ्कात् पूर्वं मानवाधिकारस्य प्रसङ्गः वस्तुतः राष्ट्रियप्रसङ्गः आसीत्, तत्पश्चात् प्रसङ्गोऽयं अन्ताराष्ट्रिय-विषयोऽभवत्, तस्मात् कालादेव मानवाधिकारस्य ज्ञानं तत्प्रति च विश्वप्रतिबद्धतायाः घोषणायाः परम्परा अधुनापि प्रचलितास्ति।

**मानवाधिकाराणां सार्वभौम-घोषणा**-मानवाधिकाराणां सार्वभौम-घोषणायै पञ्चाशतवर्षसम्पूर्तौ, वर्षपर्यन्तं आयोजित-कार्यक्रमाणां समापन-समारोहे अष्टाशीत्यधिकोनविंशतितमस्य वर्षस्य दिसम्बरमासस्य दशमदिनाके (१०-१२-१९८८) भारतवर्षस्य मुख्यन्यायाधीशः माननीयः न्यायमूर्तिः डॉ. ए. एस. आनन्दमहाभागः जनानां प्रोत्साहनं कुर्वन् अकथयत् यत् देशवासिनः मातृत्वस्य, बाल-संरक्षणस्य, बाल-शिक्षायाः, बाल-श्रमस्य, बाल-शोषणस्य, अल्पसंख्यकानां समाजस्य च दीन-हीन-वर्गाणां संरक्षणस्य क्षेत्रेषु मानवाधिकारमेकं 'चुनौती' इति रूपेण स्वीकुर्वन्तु। दण्डन्यायप्रणाली सुप्रभाववती भवेत्। यावत्कालपर्यन्तं हिंसात्मकशोषणं प्रशासनस्य महत्त्वपूर्णाङ्गम्भविष्यति तावत्कालपर्यन्तं प्रगतिः न सम्भाव्यने यतः कोऽपि आर्थिकविकासः मानवाधिकाराय सम्मानस्य आधार-रेखां विना न सम्भाव्यते। सः कथितवान् यत् न्यायार्थं, न्यायालयार्थं, न्यायाधीशार्थं च

सः गौरवपूर्णः निर्णायकः कालः भविष्यति यदा ते नागरिकाणां मानवाधिकारान् संरक्षणं प्रदास्यन्ति।

**बौद्धधर्मः मानवाधिकारश्च–** यदा वयं आधुनिकमानवाधिकारेण सह भगवतः बुद्धस्य नियमानां तुलनां कुर्यामः तदा प्राप्नुमः यत् उभयोः लक्ष्यमेकमेवास्ति यत् जनः परस्परं शोषणं न कुर्यात् परं भगवान् बुद्धः सामान्यस्तरे आध्यात्मिकरीत्या प्रभावोत्पादनाय यतते स्म।

– यथा स्वयम् आत्मानं प्रति व्यवहारं अपेक्ष्यते तादृशमेव अपरान् प्रति कुर्यात्।

– यदा दुखं मे प्रियं नास्ति तदाहं आत्म-दुःखमेव कथं दूरीकुर्याम्। यदा जगतः सर्वे जनाः दुःखिनः सन्ति तदा यावत्कालपर्यन्तं संसारस्य सर्वेषां प्राणिनां दुखं दूरं न भवेत् मुक्त्याः किं प्रयोजनम्।

-राज्ञां प्रसङ्गेऽपि एवं कथ्यते यत् नहि वैरेण वैरं शान्तं भवति, अवैरेण एवं वैरं शान्तं भवति।

– राजा प्रसेनजितः अकथयत् यत् जये सुखं भवति, पराजये च दुखं भवति अतएव जयं पराजयं च विहाय विहरेत्।

– सुवर्णप्रभाससूत्रे एवं कथ्यते यत् यः अधर्मस्य पक्षपाती अस्ति सः राजा अधर्मी भवति-[1]

**अधार्मिको ह्ययं राजा ह्यधर्मपक्षमाश्रितः।**[2]

-दुष्कृत्यानामुपेक्षया अधर्मः सम्वर्धते यथा-

**दुष्कृतानामुपेक्षयाऽधर्मो वर्धते भृशम्।**[3]

-यत्र अधार्मिकानां पूजा धार्मिकानां च उत्पीडनं भविष्यति तत्र एषां त्रयाणां तत्त्वानां-नक्षत्र-जल-वायु-इत्यादीनां उत्पातः भविष्यति-

**अधार्मिकजने मानं धार्मिकानां च निग्रहः।**

**त्रयस्तत्र प्रकुप्यन्ते नक्षत्र-जल-वायवः।।**[4]

-बुद्धचरितेऽपि एवं कथ्यते यत् राज्ञे सुगमैकं वस्त्रं, क्षुधा-निवृत्तये किञ्चित् अन्नं शय्या च, एकमेव आसनं आवश्यकम् अस्ति। राज्ञां शेषा विशेषता (परिग्रहः) मदोत्पादनाय अस्ति यत्-

**राज्ञोऽपि वासो युगमेकमेव क्षुत्संनिरोधाय तथान्नमात्रा।**
**शय्या तथैकासनमेकमेव शेषा विशेषा नृपतेर्मदाय।**[५]

-धर्मसार-समुच्चये पंचविधं भयं निगद्यते-

**आजीविकाभयशोकभयं मरणभयं दुर्गतिभयं पार्षदभयं चेति।**[६]

-जातकथायाम् उच्यते यत् प्रजानां हिताहितं राज्ञां चरित्रे निर्भरमस्ति-

**नराधिपानां चरितेष्ठधीनं लोकस्य यस्मादितिं हितं च।**[७]

-जातकमालायां इदमपि कथ्यते यत्-न्यायमार्गे प्रवृत्तस्य राज्ञः नगरं उपद्रवैः मुक्तं भूत्वा उन्नति-शिखरं आरोहति-

**पुरं विनिर्मुक्तमिवोपसर्गैर्न्यायप्रवृत्तेन नराधिपेन।** [८]

- परेषां धनात् तथैव भीयेत् यथा जनः सर्पात् बिभेति-

**नान्यधनमपजहार तथा भुजगादिमान्यविभवाहिविध्यथे।** [९]

- परतन्त्रतायां कोऽपि निर्भीकः न भवति-

**परतन्त्रतोऽपि निर्भीको भवेत् कः खलु बुद्धिमान्।**[१०]

- परिग्रहः विग्रहहेतुतया सर्पस्य कञ्चुकसमानं उत्तुंगं मस्तकयुक्तकृष्ण-सर्पसदृशं त्याज्यः कथ्यते।[११]

- कृपणवचनवदनं पापम् उच्यते।[१२]

- तत्कर्म कुरु येन लोके हितं भवेत्।[१३]

राहुलसांकृत्यायनमहाभागेन बौद्धधर्मस्य सफलता संघे एव पूर्णरूपेण मता। समाजे यद्गत्या यत्प्रभाव अपेक्षित आसीत् तथा नाऽभूत् इति तदीया मान्यता प्रभाविता भवेत् तेन न मतम् किन्तु सतां माध्यमेन प्रभावः अद्यापि द्रष्टुं शक्यते।

यदि संघस्य सन्दर्भे विचारयेत् तर्हि निश्चितरूपेण विनय-संघनियमेषु प्रयासः कृतः यत् भिक्षुः अपराधी उदण्डश्च न भवेत् निरपराधी च दण्डं न प्राप्नुयात्- एवमेव संकेते बौद्धधर्मे मानवाधिकारस्य सन्दर्भः दृष्टुं शक्यते।

सप्त-अपरिहानीयधर्माणां आधारे तु निश्चितरूपेण इदं कथयितुं शक्यते यत् भगवान् बुद्धः स्त्रीणां, वृद्धानां, धर्मायतनानां सुरक्षां प्रति अतीव चिन्तितः आसीत्। मानव-अधिकाराणां च उल्लंघनात् पूर्वमेव एतादृशं वातावरणं विकासयितुं

वाञ्छति स्म यत् मानवाधिकाराणामुल्लंघनमेव न भवेत्।

**अपरिहानीयाः धर्माः-** अपरिहानीयधर्माणां माध्यमेन एकतः भगवता बुद्धेन राष्ट्रस्य सुरक्षोपायाः कथ्यन्ते द्वितीयतः इदं द्रष्टुं शक्यते यत् एतासु शिक्षासु मानवाधिकाराः अन्तर्निहिताः सन्ति-

- स्त्रीणां विषये अत्याचाराः न कर्तव्याः।

- वृद्धजनानां सेवनम्।

- धार्मिकस्थानस्य सुरक्षा।

- प्रजातांत्रिकमूल्यानां स्थापनम्, यत्र प्रत्येकं जनस्य मतं शासने स्वीकरणीयं भवेत्।

- सम्मतये पुनः पुनः सम्मेलनं भवेत्।

- सामूहिकरूपेण सम्मेलन-करणं करणीयकर्मकरणं च।

- अप्रज्ञप्तस्य न प्रज्ञप्तकरणं प्रज्ञप्तस्य च उच्छेदः न करणीयः।

- ये अस्माकं वृद्धाः सन्ति तेषां सत्कारः अपेक्ष्यते तेषां च मननीयं वृत्तं स्वीकुर्यात्।

- याः अस्माकं कुलस्त्रियः कुलकुमार्यः सन्ति ताभिश्च सह बलात्कारं न कुर्यात्।

- नगरस्य अन्तः बहिः वा यत् चैत्यम् (देवस्थानं) अस्ति तस्य सत्कारं कुर्यात् प्रदत्तस्य च दानस्य लोपं न कुर्यात्।

- ये अस्माकं अर्हन्तः पूज्याः धार्मिकाः वा सन्ति तेषां रक्षणं, यस्मात् सः सुखपूर्वकं विहरेत्।

- यदा वयं आधुनिकन्यायालयस्य मानवाधिकारस्य च सन्दर्भे विचारयामः तदा इदं प्राप्नुमः यत् मानवाधिकार-आयोगस्य निश्चितरूपेण अपेक्षासीत्। सामान्य-न्यायालयेन मानवाधिकाराणां रक्षा न सम्भाव्यते स्म यतः भगवतः बुद्धस्य कालेऽपि प्रसेनजितः राजा कथयति यत् सः न्यायालयगमनं विसृजति यतो हि तत्र जनाः मिथ्या वदन्ति।[१४]

- सिगालोवादसुत्ते यदा बुद्धः ब्राह्मणान् शिक्षयति यत् विविधदिशः प्रति जलार्पणं कथं चरितार्थं भवति अर्थात् मातुः पितुः सेवां कृत्वा तेषां कृतापकारान्

स्मृत्वा वृद्धावस्थायां भरणपोषणं करणीयम्।

- गुरुः यद् शिक्षयति सुष्ठुरूपेण सा शिक्षा ग्रहणीया।
- मित्राणि कुमार्गेभ्यः निर्गत्य सुमार्गे-प्रवर्तनीयम्।
- चाटुकारितापूर्णवृत्तान्तानां स्थाने हितकारिवचनं वचनीयम्।
- भ्रातृन् प्रति कर्तव्यं करणीयम्।
- स्त्रीं प्रति भरण-पोषणेन सह तेषां कर्तव्यं उच्यते यत् सा पति-सेवां कुर्यात्।
- स्त्री-पुरुषौ उभौ परस्परं कर्तव्यनिष्ठौ भवेताम्।

अधुना नारीसङ्घटनं स्वाधिकारान् प्रति सचेष्टमस्ति किन्तु इदं न शिक्षयति यत् पति-सेवा सम्यक्रूपेण करणीया। निष्ठया कर्तव्यानां निर्वहनं कुर्युः। दास-दासी द्वारा कृतपरिश्रमस्य फलं दातव्यम् तेषां च सुख-सुविधायाः ध्यानं करणीयम्। अद्य सर्वाधिकं शोषणं श्रमिकानां भवति। यदा-कदा श्रमिकः अपि अतिरेकं करोति किन्तु भगवता बुद्धेन उभौ प्रति ध्यानाकृष्टः कृतः। सिगालोवादे सुत्ते प्रतिपादिताः षड्दिशः क्रमशः गुरु-माता-पिता-पत्नी-बान्धव-मित्र-दास-दासीनां प्रतीकरूपेण कथ्यन्ते।

विविधेषु स्थलेषु राज्ञः कर्तव्याणि उच्यन्ते येषु इदं स्पष्टं भवति यत् भगवान् बुद्धः मानवतां प्रति सचेष्टः आसीत्, यत् मानवः समानतायाः अधिकारं प्राप्येत्। जन्मनः स्थाने गुणानामाधारे जनस्य श्रेष्ठतामुद्घोषितवान्।

**समानतायाः अधिकारः-** भारतीयसंस्कृतौ श्रमणसंस्कृतेः वैशिष्ट्यं एवमेव मन्यते यत् व्यक्तिः जन्मना उच्चः निम्नः न भवति कर्मणा सः उच्चः निम्नः वा भवति।

- वर्ण-व्यवस्थायाः मूलेऽपि एषा भावना आसीत् किन्तु समाजे जन्मतः व्यक्तिः उच्चैः नीचैः च मन्यते।

- भगवता बुद्धेन स्वकीये संघे निश्चितरूपेण भेदोऽयं विनष्टः कृतः यथा समुद्रे सकलनद्यः एकीभूताः भवन्ति तथैव भिक्षवः प्रव्रजितोपरान्तं समानाः सन्ति।

- व्यक्तिः जन्मना न कर्मणा महान् भवति।
- संघे सकलजातीनां समावेशः आसीत्।

– कर्मणः आधारे क्षत्रियादयः इति संज्ञा उपयुक्ता।

– जनभाषायाः महत्त्वेऽपि जनकल्याणस्य भावना अन्तर्निहितास्ति।

– डॉ. भीमराव अम्बेडकर महाभागः मार्क्सवाद-बौद्धधर्मयोः तुलनां कुर्वन् स्पष्टं लिखति यत् मार्क्सवादः हिंसायाः सहयोगं स्वीकरोति। एकवर्गविशेषस्य रक्षायै बलं ददाति बौद्धधर्मः सर्वेषां वर्गाणां विकासाय तत्परोऽस्ति।

– एशियादेशे बौद्धधर्मस्य विकासोऽभवत् तत्र राजा अशोकः अवश्यमेव कारणमासीत् किन्तु बौद्धधर्मस्य विकासे साम्राज्यवादस्य भावना नासीत्। अशोकस्य पुत्रः पुत्री च श्रीलंकां बौद्धधर्मस्य शिक्षायाः प्रचारार्थं गतवन्तौ परं शासनाय न। एवं कथ्यते यत् 'भवतां उपकाराय आवां आगतवन्तौ।' चीन-जापान-इण्डोनेशिया-तिब्बत-मंगोलिया-श्रीलंका-वर्मा- थाईलैण्डप्रभृतक्षेत्रेषु बौद्धधर्मः विकसितवान्। तत्रस्थैः शासकैः स्वकल्याणाय प्रजायाः च शान्तये बौद्धधर्मः पूर्णरूपेण स्वीक्रियते।

भारतवर्षे यदा अम्बेड़करमहाभागः बौद्धधर्मेण दीक्षितः तदा धर्मक्रान्तिः इति संज्ञया प्रसिद्धः जातः। यदि राष्ट्रिय दृष्ट्या पश्येत् तदा लाभोऽयं यत् ये दलिताः विदेशीधर्माणां दीक्षां स्वीकुर्वन्ति स्म ते भारतीयधर्मेषु दीक्षां स्वीकुर्वन्ति यस्मात् भारतीयधर्मेषु दीक्षितेषु राष्ट्रप्रेम्णौ प्रश्नचिन्हं न भवति अतएव केचित् जनाः अम्बेडकरस्य प्रयासोऽयं सुष्ठु न मन्यते किन्तु ये जनाः विकासे दलिताः आसन् तेषां दलितानां विकासस्य धारायां तेषु निराशायाः स्थाने आशायाः संचारः क्रियते। यद्यपि बौद्धधर्मे दीक्षितेन कोऽपि आरक्षण-लाभः न भवति यथा इदं श्रूयते यत् लोभवशात् धर्म-परिवर्तनं क्रियते किन्तु सत्यं तु इदमस्ति यत् धर्म-परिवर्तनेन आरक्षणस्य स्थितौ किमपि वैशिष्ट्यं नास्ति अर्थात् या स्थितिः जन्मकाले आसीत् सा एव पश्चात् भवति। अद्य बौद्धधर्मः भारते विविधकारणैः 'आशा-दीपः' अस्ति। मानवे मानवे कोऽपि भेदः न क्रियते। जन्मनः नामानि कोऽपि उच्चः नीचः नास्ति अपितु गुणाधारे जनः उच्च-नीचयोः संज्ञां प्राप्नोति। विदेशीजनाः अद्यापि बौद्धधर्मेण आकर्षिताः भवन्ति तस्य च वैज्ञानिकतायाः कारणात्। अत्र अन्धविश्वासस्य किमपि स्थानं नास्ति। भगवान् बुद्धः स्पष्टरूपेण अकथयत् यत् मम कथनं न मन्तव्यम् मात्रं गौरवकारणात् अपितु यदि उपयोगी भवेत् तर्हि स्वीकर्तव्यम्-

'परीक्ष्य भिक्षवो ग्राह्यं मदवचोः न तु गौरवात्।'

अद्य जगतः सकलकार्येषु या अव्यवस्था प्रतीयते सा मानवानां आन्तरिकी अव्यवस्थास्ति।

## संदर्भ-संकेतः


१. ह्यूमन राइट्स समाचारः जनवरी १६६६

२. सुवर्णप्रभाससूत्रम् १३/१४

३. सुवर्णप्रभाससूत्रम् १३/१६

४. सुवर्णप्रभाससूत्रम् १३/१४

५. बुद्धचरितम् ११/४८

६. धर्मसार-समुच्चयः ७१

७. जातकमाला १३/३८

८. जातकमाला १५/३

६. सौन्दरनन्दम् ३/३१

१०. चतुःशतकम् ३

११. जातकमाला २०/२

१२. बुद्धचरितम् २८/४२

१३. बुद्धचरितम् १६/२०

१४. संयुत्तनिकायः पृ. ७३

१५. बौद्धधर्म के २५०० वर्ष

# पालि-बौद्धसंस्कृतवाङ्मयेषु पर्यावरण-संरक्षणम्

मानवः प्रकृतेः एकोऽंगोऽस्ति किन्तु व्यावहारिकस्तरे स आत्मानं सृष्टेः केन्द्रबिन्दु अवगच्छन् प्रकृतिं पृथकत्वेन पश्यति। प्रकृतेः पृथकत्वस्य एषा प्रवृत्तिः संभवतया तस्मिन् काले जन्म गृहीतवती, यदा मानवः भौतिकजीवनं सुविधामयं कर्तुं सकलप्रयासं कृतवान्। इदं पृथक्त्वं सूक्ष्मतरम् अस्ति, प्रकृत्या च सह मानवस्य पूर्णसमन्वयः वर्तते किन्तु अद्य स्थितिः परिवर्तितास्ति। अद्य मानवः स्व सुख-समृद्धये प्रकृतेः शोषणाय अग्रसरोऽस्ति। या प्रकृतिः सर्वदा स्वसम्पदां मनुष्याय अन्येभ्यः जीवेभ्यः प्रददाति, तस्याः सर्वदा दुस्साहसे मानवः विषमपरिणतिं प्राप्नोति। एषा विषमपरिणतिः अस्ति-प्रदूषणं अर्थात् पर्यावरणस्य असन्तुलनम्। सर्वाणि प्राकृतिकसंसाधनानि यथा-भूमिः, वायुः जलं, वनं, जन्तवश्च मानवमात्रस्य पूर्णविकासायापेक्ष्यन्ते। अस्मान् परितः विद्यमानानि एतानि संसाधनानि पर्यावरणरूपेण सन्ति।[१]

ईसापूर्व षष्टे ख्रीष्टाब्दे यदा भगवतः बुद्धस्य प्रादुर्भावोऽभवत् तस्मिन् समये प्रमुखसमस्या आन्तरिकपर्यावरणस्यासीत्। धार्मिके, दार्शनिके जगति व्याप्तं कुरीतिं भगवान् अतिनां रूपत्वेन अपश्यत् अतः तैः अतिकामसेवनस्य कटुतपस्यायाश्च त्यागपूर्वकं आर्याष्टांगिकर्मागस्य शिक्षा प्रदत्ता। शाश्वत्वादस्य उच्छेदवादस्य च विचारः त्यागेन सह प्रतीत्यसमुत्पादस्य मननार्थं[२] दृष्टिकोणः प्राप्यते। चतुरार्यसत्यानां ज्ञानस्य पश्चादेव स्वयं भगवान् आत्मानं बुद्ध, इति उद्घोषितवान्। चतुरार्यसत्येषु प्रथमार्यसत्यमस्ति-दुःख-आर्यसत्यम्। द्वितीयमस्ति दुःख समुदय-आर्यसत्यम्, यस्मिन् सकलदुःखानां मूलकारणं तृष्णा इति उच्यते। यदि तृष्णां निवारय तदा सकलदुःखानाम् आगमनम् अवरुद्धं कर्तुं शक्नोति यत् दुःखनिरोध-आर्यसत्यं कथ्यते। आर्याष्टांगिक मार्ग-एव दुःखनिरोधगामिमार्गरूपं आर्यसत्यमस्ति।

मध्यममार्गे द्वयोः अन्तयोः त्यागस्य चर्चा क्रियते-अतिकटुतपस्यायाः अतिकामसेवनस्य च त्यागः। अयं यः अतिकाम-सेवनस्य त्यागोऽस्त्यत्र आधुनिकपर्यावरण-संरक्षणस्य बीजम् उपलभ्यते यतः इच्छा भोगश्च सुखवादी-सुविधावादी-दृष्टिकोणं संवर्धते पर्यावरण सन्तुलनं च विनश्यति। अहिंसायाः सिद्धान्तः आत्मशुद्धेः वर्तते पर्यावरण शुद्धेरपि अस्ति। सौन्दरनन्दे कविना उपदेशाः प्रस्तूयन्ते ये पर्यावरण-सन्तुलनस्युदाहरणानि सन्ति। सदाचारः, आत्यन्तिक मानसिकशुद्धिः जीवनस्य आवश्यकम् उपकरणमस्ति। परिमितं भोजनं च अल्पनिद्रा, शीलसंयमनं, इन्द्रियदमनम् एकान्तवासः मानसिक च एकाग्रतायाः अनेकाः शिक्षाः प्राप्यन्ते, ये जीवनस्य विविधक्षेत्रेषु मानवाय उपयोगिनः सन्ति। उत्तमोद्योगः (सम्यक व्यायामः) एवं जीवनस्य केन्द्रबिन्दुरस्ति। महाकवि अश्वघोषः अस्य उद्योग-धर्मस्य पदशः सजीवचित्रणमकरोत्। अश्वघोषस्य उपमायाः एषा विशेषता अस्ति यत् मानवजीवनेन प्रकृतिना च गृहीता सन्ति। यथा-कलुषितविचार एव यस्य जन्तवः सन्ति, क्रोध भय-मदादीनां तरङ्गैः यः चञ्चलोऽस्ति, एतादृशं दोषपूर्णमगाधं-सिन्धुं स्वयं तरति स्म जनान् चापि तारयति[3]। बौद्धधर्मे विविध प्राकृतिक-वृक्षाणां महत्ता प्राप्यते यथा-

**बोधिवृक्षः** - भगवान् बुद्धः "अश्वत्थ" इति वृक्षस्य छायायां ज्ञानं प्राप्तवान् यं बोधिवृक्ष इति कथ्यते। जनैश्चायं वृक्षः पूज्यते। पर्यावरणस्य दृष्ट्या अयं वृक्षः अत्यन्तः महत्त्वपूर्णः अस्ति यतः मानवजीवनोपयोगितः अस्य वृक्षस्य संरक्षणस्यावश्यकता वर्तते।

**पुण्डरीकम्** -श्वेतकमलेन सम्बन्धितं सद्धर्मपुण्डरीकसूत्रमस्ति। पुण्डरीकः निर्मलतायाः पुनीततायाश्च प्रतीकोऽस्ति यथा-कर्दमात् प्रादुर्भूय पुण्डरीकं कर्दमस्य कालुष्येन मुक्तं न भवति तथैव सुगतः अस्मिन् सांसारिक जीवने प्रादुर्भूय सांसारिकयातनाभ्यः प्रपञ्चेभ्यः च दूरोऽस्ति। एभ्यः सदैव निर्लिप्तोऽस्ति। सूत्रग्रन्थोऽयं सद्धर्मस्य पुण्डरीकमस्ति यः जागतिकप्रपञ्चैः प्रपञ्चितं प्राणिवर्ग-पवित्रतायाः शुद्धतायाश्च संदेश-प्रदाने सर्वथा समर्थमस्ति।

प्रकृति-चित्रणेन सह दुखवादस्य सिद्धान्तः अश्वघोषः सौन्दरनन्दे सम्यक्रूपेण प्रयुक्तवान् यथा वायुः सर्वदा नभसि निवसति, अग्निः सर्वदा

शमीगर्भे विद्यते जलञ्च पृथिव्याः अन्तः पटले निवसति तथैव दुःखं सर्वदा चित्ते शरीरे च व्याप्नोति। वायुप्रभृतिनां नभादिभिः सह यः सम्बन्धः वर्तते स एव सम्बन्धः दुखस्य शरीरेण चित्तेन च सह वर्तते। यथा-

**आकाश योनिः पवनो यथा हि यथा शमीगर्भशियो हुताशः।**
**आपो यथान्तर्वसुधाशयाश्च दुःखं तथा चित्त शरीर योनि।।**
**अपां द्रवत्वं कठिनत्मुर्व्या वायोन्बलत्वं ध्रुवमौष्ण्यमग्नेः।**
**यथा स्वभावो हि तथा स्वभावो दुःखं शरीरस्य च चेतसश्च।।**

यावत् शरीर-चित्तयोः सत्ता वर्तते तावत् मानवकृते दुःखात् मुक्तिः नास्ति। वयं दुःखं चित्तस्य शरीरस्य वा सहजधर्मस्य रूपेण स्वीकुर्मः यतः दुखस्य सह इयान् घनिष्ठसम्बन्धः वर्तते यं पृथक् कर्तुं न शक्नोति। तृष्णया वशीभूयाद्य मानवः प्राकृतिक-संसाधनानां दोहनं करोति यस्मात् पर्यावरण-संतुलनं विनश्यति। अतएव भगवता बुद्धेन स्वशिक्षासु तृष्णायाः समूलविनाशस्य शिक्षा दीयते।[४]

भगवता बुद्धेन स्थापिते संघेऽपि अस्य प्रयासः क्रियते यत् भोगीजनान् संघे किमपि स्थानं न प्राप्नुयात् एवं संघे आन्तरिकप्रदूषणं दूरीकर्तुं प्रयासः क्रियते यं अद्य वयं पर्यावरणम् इति कथयामः। प्राकृतिक संसाधनानां सन्दर्भेऽपि भगवान् बुद्धः संघस्य नियमेषु स्थानं भजते यस्य विवरणं एवमस्ति-भगवता बुद्धेन पंचशीलाः वर्णिताः। भगवतः बुद्धस्य संघे उपासक-उपासिकाः, भिक्षणः भिक्षुण्यश्च सम्मिलिताः सन्ति। उपासकेभ्यः पंचशीलस्य पालनं अनिवार्यमस्ति भिक्षुभिक्षुणिभ्यः 'पातिमोक्खे' वर्णित २२७, ३११ च नियमाः सन्ति। पंचशीले सर्वविधहिंसायाः त्यागः असत्यं, अचौर्यः अब्रह्मचर्यः नृत्यगीतम् मालाधारणं, संगीत-सुवर्ण-अमूल्यशय्यायाः त्यागः वर्तते।[५] एषु मालागन्धविलेपनस्य त्यागः पञ्चशीलस्य पालनम् अत्यधिकं भोग्यादिसंस्कृतिं दूरीकृत्य पर्यावरणं संरक्षयति। पञ्चशीलाः गृहस्थेभ्यः दशशीलाश्च प्रव्रजितेभ्यः सन्ति। एषु अपि पर्यावरण-संरक्षणस्य सूत्रं प्राप्यते।

**पाराजिकः**-गहन-अपराधः पाराजिकोऽस्ति। एकदा भिक्षुभिः अरण्यात् स्वतः काष्ठम् आनीय कुटी विरचिता। राजा इदं दुष्कृत्यं अनिन्दयत्। भगवति

पृष्टे भिक्षुः अकथयत् यत् ग्रामात् आनीतं न अपितु अरण्यात् आनीतम्। भगवता अस्य निन्दां कृत्वा शिक्षापदानि प्रतिपादितानि यत् यः भिक्षुः ग्रामात् (अरण्यात् न) स्वतः आनयति, तेन वस्तु-गृहणात् पाराज़िकस्य दोषः भवति।[६]

**संघादिसेसः**- त्रयोदश संघादिसेसाः सन्ति। पर्यावरणेन सम्बन्धिताः नियमाः सन्ति। षष्ठमे संघादिसेसः इदं कथ्यते यत् कुटीर-निर्माणं दोषोऽयं वर्तते सप्तमे संघादिसेसे वर्णितम् यत् छन्न नामक भिक्षुः कुटी-निर्माणाय नगरवासिभिः पूजितः चैत्यवृक्षः विनष्टः। जनपदवासिभिः अस्मिन् दृष्कृत्ये दुःखं प्रकटितम् तदा भगवता कथितम् यत् हिंसायुक्ताख्याने कुटि-निर्माणे दोषः वर्तते।[७]

**निस्सग्गिय पाचित्तियः**- प्रथमे निस्सग्गिय पाचित्तिये इदं कथ्यते यत् दशादिवासाधिकम् अतिरिक्तचीवर-ग्रहणे अयं दोषः भवति। द्वितीये च इदं निगद्यते यत् आवश्यकतया एकः न्यूनः चीवरः गृहीतव्यः। तस्मादधिकः दोषः वर्तते। एकादशे इदं वर्णितम् यत् षड्वर्गीयः कौषेय वस्त्रेण निःसृतासनस्य कामनां अकरोत् यस्मात् सूक्ष्मजीवानां विनाशः भवति तदा भगवता कथितम् यत् अत्र दोषः वर्तते।[८]

**पाचित्तियः**- भिक्षुः नवनिर्माणाय-भूमिखननं करोति कारयति वा यस्मात् एकेन्द्रियजीवानां विराधना अभवत् तदा भगवता इदं प्रतिपादितम् यत् यः भिक्षुः भूमिं खनति तत्र अपि अयं दोषः वर्तते। परिमाणादधिके चीवरादिग्रहणे पाचित्तियदोषः कथ्यते।[९]

**दुक्कटः**- दुक्कटेन तात्पर्यं दुष्कृत्येन अस्ति। अस्मिन् सन्दर्भे प्रमुखाः नियमाः एवम् सन्ति- एकपट्टिकामात्रोपानहग्रहणीयं तृण-कमलादीनां पादुकायाः ग्रहणे च अयं दोषः भवति। मानवमांसे हस्तिमांसे, अश्वमांसे, श्वान-सिंह-व्याघ्र-उल्लूकादीनां मांसभक्षणे अयं दोषः वर्तते।[१०]

**थुल्लचयः**- कुशनिर्मितवल्कल-फलक-केशकम्बल-मृगछालादि वस्त्रधारणे अयं दोषः भवति।[११]

**वर्षावासः**-भगवान् बुद्धः वर्ष-दिवसेषु एकेन्द्रियजीवानां पीड़ां विचार्य वर्षावासस्य विधानम् अकरोत्। अस्मिन् सन्दर्भे वर्णितम् यत् भिक्षुभिः निवेदितम्

यत् अपरतैर्थिकाः जीवानां दयां विचार्य वर्षावासाः कुर्वन्ति यस्मात् तेषां प्रतिष्टा यशश्च विस्तरति। भगवता बुद्धेन अपि वर्षावासः निर्धारितः।[१२]

**अरण्यवासः**-भिक्षुभ्यः वृक्षमधः निवासस्य प्रावधानं आसीत् विहार-प्रसादादयोऽपि विहिताः आसन्। संयुत्ते वर्णितम् यत् भिक्षो विलम्बेन आगमने च वनदेवता भिक्षुं सतर्क करोति। वनदेवता भिक्षून् अरण्यवैभवं वर्णयति।[१४] एकदा भिक्षुषु गतेषु वनदेवता विलपति अरण्यं च शून्यं निगदति। एकः भिक्षुः पुष्पं जिघ्रति तदा देवता चौरकर्मणः आरोपं करोति। भिक्षोः कथनेऽपि यत् सः न किञ्चदपि ग्रहणाति न च विनश्यति, मात्रं पुष्पं जिघ्रति यतोहि अन्याः जनाः पुण्डरीकं समूलं विनश्यन्ति, तान् कथं न कथयसि ? वनदेवता कथयति यत् मनुष्यः सेविकायाः मलिन वस्त्रसदृशं तं कथनं निष्प्रयोजनम् अस्ति किन्तु भिक्षुः निष्पापी अस्ति अतएव तस्मै केशाग्रभागेनापि पापं मेघवत् अवगन्तव्यम् देवैः एवं कथ्यते यत् भिक्षुः स्वत्रुटिं स्वीकरोति।[१५]

एवं बहुविधसन्दर्भेन ज्ञायते यत् पालि-संस्कृत बौद्ध वाङ्मययोः पर्यावरण-संरक्षणस्य आभ्यन्तर-बाह्य चेतना समुपलभ्यते। परवर्तिबौद्धाचार्यैः संस्कृतभाषायां बौद्धवाङ्मयाः विरचिताः। यस्मेषु पर्यावरण-संरक्षणस्य सन्दर्भे प्रकृति-चित्रणस्य सुन्दरं विश्लेषणं कृतम्। यथा सौन्दरनन्दे-

**हारान्मणीनुत्मकुण्डलानि केयूराण्यिथ नूपराणि।**
**एवं विधान्याभरणानि यत्र स्वर्गानुरूपाणि फलन्ति वृक्षाः।।**[१६]

तृष्णया वशीभूय अद्य मानवः प्राकृतिक संसाधनानि संदोग्धि यस्मात् पर्यावरण-सन्तुलनं विनाशेऽपि तिष्ठति। भगवान् बुद्धः स्वशिक्षासु तृष्णायाः समूलविनाशस्य शिक्षां प्रददाति स्म। भगवता बुद्धेन स्थापिते संघेऽपि अस्य सकलः प्रयासः कृतः यत् संघे तृष्णावतां भोगीनां जनानां किमपि स्थानं न प्राप्यते। एवं संघे आन्तरिक-प्रदूषणं दूरीकरणस्य प्रयासः कृतः। यं वयं अद्य पर्यावरणं इति कथयामः। प्राकृतिक-संसाधनानां सन्दर्भे भगवता संघस्य नियमेषु स्थानं दत्तम्। भगवता बुद्धेन संघस्य प्रदूषणानि दूरीकर्तुं स्वच्छं पर्यावरणं प्रदत्तम्, समाजेऽपि गृहस्थजनेभ्यः संयमस्य उपदेशं प्रदाय पर्यावरण-संरक्षणे योगदानं कृतम्। परवर्तिबौद्धसाहित्येऽपि अस्मिन् प्रसंगे बहवः सन्दर्भाः प्राप्यन्ते।

## सन्दर्भ-संकेतः


१. पर्यावरण-संरक्षण और आर्थिक विकास -डा. वी. पी. सती कालेज योजना-वर्ष ३१, अंक ६, जून १६६५ पृ. ८, २३
२. सौन्दरनन्दम् १६-६४-६७
३. सौन्दरनन्दम् ३/१४
४. नन्दी संयोजनो लोको, वितक्कस्स विचारणं। तण्हाय विप्पहानेन, निब्बानं इति वुच्चतीति!
  - संयुत्तनिकाय पृ. ३७
५. खुद्दकपाठः।
६. पातिमोक्ख, डॉ. भागचन्द्रेन सम्पादित, आलोक प्रकाशनम्, नागपुर पृ. ६
७. तदेव पृ. ११
८. तदेव पृ. २१-३५
६. तदेव ३६-६४
१०. चुल्लवग्गः
११. संक्षिप्त विनयपिटक १३४
१२. पातिमोक्खः
१३. संयुत्तनिकायः, नवनालन्दा महाविहार प्रकाशनम् पृ. १६६
१४. तदेव पृ. ३२
१५. तदेव पृ. २०५
१६. सौन्दरनन्दम् १०/२३

# पालि-त्रिपिटकस्य प्रामाणिकता

त्रिपिटकस्यार्थोऽस्ति-त्रिपिटकानां समूहः। त्रिपिटकानां नामानि सन्ति-सुत्तपिटकम्, विनयपिटकम् अभिधम्मपिटकञ्च। सुत्तपिटके इतिहासेन सह संघस्य बुद्धोपदेशानां संकलनम् अस्ति। विनयपिटके नियमाः उपनियमाः सन्ति। अभिधम्मपिटके धर्मस्य विशिष्टं विवेचनमस्ति। त्रिपिटकमेव बुद्धवचनानां प्रामाणिक- संग्रहो मन्यते। पिटकशब्दस्यार्थोऽस्ति 'मंजूषा' परं प्रारम्भिकसमये बुद्धोपदेशः मौखिकरूपे आसीत्, अतः अत्र पिटकशब्देन तस्य लाक्षणिकार्थः परम्परया इति मन्तव्यः।

बुद्धत्वप्राप्तितः महापरिनिर्वाणपर्यन्तं भगवता बुद्धेन स्वशिष्येभ्यः सामाजिकजनेभ्यः यत्र-तत्र धर्मोपदिष्टः। संघस्य सुव्यवस्थार्थं समये समये आवश्यकतानुसारं नियमोपनियमः विधीयन्ते।

भगवतो बुद्धस्य जीवन-काले तस्य सकलोपदेशाः मौखिकाः एव आसन्। योग्यतानुसारं भिक्षुभिः बुद्धोपदेशः कण्ठस्थीकृतः। उपदेशेन सह भिक्षवः उपदेशे मिश्रितं बुद्धस्य जीवनवृत्तमपि कण्ठस्थम् अकुर्वन्।

**प्रथमसंगीतिः** -भगवतः बुद्धस्य परिनिर्वाणोपरान्तं तेषाम् उपदेशानां संग्रहार्थं राजगृहे स्थविर-महाकश्यपस्य अध्यक्षतायां प्रथम-संगीतिः सम्पन्ना जाता। अस्यां संगीत्यां पंचशतार्हद्भिक्षवः स्थानं गृहीतवन्तः। एषा संगीतिः सप्तमासपर्यन्तं प्राचलत्। अत्र धर्मविनयसम्बन्धि-बुद्धोपदेशानां संकलनम् अभवत्। बौद्धधर्मेतिहासे एषा संगीतिः प्रथमधर्मसंगीतेः नाम्ना प्रसिद्धा जाता। अत्र पंचशतभिक्षवः स्थानं गृहीतवन्तः अतएव एषा 'पंचसतिका' इति कथ्यते।

प्रथमधर्मसंगीतौ संकलित-बुद्धवचनानि चिरस्थायीनि कर्तुं भिक्षुभिः सुनियोजितरीत्या कार्यं कृतम् । संगीतौ स्वीकृत-संकलित-बुद्धवचनान् लघुकायिक विभागेषु विभज्य तान् मौखिकपरम्परया सुरक्षायाः भारः पृथक्-पृथक् भिक्षुसंघेभ्यः दीयते स्म। विविधाः भिक्षुसंघोऽपि स्वविभागे आगतधर्मविनययोः अंशानां पाठम् आरभन्, यस्मात् तं भिक्षुसंघं तदंशविशेषस्य भाणकः कथितुम् आरभत्। भगवतः

बुद्धस्य समये एव भाणकपरम्परा बुद्धवचनस्य सुरक्षार्थं प्रचलितस्म। इत्थं प्रथमसंगीतेः अनन्तरं भाणक-परम्परया बुद्ध-वचनानां सुरक्षा अभवत्।

**द्वितीयसंगीतिः** - भगवतः बुद्धस्य परिनिर्वाणोपरान्तं शतवर्षानन्तरं विनयविषयकनियमानां संघे मतभेदो दृश्यते स्म। वैशाल्याः भिक्षुभिः विनय-सम्बन्धिनियमानां पालने शैथिल्यं प्रकटितम्। तैश्च उपासकाः अपि विनय विरुद्धाचरणं कर्तुं प्रेरिताः, अस्य विपरीतं मथुरायाः भिक्षवः विनयविषयकनियमानां पालने दृढ़ाः आसन् अवन्ति-दक्षिणापथस्य भिक्षुषु विनयसम्बन्धिनियमानां पालने न शैथिल्यं आसीत् न च दृढ़त्वम्।

विनयविषयकनियमानां पालनसम्बन्धिवृत्तं तदा निर्णायक-स्थितिः अभवत् काकण्डकपुत्रयशसा वैशाल्याः वज्जीभिक्षूणां दशवार्तासु विनयविरुद्धाचरणे आपत्तिः प्रकटिता। विवादं समाधातुं प्रतिपक्षस्य स्थविरभिक्षूनाम् एका सभा जाता। परिषदि विवादग्रस्त दशवार्ताः विनयविरुद्धत्वेन घोषिताः। तत्पश्चात् वैशाल्याः बालुकारामे महास्थविररेवतस्य अध्यक्षतायाम् एका सभा घटिता। अत्रापि सप्तशतभिक्षुभिः धर्मविनयानां सम्बद्धबुद्धवचनानां संगायनं भूतम्। एषा सभा बौद्धधर्मस्येतिहासे द्वितीयधर्मसंगीतेः नाम्ना विख्याता । सप्तशतभिक्षूणां सम्मिलनात् एषा 'सप्तसतिकापि' कथ्यते। स्थविर भिक्षवः पालिभाषायां महासांघिक-भिक्षवः संस्कृतभाषायां बुद्धवचनस्य संगायनं कृतवन्तः।

**तृतीयसंगीतिः-** राज्ञा अशोकेन कलिंग-युद्धोपरान्तं बौद्धधर्मः स्वीकृतः। राजा अशोकः स्थविरवादिपरम्परायाः भिक्षूभ्यः प्रश्रयं दातुम् आरभत्। लोभवशात् अन्यमतावलम्बिनः साधवः बौद्धस्थविरवादिसंघे प्रविष्टवन्तः, स्वस्वमतं च बुद्धस्य मतम् इति कथितवन्तः। अस्मात् कारणात् संघे वैमत्यं समुद्भूतम्। स्थविर-भिक्षुभिः विक्षुब्धं भूत्वा उपोसथं (पातिमोक्रव-पाठम्) स्थगितम्। राज्ञा अशोकेन संघे पुनरपि उपोसथं प्रारब्धम् कर्तुं तात्कालिकमहास्थविरमोग्गलिपुत्ततिस्सस्य सहाय्येन संघात् षष्ठिसहस्रपाखण्डिभिक्षवः निर्गताः, तत्पश्चात् मोग्गलिपुत्ततिस्सस्य अध्यक्षतायां पाटलिपुत्रे तृतीयधर्मसंगीतिः समायोजिता। एकसहस्रभिक्षूणां सहाय्येन अस्याः संगीतेः कार्यं नवमासेषु समाप्तम्।

अस्याः संगीतेः बौद्धधर्मस्येतिहासे अनेकैः कारणैः महत्त्वपूर्णं स्थानमस्ति यथा-

१ - अस्यां संगीतौ प्रथमावसरे 'धम्मं' सुत्त-अभिधम्म विभागद्वयं विभज्य बुद्धवचनानां सुत्तविनयाभिधम्माणां रूपे संकलनं संगायनं च क्रियतेस्म।

२- अत्र मोग्गलिपुत्ततिस्सेन विरचित 'कथावत्थुप्पकरणम्' नामकः ग्रन्थः अभिधम्मपिटकस्य ग्रन्थेषु सम्मिल्य तस्मै त्रिपिटकस्य अन्यग्रन्थानां सदृशं सम्मानं दीयते स्म। अस्मिन् ग्रन्थे तात्कालिक धार्मिक समाजे प्रचलित द्विपञ्चाशताधिकद्विशतानि (२५२) मिथ्यामतानि खण्डयित्वा स्थविरवादस्य शुद्धं स्वरूपं प्रस्तूयते।

३- अस्यां संगीतौ त्रिपिटकम् अन्तिमं रूपं प्रदीयते स्म।

४- अस्यां त्रिपिटकस्य संकलनस्य संगायनस्य चानन्तरं बौद्धधर्मस्य प्रचाराय प्रसाराय च भिक्षून् निकटस्थ देशेषु सम्प्रेष्य महत्त्वपूर्णं निर्णयः क्रियते। अस्य निर्णयस्यानुसारम् अशोकस्य पुत्रः महेन्द्रः तृतीय धर्म-संगीतौ अनुमोदेत त्रिपिटकेन सह लंकाद्वीपं प्रेषितः।

**चतुर्थसंगीतिः** - पालिपरम्परानुसारं तृतीयधर्मसंगीतेः दशवर्षानन्तरं स्थविरमहेन्द्रस्य प्रेरणया लंकायां चतुर्थधर्मसंगीतिः आयोजिता। 'देवानपियतिस्स' राज्ञः समये एषा संगीतिः लंकायाः थूपाराम-विहारे अरिष्टस्थविरस्य अध्यक्षतायां सम्पद्यते स्म। अत्र षष्टिसहस्रभिक्षवः स्थानम् अभजन्। भारते सम्पन्न-तृतीयधर्मसंगीतेः अत्रापि त्रिपिटकस्य संगायनं क्रियते स्म।

**पंचमसंगीतिः**- लंकायाः राज्ञः वट्टगामणि-अभयस्य समये स्थविरैः एषा आशंकिता यत् मौखिकपरम्परया अद्य बुद्ध-वचनानां सुरक्षा न संभाव्यते अतएव तेषां लिपिबद्धकरणम् अत्यावश्यकम् अस्ति। राज्ञा लेखन-कार्यस्य सकलव्यवस्था कृता। तदा भिक्षुभिः पूर्वसंगीतीनां क्रमेण त्रिपिटकस्य संगायनं कृत्वा तं लिपिबद्धं कृतम्।

इत्थमिदं सुस्पष्टं यत् भगवतः बुद्धस्य महापरिनिर्वाणोपरान्तं तेषाम् उपदेशाः भाणकपरम्परायाः 'चतुर्शतवर्षपर्यन्तं सुरक्षिताः आसन्। यदावश्यकं भूतं तदा संगीतयः आयुज्यन्ते स्म। लिपिबद्धस्योपरान्तम् अन्येषु देशेषु ईदृशाः प्रयासाः जाताः। उदाहरणस्वरूपं तर्मदिशे सम्राट मिण्डोनमिनमहाभागस्य (१८७१ खीष्टाब्दः) समये एका संगीतिः आयुज्यते स्म। अत्र सकल बुद्धवचनान् पाषाण-पट्टिकासु उत्कीर्ण्य तान् एकस्मिन् स्थानविशेषे अंगीक्रियन्ते।

महापरिनिब्बानसुत्ते बुद्धः आदिष्टवान् यत् धर्मं विनयं च शास्ता वत मन्तव्यम्। अतः इदं स्वाभाविकं यत् बुद्धस्य परिनिर्वाणोपरान्तं भिक्षुसंघः धर्मविनययोः

निश्चयं कुर्यात्। बुद्धस्य समये भिक्षुगणाः स्व-स्व विहारेषु निश्चित बुद्धोपदेशान् मौखिकपरम्परया सुरक्षितम् अकुर्वन्। फलतः पृथक्-पृथक् विहारेषु पृथक्-पृथक् बुद्धोपदेशाः सुरक्षिताः आसन्। बुद्धस्य पश्चात् भिक्षुसंघस्य सर्वप्रथमं कार्यं इदमेवासीत् यत् विविधविहारेषु विकीर्णोपदेशान् एकत्रितं कुर्यात् । इदमेव कार्यं प्रथमसंगीतौ सम्पद्यते स्म। राजगृहस्य सप्तपर्णीगुफायां पंचशतवरिष्ठभिक्षवः एकीभूय स्वस्वविहारेषु मौखिकरूपेण सुरक्षितान् बुद्ध-वचनान् प्रस्तुतवन्तः समुचितपरीक्षणोपरान्तं च तान् सामूहिकरूपेण बुद्धवचनत्वेन मन्यते स्म। अस्यां संगीतौ बुद्धेन एकेनाधिकविहारेषु प्रदत्तोपदेशाः संशोधनेन विना मन्यन्ते। फलतः एतद् प्रसंगेषु एकैवोपदेशः एकेनाधि ाकतः संकलितः भूतः तत्र च मात्रं सम्बोधित- भिक्षुस्थानयोः नाम्नः भिन्नतामात्रं दृश्यते स्म। इत्थं यदि कोऽपि उपदेशः एकस्थले संक्षेपेण द्वितीयस्थले च विस्तारेण प्रस्तूयते स्म, तर्हि संगीतौ तस्य संक्षिप्तविस्तृतोभे रूपे स्वीक्रियेते। यदि कोऽपि उपदेशः एकस्थले बुद्धेन प्रस्तुतः द्वितीयस्थाने च केनापि भिक्षुणा तर्हि तदोपदेशोऽपि द्वयोः रूपयोः सङ्कलितः क्रियते। अस्मात् कारणात् केषुचित् सुत्तेषु पुनरुक्तिः दृश्यते तर्हि केषुचित् सुत्तेषु परस्परं विरोधः इव लक्ष्यते। अयं निष्कर्षः युक्ति-संगतः प्रतीयते यत् प्रथमसंगीतौ धम्मविनययोः संकलनस्य समये प्रत्येकम् भिक्षुः स्वविहारे सुरक्षितं बुद्धोपदेशं तस्मिन्नेव रूपे संगीतेः मान्यता दीयते स्म।

प्रथम संगीतेः पश्चात् बुद्धवचनस्य सुरक्षार्थं ये प्रयासाः भूताः ते सकलविद्वांसः मन्यन्ते। संकलिताः केचिद् उपदेशाः सन्ति ये बुद्धस्य केनचित् शिष्येन कथ्यन्ते। त्रिपिटके ईदृशः एकोऽपि प्रसंगः नास्ति यस्मिन् बुद्ध-मन्तव्यस्य भावः न निहितो भवेत्। त्रिपिटके अधिकांशोपदेशाः तस्मिन्नेव रूपे सङ्कलिताः सन्ति, यस्मिन् रूपे तेषां शिष्याः स्मृतवन्तः। प्रथमद्वितीयधर्मसंगीतयोः तत्रस्थभिक्षूणां निष्ठायां नास्ति किमपि कारणं सन्देहस्य। अतः बुद्धस्य समीपं तस्य च धर्मस्य समीपं गन्तुं त्रिपिटकेनाधिकः प्रामाणिकः ग्रन्थः नास्ति। यदि कुत्रापि बुद्धस्योपदेशेषु मिश्रणं आभाषेत् तर्हि अपि त्रिपिटकम् एव बुद्धोपदेशेभ्यः एकमात्रं सहाय्यम् अस्ति।

**आधारग्रन्थाः**


- प्रारम्भिक बौद्ध धर्म दर्शन-डॉ. विजयकुमार जैन
- बौद्धधर्म के विकास का इतिहास
- पालि साहित्य का इतिहास

# संस्कृतं बौद्ध-संस्कृतिश्च

संस्कृतभाषायामस्माकं संस्कृतिः सुरक्षितास्ति अतएव अस्माकं दायित्वं वर्तते यत् न्यासं वयं प्राप्नुमः तं सुरक्षितं कुर्मः परिपुष्टश्च कुर्मः ,अनागतजनेभ्यः दद्याम्। संस्कृते भारतीय-संस्कृतिः सुरक्षितास्ति यथा वैदिकसंस्कृतिः, श्रमणसंस्कृतिश्च। श्रमणपरम्परायां तात्कालिक जनपदादीनां भाषायाः विकासः जनभाषारूपेण समुदभूत यथा-मागधी (पालि) प्राकृतश्च। अधुना संस्कृतं कस्यचिदेकस्य वर्गविशेषस्य भाषा नास्ति अपितु सम्पूर्णराष्ट्रस्य मातामही भाषास्ति। यन्महत्त्वं गृहे पितामह-मातामहीत्यादिपूर्वजानां भवति तदेव स्थानं भाषानां विकासे मार्ग-निर्देशने च संस्कृतस्य वर्तते। समस्त भाषानां ज्ञानाय, व्याकरणस्य च निर्माणाय संस्कृतस्य ज्ञानमपेक्ष्यते, अतएव संस्कृतव्याकरणेन सह संस्कृतभाषायां निबद्धेन विपुलं वांड्मयं भारतीयभाषासु अनुवादोऽपेक्ष्यते। संस्कृतभाषायां निबद्धेन बौद्धवाङ्मयेन भारतस्य निकटवर्तिदेशस्य सभ्यता प्रभावितास्ति यथा चीन-तिब्बत देशादयः, संस्कृतभाषायामेषाक्षमतानुभूयते, यत् संस्कृतभाषायां निबद्धं साहित्यं युगाब्दपर्यन्तं व्यवस्थितं भवितुं शक्नोति-यथा स्थानीयभाषायां व्यवस्थित-व्याकरणस्याभावे अर्थभ्रान्तिः संभाव्यते, किन्तु संस्कृतेर्व्याकरणस्य सुव्यवस्थितत्त्वादेवेषा सम्भावना नास्ति। संस्कृते निबद्धः वाङ्मयः सर्वाधिकः प्रामाणिकः भवितुं शक्नोति, अतएव अधुना यदस्माकं ज्ञानं विज्ञानञ्चास्ति तत् संस्कृतस्य माध्यमेन रक्षणीयमित्यपेक्ष्यते।

भारतीय संस्कृतेः विकासे यथा संस्कृत-भाषायाः योगदानं स्मर्यते तथैव तात्कालिक-जनभाषायाः रूपत्वेन पालि-प्राकृतयोः योगदानं विस्मर्तुं न शक्यते। पालि-प्राकृतभाषयोः समाजे स्वीकृतिः भगवतः बुद्धस्य महावीरस्य च प्रयासेन अभवत्। तयोश्च परिणामोऽयमस्ति यत् शिक्षायाः विकासोऽभवत्। भाषायाश्च विकासत्वेन अद्य वयं हिन्दीभाषां प्राप्तुं शक्नुमः। जैनबौद्धपरम्परा प्रथमतः

जनभाषायाः रूपे प्राकृतं पालिञ्च स्वीकृतवती परं एतयोः दर्शनयोः यदा प्रौढतां संवर्धते तदा संस्कृतं च स्वीक्रियते। यद्यपि बौद्धानां थेरवाद-परम्पराद्यापि श्रीलंका-थाइलैण्ड-वर्मादि दक्षिण एशियायी देशेषु प्राप्यते , सा परम्परा पालिभाषया स्वीक्रियते।

जैनबौद्धदार्शनिकानां संघर्षस्य परिणामोऽस्ति यत् वयं भारतीयदर्शनस्य विकसितं रूपं प्राप्नुमः। विचाराणां आदान-प्रदानेन गम्भीरतया विचारार्थं वयं प्रवृत्ताः अभवाम **'वादे-वादे जायते तत्त्वबोधः।'** इदमेव कारणमस्ति यत् यत्र नैयायिकैः बौद्धदार्शनिकाः तिरस्कृताः तत्र अपरतः तेषां बुद्धेः प्रशंसा निरन्तरं कृता-

**इति सुनिपुणबुद्धिर्लक्षणं वक्तुकामः**
**पदयुगलमयीदं निर्ममे नानवद्यम् ।**
**भवतुमतिमहिम्नः चेष्टितं दृष्टिमेतद्**
**जगदभिभवधीरश्रीमतो धर्मकीर्तेः ।।**

वयं संस्कृतस्य विकासे बौद्धसाहित्यस्य संस्कृतेश्च संरक्षणे संस्कृतस्य प्रासांगिकतां द्रष्टुं शक्नुमः। आरम्भे भगवता बुद्धेन भिक्षवः आदिष्टाः यत् स्व स्व भाषायामेव बुद्धोपदेशाः ग्रहणीयाः **अनुजानामि, भिक्खवे सकाय निरुत्तिया बुद्धवचनं परियापुणितम्।** अस्योल्लंघने दुक्कटस्य (दुष्कृतस्य) अपराधः निगद्यते। भगवतः परिनिर्वाणस्य शतवर्षाणां पश्चात् यदा संघे भेदोऽभवत् तदा थेरवादः पालिभाषां एव स्वीकरोतिस्म किन्तु महासांघिकाः संस्कृतं स्वीकृतवन्तः महासांघिकैः पिटकस्य रूपान्तरणमपि संस्कृतभाषायाम् कृतम् यत् चाइनीज भाषायां सुरक्षितमस्ति। इदम् अस्माकं दुर्भाग्यमस्ति यत् वयं चाइनीज भाषायां उपलब्ध संस्कृत-त्रिपिटकं भारतीय भाषासु लिप्यन्तरणम् अनुवादं वा न कर्तुं शक्नुमः। महायानस्य आगमः **'वैपुल्यसूत्रम्'** इति कथ्यते यत् संस्कृतभाषायां वर्तते किन्तु इदं संस्कृतं पालि-प्राकृतयोः मिश्रणात् मिश्रसंस्कृतं बौद्धमिश्रसंस्कृतं वा अवगम्यते। पालि-प्राकृतभाषायाः विशेषता अस्ति। एते लौकिकसंस्कृतस्यापेक्षया वैदिकसंस्कृतस्य अतिसमीपं वर्तते।

सर्वास्तिवादीनां , सौत्रान्तिकानां वैभाषिकानां सकलाः ग्रन्थाः संस्कृतभाषायां निबद्धाः सन्ति, ये अधिकांशतोऽद्यापि अनुपलब्धाः ।

बौद्धन्यायपरम्परायाः सकलाः ग्रन्थाः संस्कृते सन्ति। बौद्धतान्त्रिकग्रन्थाः अपि संस्कृते सन्ति किन्तु एषा भाषा वैशिष्ट्यं लभते यस्मात् इमां 'संध्या' भाषा इत्यपि कथ्यते। काव्यस्य दृष्ट्या अश्वघोषः बौद्धकवयः सन्ति येषां योगदानस्य संस्कृतसाहित्ये सर्वदा स्मरणं क्रियते। अश्वघोषस्य समयः कालिदासात् पूर्वं मन्यते। काव्यस्य च दृष्ट्या अश्वघोषस्य महत्त्वं भारतीयाः पाश्चात्याश्च विद्वांसः स्वीकुर्वन्ति। महाकविअश्वघोषस्य शैली ललिता श्लेषहीना चास्ति। कविः अश्वघोषः गूढतम-सिद्धान्तान् सरलरीत्या अवगन्तुं सफलोऽभवत्। विद्वांसः अश्वघोषस्य कालिदासस्य च शैल्यां सादृश्यं पश्यन्ति। दार्शनिककवि नाश्वघोषेन बौद्धनिर्वाणं उपमायाः माध्यमेन स्पष्टं क्रियते -

**दीपो यथा निवृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न काञ्चिद्विदिशं न कांचिच्स्नेहक्षयात्केवलमेति शान्तिम् ।।**
**एवं कृती निवृतिमभ्युपेतौ नैवावनिं गच्छति नान्तरिक्षम् ।**
**दिशं न कांचिद्विदिशं न कांचितक्लेशक्षयात्केवलमेति शान्तिम् ।।**

अस्य काव्यं हितोपदेशेन भक्तिभावनया च पूरितमस्ति। दर्शनस्य धर्मस्य च प्राधान्ये भूतेऽपि वैयाकरण-कलाकार-संगीतज्ञादिषु प्रकृष्टा प्रतिभा प्राप्यते । संसारस्य विचित्रतायाः सुन्दरं वर्णनं अस्यां गाथायां द्रष्टुं शक्यते-

**तं गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष ।**
**सोऽनिश्रचान्नापि ययौ न तस्थौ तरस्तरङ्गेष्विव राजहंसः ।।**

संस्कृतभाषायां निबद्धं अवदान-साहित्यं विशालतमम् अस्ति। यथा पालिभाषायां जातककथाः सन्ति तथैव महायान-परम्परायां संस्कृते 'अवदान' साहित्यमस्ति। एतेषु दिव्यावदानादयः उल्लेखनीयाः सन्ति ये कथावाङ्मयस्य इतिहासस्य च दृष्ट्या महत्वपूर्णाः सन्ति। बौद्धसंस्कृत-ग्रन्थमालायाः दरभंगानगरात् प्रकाशितः वृहत्तरः संगठितः प्रयासः प्रो० पी० एल० वैद्यमहाभागस्य नेतृत्त्वेऽभवत् तत्पश्चात् काशीप्रसाद-जायसवाल-संस्थान पटनातः केचित् ग्रन्थाः प्रकाशिताः।

सन्ति, तेषु प्रो० अनन्तलाल ठाकुर महाभागस्य योगदानं महत्त्वपूर्णमस्ति बडौदाविश्वविद्यालयात् अपि महत्त्वपूर्ण-बौद्धसंस्कृत-ग्रन्थाः प्रकाशिताः महापण्डित-राहुलसांकृत्यायन-महाभागेन तिब्बततः आनीताः विशालाः पाण्डुलिपीनां वाङ्मयाः अद्य पटना-संग्रहालये सुरक्षिताः सन्ति। ये स्वोद्धारणार्थं अपरस्य राहुलसांकृत्यायनस्य जन्मनः प्रतीक्षां कुर्वन्ति। आसां पाण्डुलिपीनां सम्पादनं प्रकाशनकार्यं च अतीवाल्पमात्रायामभवत्। एतदर्थं भागीरथ-प्रयासोऽपेक्ष्यते यस्मात् अयं वाङ्मयः तिब्बती नेपाली आदि भाषातः देवनागरी लिप्यां लिप्यान्तरं भवेत् तर्हि संस्कृत-वाङ्मयस्य शोभा निश्चितरूपेण वृद्धिं करिष्यति। एवमेव गिलगिट स्थानात् (श्रीनगरस्य समीपात्) प्राप्ताः शताधिकाः पाण्डुलिपयः देशेषु विदेशेषु च पुनरुद्धारस्य प्रतीक्षां कुर्वन्ति। एवं वयं पश्यामः यत् विशालः संस्कृत-बौद्ध-वाङ्मयोऽद्यापि अप्रकाशितोऽस्ति। प्रकाशित-वाङ्मयस्य च राष्ट्रभाषायाम् अनुवादस्य आवश्यकता वर्तते।

## परिशिष्टम्

**Manuscripts Collections of Rahul Sankrityayana Preserved in Bihar Research Society-Patna (1930-1938)**

| S.No | Description of Negative films | Negative film No. F/P/V |
|---|---|---|
| 1 | Bhutadamara tantra | 22 |
| 2 | Chag lo bbarm | 6 |
| 3 | Kalacakratika | 11 |
| 4 | Kalacakratika | 10 |
| 5 | Kriyasamuccaya | 16 |
| 6 | Hetnbindntikn | 30 |
| 7a | Ashvaghosa | 2 |
| 7b | Hevajrasadhana | 57 |
| 8 | Title unknown | 8 |
| 9 | Suddhachar | 10 |
| 10 | Vinayasutra | 16 |
| 11 | Vinayasutratika | 5 |
| 12 | Abhidharmasamuccaya | 4 |
| 13 | Nyayabindu anutika | 24 |
| 14 | Abhidharmasamuccayatika | 11 |

| | | |
|---|---|---|
| 15a | Abhidharmapradipa | 16 |
| 15b | Tarkarahasya | 10 |
| 16 | do | 2 |
| 17 | Arthaviniscaya | 17 |
| 18 | do | 1 |
| 19 | Subhasitaratnam | 6 |
| 20 | Pancakramadi | 43 |
| 21 | Cakrasamvara | 1 |
| 22 | Darshan evam cakrasamvara | 3 |
| 23 | Darshan | 2 |
| 24 | Pratimoksa | 4 |
| 25 | Jnanasiddhi Madhyanta vibhaga | 3 |
| 26 | do | 1 |
| 27 | Sastikala Madhyanta Nyayasiddhi | 1 |
| 28 | do | 1 |
| 29 | Vartikalamkara | 82 |
| 30 | Simhala | 6 |
| 31 | Herukasadhan | 5 |
| 32 | Herukasadhan | 1 |
| 33 | Dhammapada | 4 |
| 34 | Jnanasrimitranibandhavali | 52 |
| 35 | Bodhisattvabhumi | 30 |
| 36 | Je Sutra | 9 |
| 37 | Vimsikavritti | 6 |
| 38 | Nyayasiddhi | 3 |
| 39 | Hetubindu anutika | 8 |
| 40 | Nir | 4 |
| 41 | Upasampadajnapti | 4 |
| 42 | Hevajratippani | 4 |
| 43 | Hevaj'ratika | 6 |
| 44 | Amarkosh | 4 |
| 45 | Amarkoshtika | 4 |
| 46 | do | 4 |
| 47 | Vajrasuchi | 4 |
| 48 | Picture and Manuscript | 57 |
| 49 | Shamanerakarikatika | 19 |

| | | |
|---|---|---|
| 50 | Mahayanottaratantra | 5 |
| 51 | Mahayanottaratantratika | 8 |
| 52 | Pramanavartikatika | 58 |
| 53 | Pramanavartikatika | 3 |
| 54 | Pramanavartika prajnalamkara | 2 |
| 55 | Prajnalamkara sarvajnasiddhi | 1 |
| 56 | Sarvajnasiddhi | 2 |
| 57 | Sarvajnasiddhi sahopalambha | 2 |
| 58 | Chandoratnam | 3 |
| 59 | Pratimoksasutra tika | 10 |
| 60 | Mahakalatantra evam tika | 16 |
| 61 | Mahakalacakra | 15 |
| 62 | Vinayasutravritti | 10 |
| 63 | Vinayakarika | 4 |
| 64 | Kalacakra | 24 |
| 65 | Saratama | 42 |
| 66 | Yogacarabhumi | 44 |
| 67 | Shravakabhumi | 31 |
| 68 | Hevajratika | 51 |
| 69 | Bhiksuprakirnaka | 71 |
| 70 | do | 11 |
| 71 | Ratnakirti Nibandhavali | 22 |
| 72 | Arthavidhi | 28 |
| 73 | Vadarahasya | 26 |
| 74 | do | 10 |
| 75 | Abhidharmakoshbhasya | 63 |

## आधार-ग्रन्थाः


१. बौद्धधर्म के विकास का इतिहास

२. सौन्दरनन्दनम्

३. बुद्धचरितम्

३. बौद्धधर्म-दर्शन

# बौद्धसंस्कृतवाङ्मयस्य परिचयः

संस्कृतभाषा प्राचीन-भारतीय-इतिहासस्य परम्परायाश्च महत्त्वपूर्णा भाषाऽस्ति। संस्कृतं कस्यचिद् एकस्य धर्मस्य जातेः वा भाषा नास्ति। सामान्यतया ब्राह्मणपरम्परायाः धर्मग्रन्थाः संस्कृतभाषायां, जैनानां प्राकृतभाषायां बौद्धानां वाङ्मयं च पालिभाषायां वर्तन्ते किन्तु शनैः शनैः बौद्धैरपि संस्कृतभाषा स्वीकृता, येषां विशालं वाङ्मयं वर्तते।

बौद्धानां पालिवाङ्मयमात्रं थेरवादस्य परम्परया सम्बद्धमस्ति। उत्तरकालिकेषु समस्तेषु बौद्धसम्प्रदायेषु संस्कृतभाषा प्रयुज्यते। बौद्धेषु सर्वप्रथमं सर्वास्तिवादीपरम्परया संस्कृतस्य प्रयोगः कृतः पश्चात् महायानीयानां विज्ञानवादस्य शून्यवादस्य च सकलन्यायपरम्परायाः आचार्यैः संस्कृतभाषा स्वीकृता। महायानीयानां वैपुल्यसूत्राणि संस्कृतभाषायां सन्ति।

बौद्धसंस्कृतवाङ्मयं अधोनिर्दिष्टक्रमेण विभक्तुं शक्यते-

१- सर्वास्तिवादी वाङ्मयम्- क- सौत्रान्तिकम् २- वैभाषिकम्

२- महायानी वाङ्मयम्- क- सूत्रग्रन्थः ख- शून्यवादी-वाङ्मयम्

ग- विज्ञानवादी वाङ्मयम् घ- अवदान-साहित्यम्

३- न्यायपरम्परा- क- न्यायग्रन्थः,

४-वज्रयानसाहित्यम्

**सर्वास्तिवादी वाङ्मयम्-** सर्वास्तिवादीनामागम-ग्रन्थाः संस्कृतभाषायां वर्तन्ते। पालिभाषायां त्रिपिटकस्य च संस्कृते रूपान्तरणमस्ति यथा-दीघागमः, मध्यमागमः, संयुक्तागमः, अंगुत्तरागमः। अंगुत्तरागमे धम्मपदम् उदानम्, सुत्तनिपातः, विमानवत्थुः बुद्धवंसश्च। विनयपिटके प्रातिमोक्षसूत्रम् सप्तधर्मः, अष्टधर्मः, क्षुद्रकपरिवर्तः,

एकोत्तरधर्मः, उपालि-परिपृच्छम्, भिक्षुणी-विनयः, कुशलपरिवर्तश्च। अन्ये ग्रन्थाः एवंविधाः सन्ति-

- आर्यकात्यायनीपुत्रविरचितम्- ज्ञानप्रस्थानशास्त्रम्।
- वसुमित्रस्य अध्यक्षतायाम्-५०० भिक्षूनां संगीतेः माध्यमेन रचिता 'विभाषा-टीका'।
- वसुबन्धुकृतः अभिधर्मकोशः।
- धर्मत्रातस्य उदानवर्गः, घोषकस्य अभिधर्मामृतम्।
- वसुमित्रस्य प्रकरणपादः, धर्मश्रीकृत अभिधर्मसारः।
- शारिपुत्रविरचितम् अभिधर्मसंगीतिपर्यायपादशास्त्रम्।
- मौद्गल्यायनविरचितम् अभिधर्मस्कन्धपादशास्त्रम्।
- स्थविरदेववर्माविरचितम् अभिधर्म-विज्ञानकाय-पादशास्त्रम्।
- कत्यायनीपुत्रविरचितम् अभिधर्म-प्रज्ञप्ति-पादशास्त्रम्।
- वसुमित्र विरचितम् अभिधर्मधातुकायपादशास्त्रम्-अभिधर्मप्रकरण-पादशास्त्रम् च।

दुर्भाग्यवशात् सर्वास्तिवाद-आगमः अद्य सम्यक्रूपेण नोपलभ्यते। अधिकांशतः तिब्बती-चीनीभाषायां च प्राप्यते। हरिवर्मामहाभागस्य सत्यसिद्धिशास्त्रमपि प्रकाशितं जातम्। श्रीलब्धस्य विभाषाशास्त्रम् अद्यावधि नोपलभ्यते। यशोमित्रेण लिखिता अभिधर्मकोशस्य टीका स्फुटार्था सौत्रान्तिकग्रन्थेषु महत्त्वपूर्णास्ति। अपि च, महासांघिक-लोकोत्तरवाद-एकव्यावहारिक, कौक्कुटिक-बहुश्रुतीय- प्रज्ञप्तिवाद-पूर्वशैलीय-अवरशैलीय- वैतुल्यक-वात्सीपुत्रीय-सम्मतीय-धर्मोत्तरीय-भद्रायणीय-षण्णागारिकादीनां साहित्यमस्ति परं अधिकांशः लुप्तः जातः।

**अवदानसाहित्यम्**-अत्र लोककथायाः माध्यमेन धार्मिकसिद्धान्ताः अभिव्यञ्ज्यन्ते। पालिपरम्परायां यद् स्थानं जातकस्यास्ति तद् स्थानं बौद्ध-संस्कृतसाहित्ये अवदान-साहित्यस्यास्ति। अवदान-साहित्ये सर्वप्रथमं अवदान-शतकमस्ति। दिव्यावदानमपि महत्त्वपूर्णं अस्ति, एवं च कल्पद्रुमावदानम्, अशोकावदानम्, द्वाविंशत्यवदानम्,

बोधिसत्त्वावदानम्, भद्रकल्पावदानम् विचित्रकर्णिकावदानम्, अवदानकल्पलता, इत्यादयः उल्लेखनीयाः सन्ति।

**दार्शनिक-साहित्यम्**-योगाचारस्य मूलतः त्रीणि सूत्राणि सन्ति- १-सन्धि-निर्मोचनम् २- लंकावतारः ३- घनव्यूहः।

मैत्रेयनाथः असंगश्च योगाचारस्य प्रतिष्ठापकौ आचार्यौ स्तः। मैत्रेयः योगाचारशास्त्रम्, महायानसूत्रालंकारम्, मध्यान्त विभंगशास्त्रम् इत्यादिग्रन्थान् तुषितलोके असगं उपदिष्टवान्, अतएव इमाः रचनाः असंगस्य गुरोः मैत्रेयस्य मन्यन्ते। तारानाथस्य बुदोनस्य च परम्परायारनुसारं मैत्रेयः असंगाय पञ्चाः ग्रन्थान् प्रदत्तवान् यथा-अभिसमयालंकारः, सूत्रालंकारः, मध्यान्त-विभंगः, धर्माधर्मविभंगः, महायानोत्तरतन्त्रम् च।

- आचार्यवसुबन्धुकृतम् - अभिधर्मकोशः, मध्यान्त - विभाग - सूत्रभाष्यम्, त्रिस्वभावनिर्देशः, विज्ञप्तिमात्रता-विंशतिका-त्रिंशिका, पंचस्कन्ध-प्रकरणम् व्याख्यामुक्तिः, कर्मसिद्धिप्रकरणम्, सद्धर्मपुण्डरीकोपदेशः, वज्रच्छेदिका, प्रज्ञापारमिताशास्त्रम्, शत्शास्त्रस्य व्याख्या च।
- आचार्यदिङ्नागकृतम् - (४४५ तः ५७५ पर्यन्तम्) अभिधर्मकोश- धर्मप्रदीपः, अष्टसाहस्रिकापिण्ड़ार्थः, त्रिकाल-परीक्षा, आलम्बन-परीक्षा, हेतुचक्रसमर्थनम्, न्यायमुखम्, प्रमाण-समुच्चयः इत्यादयः।
- ईश्वरसेनस्य शिष्यशंकरस्वामीकृतम्- हेतुविद्या, न्यायशास्त्रम्, न्यायप्रवेशतर्कशास्त्रम्।
- धर्मपालकृतम् (वसुबन्धोः शिष्यः)- आलम्बनप्रत्ययः, ध्यानशास्त्र- व्याख्या, विज्ञप्तिमात्रतासिद्धिव्याख्या, शतशास्त्रव्याख्या।
- धर्मकीर्तिकृतम् (सप्तमशताब्दी)- प्रमाणवार्तिकम् (स्ववृत्तिसहितम्) न्यायबिन्दुः, प्रमाणविनिश्चयः, संतानान्तरसिद्धिः, वादन्यायः, हेतुबिन्दुः, सम्बन्धपरीक्षा च।

एतेषां ग्रन्थानां देवेन्द्रबुद्धि-धर्मोत्तर-आनन्द-वर्धन-ज्ञानश्री-प्रज्ञाकर-गुप्तादीनां आचार्याणां टीकाः लिखिताः सन्ति।

- प्रज्ञाकरगुप्तकृतम्- (अष्टमशताब्दी)- प्रमाणवार्तिकालंकारः।
- विनीतदेवकृतम्-समयभेदोपरचना-चक्रम्, न्यायबिन्दुटीका, हेतुबिन्दुटीका, वादन्यायः, वादन्यायव्याख्या, सम्बन्धपरीक्षाटीका, आलम्बनपरीक्षाटीका, सन्तानान्तर-सिद्धि-टीका च।

यमारिकृतम्- (नवमशताब्दी)- प्रमाणवार्तिकालंकारटीका, जिनेन्द्रबुद्धेः प्रमाण-समुच्चयटीका।

- कल्याणरक्षितकृतम्- (अष्टम-नवम-शताब्दी)- अन्यापोहसिद्धिः, ईश्वर-भंगकारिका, श्रुतिपरीक्षाकारिका, बाह्यार्थसिद्धिकारिका च।
- रविगुप्तकृतम्- (अष्टमशताब्दी)-प्रमाणवार्तिकवृत्तिः।
- अर्चटकृतम् (अष्टमशताब्दी) हेतुबिन्दुटीका, क्षणभंगसिद्धिः, प्रमाणद्वैतसिद्धिः।
- शान्तभद्रकृतं वाङ्मयम्- (अष्टम शताब्दी)- न्यायबिन्दु टीका।
- दुर्वकमिश्रकृतम्- न्यायबिन्दुटीका।
- कर्णगोमिन्कृतम् (अष्टमशताब्द्याः प्रथमं चरणम्)- प्रमाणवार्तिकवृत्तिः।
- धर्मोत्तरकृतम्-प्रमाणपरीक्षा, अपोहप्रकरणम्, परलोकसिद्धिः, क्षणभङ्गसिद्धिः।
- हरिभद्रकृतम् (दशमशती) अभिसमयालंकारालोकः, प्रज्ञापारमिता टीका।

**शून्यवादः अथवा माध्यमिकं वाङ्मयम्**

- **नागार्जुनः**- नागार्जुनः शून्यवादमाध्यमिकवाङ्मयस्य प्रतिष्ठापकः आचार्योऽस्ति। अस्य विंशतिग्रन्थाः चीनीभाषायां अनूदिताः सन्ति। अस्य प्रमुखाः ग्रन्थाः सन्ति- माध्यमिक-कारिका, दशभूमिविभाषाशास्त्रम्, महाप्रज्ञापारमिताशास्त्रम्, उपायकौशल्यम्, प्रमाणविध्वंसनम्, विग्रहव्यावर्तनी, शून्यतासप्ततिः, चतुस्तवः, सुहृल्लेखः च।
- आर्यदेवकृतम् (नागार्जुनस्य शिष्यः) - माध्यमिकचतुःशतिका, माध्यमिक-हस्तबालप्रकरणम्, स्खलनप्रथमम्, युक्तिहेतुसिद्धिः, ज्ञानसारसमुच्चयः, चतुःशतकम्, चित्तविशुद्धिप्रकरणम्।
- चन्द्रकीर्तिकृतम्- (सप्तम शती)- प्रसन्नपदा, माध्यमिकावतारः चतुःशतकवृत्तिः।

- बुद्धपालितकृतमाध्यमिककारिका वृत्तिः।
- भव्यकृत- (षष्ठमशती) - महायान-करतल-रत्नशास्त्रम्, माध्यमिकहृदयकारिका, माध्यमार्थसंग्रहः, प्रज्ञाप्रदीपवृत्तिः च।
- ज्ञानगर्भकृतम्- सत्यद्वयम् सत्यद्वयविभंगं वा।
- अवलोकितकृत-प्रज्ञाप्रदीप टीका।
- शांतिदेवकृत-शिक्षासमुच्चयः, सूत्रसमुच्चयः, बोधिचर्यावतारः।
- प्रज्ञाकरमतिकृत- (सप्तम-अष्टम शताब्दी)- बोधिचर्यावतार-पंजिका।
- शान्तरक्षितकृत-तत्त्वसंग्रहः, प्रमुखमाध्यमिकालंकारवृत्तिः, वादन्यायवृत्तिः, हेतुचक्रम्, तत्त्वसिद्धिः।
- कमलशीलकृत- तत्त्वसंग्रह पंजिका, न्यायबिन्दुपूर्वपक्षसंक्षेपः, माध्यमिकालोकः, भावनाक्रमश्च।

**तांत्रिक-बौद्धवाङ्मयम् -**

वज्रयानस्य तांत्रिकग्रन्थाः चतुर्भागेषु विभक्ताः सन्ति। क्रियातन्त्रम्, चर्यातन्त्रम्, योगतन्त्रम्, अनुत्तरयोगतन्त्रम् च। कर्मप्रदीपः, अष्टमी व्रत-विधानम्, साधना-माला, साधन-चतुष्ट्यम्, तत्त्वरत्नावली, अद्वयवज्रसंग्रहः, सरहस्य कम्बलस्य च हेवज्रतन्त्रम् अनुत्तर-योगतन्त्रम् च।

- इन्द्रभूतिकृत ज्ञानसिद्धिः।
- पद्मवज्रकृत गुह्यसिद्धिः।
- सरहकृत - बुद्धकपोलतंत्रपंजिका, बुद्धकपालसाधनम्, बुद्धकपालमण्ड़लविधिः, त्रैलोक्यशंकरा, लोकेश्वरसाधनम्, दोहाकोशगीतिः, दोहाकोशनामचर्यागीतिः, काव्यकोशामृतवज्रगीतिः।
- नागार्जुनकृत-व्रतत‍ासिद्धसाधकः, एकजटासाधनम्। कालचक्रतन्त्रम्- विमलप्रभा टीका।

एषामतिरिक्तं सहस्राः ग्रन्थाः तिब्बती-चाइनीज-भाषयोः सुरक्षिताः सन्ति।

## शिक्षासमुच्चयादुद्धृतानि महायानसूत्राणामनुसूची

१. अक्षयमतिसूत्रम्, २. अङ्गुलिमालिकम्, ३. अध्याशयसंचोदनसूत्रम्, ४. अनन्तमुखनिर्हारधारणी, ५. अपूर्वसमुद्गतपरिवर्तः, ६. अपरराजाववादकसूत्रम् ७. अवलोकनासूत्रम्, ८. अवलोकितेश्वरविमोक्षः, ९. आकाशगर्भसूत्रम्, १०. आर्यसत्यकपरिवर्तः, ११. उग्रपरिपृच्छा, १२. उदयनवत्सराजपरिपृच्छा, १३. उपायकौशल्यसूत्रम्, १४. उपालिपरिपृच्छा, १५. कर्मावरणविशुद्धिसूत्रम्, १६. कामापवादक सूत्रम्, १७. काश्यपपरिवर्तः, १८. क्षितिगर्भसूत्रम्, १९. गगनगजसूत्रम्, २०. गण्डव्यूहः, २१. गोचरपरिशुद्धिसूत्रम्, २२. चतुर्धर्मकसूत्रम्, २३. चन्द्रप्रदीपसूत्रम्, २४. चन्द्रोत्तरदारिकापरिपृच्छा, २५. चुन्दाधारिणी, २६. जम्भलस्तोत्रम्, २७. ज्ञानवतीपरिवर्तः, २८. ज्ञानवैपुल्यसूत्रम्, २९. तथागतकोशसूत्रम्, ३०. तथागतगुह्यसूत्रम्, ३१. तथागतबिम्बपरिवर्तः, ३२. त्रिसमयराजम्, ३३. त्रिस्कन्धकम्, ३४. दशधर्मसूत्रम्, ३५. दशभूमिकसूत्रम्, ३६. दिव्यावदानम्, ३७. धर्मसंगीतिसूत्रम्, ३८. नारायणपरिपृच्छा, ३९. नियतानियतावतारमुद्रासूत्रम्, ४०. निर्वाणम्, ४१. पितापुत्रसमागमः, ४२. पुष्पकूटधारिणी, ४३. प्रज्ञापारमिता-'महती', ४४. प्रशान्तविनिश्चयप्रातिहार्यसूत्रम्, ४५. प्रातिमोक्षः, ४६. प्रव्रज्यान्तरायसूत्रम्, ४७. बृहत्सागरनागराजपरिपृच्छा, ४८. बोधिचर्यावतारः ४९. बोधिसत्त्वपटिकम्, ५०. बोधिसत्वप्रतिमोक्षः, ५१. बुद्धपरिपृच्छा, ५२. भगवती ५३. भद्रकल्पिकसूत्रम्, ५४. भद्रचरीप्रणिधानराजः, ५५. भिक्षुप्रकीर्णकम्, ५६. भैषज्यगुरुवैदूर्यप्रभसूत्रम्, ५७. मञ्जुश्रीबुद्धक्षेत्रम्, ५८. मञ्जुश्रीविकीडितसूत्रम्, ५९. महाकरुणापुण्डरीकसूत्रम्, ६०. महामेघः, ६१. महावस्तुः, ६२. मारीची, ६३. मालासिंहनादः, ६४. मैत्रीयविमोक्षः, ६५. रत्नकरण्डसूत्रम्, ६६. रत्नकूटः, ६७. रत्नचूडसूत्रम्, ६८. रत्नमेघः, ६९. रत्नराशिसूत्रम्, ७०. रत्नोल्काधारणी, ७१. राजाववादकसूत्रम्, ७२. राष्ट्रपालपरिपृच्छा, ७३. लंकावतारसूत्रम्, ७४. ललितविस्तरः, ७५. लोकनाथव्याकरणम्, ७६. लोकोत्तरपरिवर्तः, ७७. वज्रच्छेदिका, ७८. वज्रध्वजपरिणामना, ७९. वाचनायासिकाविमोक्षः, ८०. विद्याधरपिटकः, ८१. विमलकीर्तिनिर्देशः, ८२. वीरदत्तपरिपृच्छा, ८३. शालिस्तम्बसूत्रम्,

८४. शूरंगमसूत्रम्, ८५. श्रद्धावलाधानावतारमुद्रासूत्रम्, ८६. श्रावकविनयः, ८७. श्रीमालासिंहनादसूत्रम्, ८८. सद्धर्मपुण्डरीकम्, ८९. सद्धर्मस्मृत्युपस्थानम्, ९०. सप्तमैथुनसंयुक्तसूत्रम्, ९१. समाधिराजः (चन्द्रप्रदीपः), ९२. सर्वधर्मवैपुल्यसंग्रहसूत्रम्, ९३. सर्वधर्मप्रवृत्तिनिर्देशः, ९४. सर्ववज्रधरमन्त्रः, ९५. सागरमतिपरिपृच्छा, ९६. सिंहपरिपृच्छा, ९७. सुवर्णप्रभासोत्तमसूत्रम् [२]

**'महाव्युत्पत्तिः' ग्रन्थे उद्धृतानि सूत्राणां संख्या** –महाव्युत्पत्तिग्रन्थे पञ्चाधिकशतानां सूत्राणां सङ्कीर्तनं विद्यते तेषु अधिकांशरूपेण महायान सम्बद्धाणि सन्ति, परं महायानसाहित्यस्य वैपुल्यं चीनीभाषायाः तिब्बतीभाषायाश्च त्रिपिटकग्रन्थैः चीनीयात्रीणां तिब्बतप्रदेशीयानां यात्रीणां विवरणग्रन्थैः इतिहासविदाम् ग्रन्थैश्च विज्ञायते।

महाव्युत्पत्तिः इत्यस्य अनुसूचौ त्रिपिटकम् सूत्रम्, अभिधर्मो विनय-श्चेत्यादीनाम् नामानि हीनयानस्य साहित्यमेव द्योतयति। अनेनैव कारणेन हीनयानग्रन्थान् विहाय सूचावस्मिन् अधोलिखितानां ग्रन्थानां परिचयोऽत्र स्थाप्येत। तद्यथा- १. शतसाहस्त्रिकाप्रज्ञापारमिता, २. अष्टसाहस्रिका प्रज्ञापारमिता, ३. सप्तशतिकाप्रज्ञापारमिता, ४. पंचविंशतिकाप्रज्ञापारमिता, ५. त्रिंशतिका प्रज्ञापारमिता, ६. अवतंसकः, ७. बोधिसत्त्वपिटकम्, ८. ललितविस्तरः, ९. समाधिराजः, १०. पितापुत्रसमागमः, ११. लोकोत्तरपरिवर्तनम्, १२. सद्धर्मपुण्डरीकम्, १३. गगनगजः, १४. रत्नमेघः, १५. लङ्कावतारः, १६. सवर्णप्रभासः, १७. विमलकीर्तिनिर्देशः, १८. गण्डव्यूहः, १९. घनव्यूहः, २०. आकाशगर्भः, २१. अक्षयमतिनिर्देशः, २२. उपायकौशल्यः, २३. धर्मसंगीतिः, २४. सुविक्रान्तविक्रमी, २५. महाकरुणापुण्डरीकम्, २६. रत्नकेतुः, २७. दशभूमिकम्, २८. तथागतमहाकरुणानिर्देशः २९. दुमन्निरराजपरिपृच्छा, ३०. सूर्यगर्भः, ३१. बुद्धिभूमिः, ३२. तथागतचिन्त्यगुह्यनिर्देशः, ३३. शूरङ्गमसमाधिनिर्देशः, ३४. सागरनागराजपरिपृच्छा, ३५. अजातशत्रुः, ३६. कौकृत्यविनोदम्, ३७. सन्धिनिर्मोचनम्, ३८. सङ्गीतिः, ३९. राष्ट्रपालपरिपृच्छा, ४०. सर्वधर्मप्रवृत्तिनिर्देशः, ४१. रत्नचूडपरिपृच्छा, ४२. रत्नकूटम्, ४३. महायानप्रासादप्रभावनम्, ४४. महायानोपदेशः,

४५. आर्यब्रह्मविशेषचिन्तापरिपृच्छा, ४६. परमार्थसंवृत्तिसत्यनिर्देशः, ४७. मंजुश्रीविहारः ४८. महापरिनिर्वाणवैवर्तचक्रम्, ४६. कर्मविभंग, ५०. रत्नालोकः, ५१. गोचरपरिशुद्धिः, ५२. प्रशान्तबिनिश्चयप्रातिहार्यनिर्देशः, ५३. तथागतोत्पत्तिसम्भवनिर्देशः, ५४.भवसङ्क्रान्तिः, ५५. परमार्थधर्मविजयः, ५६. मंजुश्रीबुद्धक्षेत्रगण्डव्यूहः, ५७. बोधिपक्षनिर्देशः, ५८. कर्मावरणप्रतिप्रस्त्रब्धिः, ५६. त्रिस्कन्धकम्, ६०. सर्ववैदल्यसंग्रहः, ६१. संघाटसूत्रम्, ६२. तथागतज्ञानमुद्रासमाधिः, ६३. वज्रमेरूशिखरकूटागारधारणी, ६४. अनवतप्तनागराजपरिपृच्छा, ६५. सर्वबुद्धविषयावतारज्ञानालोकालंकारः, ६६. व्यासपरिपृच्छा, ६७. सुबाहुपरिपृच्छा, ६८. सिंहपरिपृच्छा, ६६. महासाहस्रप्रमर्दनम्, ७०. उग्रपरिपृच्छा, ७१. श्रद्धावलाधानम्, ७२. अङ्गुलीमालीयम्, ७३. हस्तिकक्ष्यः, ७४. अक्षयमतिपरिपृच्छा, ७५. महास्मृत्युपस्थानम्, ७६. शालिस्तम्भः, ७७. मैत्रीव्याकरणम्, ७८. भैषज्यगुरुवेदूर्यप्रभः, ७६. अर्थविनिश्चयः, ८०. महाबलसूत्रम्, ८१. वीरदत्तगृहपतिपरिपृच्छा, ८२. रत्नकरंडकः, ८३. विकुर्वाणराजपरिपृच्छा, ८४. ध्वजाग्रकेयूरश्च।

एतेषु नवमुख्याः ग्रन्थाः विशेषेण पूज्याः मन्यन्ते। एते 'वैपुल्यसूत्रम्' इत्युच्यन्ते।[३] तद्यथा-

१. अष्टसाहस्त्रिकाप्रज्ञापारमिता, २. सद्धर्मपुण्डरीकम्, ३. ललितविस्तरः, ४. लङ्कावतारः, ५. सुवर्णप्रभासः, ६. गण्डव्यूहः, ७. तथागतगुह्यकः, ८. समाधिराजः, ६. दशभूमीश्वरश्चेति।

अन्येऽपि 'सुखावती' इत्यादिग्रन्थाः विशेषेणोल्लेखनीयाः सन्ति महायानग्रन्थेषु।

**नञ्जियो इत्यनेन संग्रहीतानि चीनीत्रिपिटिकसूत्राणि**- प्रख्यातेन चीनप्रदेशीयेन विदुषा 'नञ्जियो' इति नामधेयेन सङ्ग्रहीताः चीनीत्रिपिटकग्रन्थाः सूत्रपिटकग्रन्थाः सूत्रकाण्डश्च प्राप्यते। एतेषु ग्रन्थेषु एकपंचाशदधिकपंचशत (५४१) सूत्राणामुल्लेखोपलभ्यते। सूत्राण्येतानि पुनश्चतुर्धा विभज्यन्ते। तद्यथा-

१. पन्-जो अथवा प्रज्ञापारमिता, २. पओ-चि अथवा रत्नकूटम्, ३. ता-चि अथवा महासन्निपातः, ४. ह्वा-येन अथवा अवतंसकः, ५. न्येपन् अथवा परिनिर्वाणम्, ६. बु-ता-पु-वाई-चुं-ई-चिं अथवा एतेभ्यः पंचवर्गेभ्यः इतराणि अनूदितसूत्राणि, ७. तन्-इ-चि अथवा अन्यानि संकलानूदितानि सूत्राणि।

नञ्जियोनामकेन सूचेरुल्लिखिते विनयपिटके उल्लिखितः महायानग्रन्थः 'ब्रह्मजालसूत्रम्' इति विशेषेण महत्त्वं वर्तते। एतस्य ग्रन्थस्य सम्बन्धः दीघनिकायग्रन्थस्य ब्रह्मजालेन नास्ति। वस्तुतस्तु चीनीब्रह्मजालसूत्रम् महायानस्य विनय एव वर्तते।

नञ्जियो इत्यस्यानुसूचौ अभिधर्मपिटकस्यान्तर्गतेषु महायानग्रन्थेषु नागार्जुनेन असङ्गेन च विरचिताः ग्रन्थाः सन्ति। प्रज्ञापारमिता, रत्नकूटम् अवतंसकः परिनिर्वाणमेति उभयोः उपलभ्येते, परं तिब्बतीसंग्रहे चीनी संग्रहापेक्षया न्यूनानि वर्तन्ते सूत्राणि, तत्र तन्त्राणां साहित्येन च व्याख्याग्रन्थाः भूयशः प्राप्यन्ते।

**भगवतः बुद्धस्य जीवनेन सम्बन्धितं बौद्धवाङ्मयम्**-प्राचीनबौद्धलेखकेभ्यः संकलन-कर्तृभ्यश्च बुद्धस्य जीवनं सर्वदा आकर्षणस्य विषयोऽस्ति। भगवतः बुद्धस्य जीवनवृत्तानि एवं उपलभ्यन्ते-

१- महासांघिकानां (लोकोत्तरवादीनां) महावस्तुः

२- मिश्रितसंस्कृते रचितानां सर्वास्तिवादीनां ललितविस्तरः

३- शुद्धसंस्कृते चमत्कारिक-काव्यशैल्यां लिखितस्य अश्वघोषस्य बुद्धचरितम्

४- जातकानां भूमिकायाः रूपेण पालिभाषायां लिखिता निदानकथा

५- धर्मगुप्तस्य अभिनिष्क्रमण-सूत्रम् यत् सम्भवतया सूत्ररूपेण मिश्रितसंस्कृतेऽऽसीत्, अधुना यस्य चीनी-अनुवादः प्राप्यते। 'रोमांटिक लिजेंड ऑफ दी शाक्य बुद्ध' अनेन शीर्षकेन बालमहोदयेन आंग्लरूपान्तरणं कृतम्- (१८७५)

एतेषामतिरिक्तं बुद्धस्य जीवनस्य अन्यान्य-घटनानां वर्णनमपि पालि-संस्कृतयोः 'विनये' 'निकायेषु' च प्राप्यते। उदाहरणार्थं 'महापदानसुत्तं पूर्वबुद्धानां, विशेषतः गौतमबुद्धस्यानुरूपस्य ज्ञायकस्य 'विपस्सी' इत्यस्य जीवनेन सम्बद्धः भवति। 'अरिय-परियेसन-सुत्तं बोधिसत्त्वस्य गृहत्यागात् तेषां प्रथमधर्मोपदेशपर्यन्तं घटनां वर्णयति। महापरिनिब्बाण-सुत्तं बुद्धदेवस्य अन्तिमयात्रायाः, दहनक्रियायाः तेषां च भौतिक-अवशेषानां विभाजनस्य पूर्णविवरणं ददाति। एवंविधं सुत्तनिपातस्य, अवदानस्य, महावंसस्य च खण्डेष्वपि भगवतः बुद्धस्य जीवनं संक्षेपेण कथ्यते।

परवर्तिकालस्य एका पालिकाव्य-रचना महाबोधिवंसरुपलभ्यते। अत्र तेषां चतुर्विंशतिबुद्धानां विषये गाथाः कथ्यन्ते। पञ्चचत्वारिंशतवर्षेभ्य अधिककालपर्यन्तं कृतस्य भगवतः बुद्धस्य धर्मप्रचारस्य कार्याणां यथार्थं चित्रणं जातक-कथानां भूमिका-भागेषु पञ्चनिकायेषु विनयपिटकस्य च सुत्तेषु द्रष्टुं प्राप्यते।

भगवतः बुद्धस्य पञ्चजीवनवृत्तेषु सर्वाधिकं व्यवस्थितं अस्ति ललितविस्तरम्। तस्य गम्भीर-ध्वन्यात्मकगाथाः हार्दिकभावेन प्रस्तूयन्ते। यद्यपि ललितविस्तरे कश्चित् वर्णनात्मकः-गद्यांशः पद्यांशश्च अस्वाभाविकः प्रतीयते तथापि एवं मंन्यते यत् ते अंशाः महापुरुषं प्रति श्रद्धा-भक्ति-प्रस्तुतौ सफलाः सन्ति। 'ललितविस्तरस्योपरान्तं 'महावस्तुः' अवगम्यते, यस्मिन् भिन्न-भिन्नपरम्परानुसारं भगवतः बुद्धस्य जीवनस्य घटनाः कथ्यन्ते किन्तु अत्र घटनानां क्रमबद्धता नास्ति। शैली पुरातनाऽस्ति, तथापि इदमस्य महत्त्वमस्ति यत् अत्र भगवतः बुद्धस्य जीवनस्य घटनाः तस्य पूर्वजन्मनः कथां आधृत्य प्रस्तूयते। पूर्वजन्मना सम्बन्धस्य एषा प्रथा प्राचीनलेखकेषु साधारणतः प्रचलिताऽऽसीत्। निकायः विनयः अपि च मूलसर्वास्तिवादीनां विनयमपि अनेन प्रभावेण प्रभावितमस्ति। अभिनिष्क्रमणसूत्रस्य सम्बन्धे कोऽपि विचारः सरलः नास्ति यतोहि तस्य मूलग्रन्थोऽप्राप्योऽस्ति। बीलमहोदयेन तस्य यत् संक्षिप्तं आंग्ल-रूपान्तरणं कृतम्, तेन इयतं कथितुं शक्यते यत् तस्य स्थानं महावस्तो अपेक्षया ललितविस्तरस्य समीपे भवितव्यम्। महावस्तुसदृशं अभिनिष्क्रमणसूत्रं प्रारभ्यते। ललितविस्तरस्य अनुकरणे अन्ते च धर्मप्रचारस्य दिवसानां बुद्धदेवस्य

विशिष्टकार्याणि जातककथाभिः परिपुष्यन्ते। पालिभाषायां रचितायां निदानकथायां तेषां चतुर्बुद्धानां विस्तृतं विवरणं प्रस्तूयते, येषां जीवनकाले बोधिसत्त्वः भिन्न-भिन्नरूपं धृत्वा जन्म अलभत् बुद्धत्वं च प्राप्तुम् आवश्यकीं योग्यताम् अर्जितवान्। महावस्तुसदृशं अत्रापि जातककथानामुल्लेखः प्राप्यते परन्तु कथाः विस्तरेण न प्रस्तूयन्ते।

जीवनवृत्तेषु 'बुद्धचरितम्' विशिष्टमस्ति। भगवतः बुद्धस्य जीवनस्य प्रसिद्धघटनाः अत्र प्राप्यन्ते। काव्यस्य कथा प्रथमसंगीतेः अधिवेशनपर्यन्तं प्रचलति। पालिपरम्परानुरूपं चात्र गौतमबुद्धः एतादृशस्य मानवस्य सदृशं चित्रितमस्ति यः व्यतीत-जन्मनः संचितपुण्यात् पूर्णत्वं प्राप्तवान्। काव्यदृष्ट्या बुद्धचरितं बौद्धसाहित्येऽद्वितीयमस्ति। विंशतिशताब्द्यां डॉ. भरतसिंह उपाध्यायमहोदयेन पालिभाषायां महाबुद्धवत्थु विरचितः, दिल्ली संस्कृत अकादम्या १९९२ खीष्टाब्दे प्रकाशिता महत्त्वपूर्णा रचना अस्ति।

## आधारग्रन्थाः


१. बौद्धसंस्कृतकाव्यसमीक्षा-डॉ. रामायणप्रसाद द्विवेदी

२. बौद्धसंस्कृति का इतिहास-डॉ० भागचन्द्र जैन

३. बौद्धधर्मदर्शन-आचार्य नरेन्द्रदेव

४. बौद्धदर्शनमीमांसा-आचार्यबलदेव उपाध्याय

५. बौद्धधर्म के विकास का इतिहास-डॉ. गोविन्द्र चन्द्र पाण्डेय

६. भारत में बौद्ध निकायों का इतिहास-श्रीनारायण श्रीवास्तव

७. लिटरेचरी हिस्ट्री आफ संस्कृत बुद्धिज्म-नारीमन

८. ए हिस्ट्री आफ इण्ड़ियन लिट्रेचर भाग २- विण्टरनित्ज,

९. गोमती-संस्कृत भाषा में निबद्ध बौद्धवाङ्मय

- डॉ. विजय कुमार जैन, पृ. ४८-५२, केन्द्रीय संस्कृत विद्यापीठ लखनऊ-१९९७

# बौद्ध-मिश्रसंस्कृतस्य वैशिष्ट्यम्

बौद्धधर्मस्य आगमग्रन्थाः पालि-प्राकृत-संस्कृतादिभाषासु प्राप्यन्ते। भगवता बुद्धेन भिक्षवः आदिष्टाः यत् ते भगवद्वचनानि स्व-स्वभाषासु धारयेयुः। अस्य आदेशस्यानुसारमेव उत्तरभारतस्य कासुचित् प्रादेशिकभाषासु अपि बुद्धवचनानि उपनिबद्धानि सन्ति। एतासु एका प्रादेशिकभाषा मागधी-पालिभाषा आसीत्, अस्यां भाषायां त्रिपिटकं लिख्यते स्म यत् लंका-बर्मा आदि देशेषु मान्याः अभवन्। एका अपरा प्रादेशिकभाषा, बौद्धसङ्करसंस्कृतस्याधारोऽस्ति। संस्कृतस्य चतुर्दिक् प्रतिष्ठायाः कारणात् क्रमशः अस्माकम् उपरि संस्कृतस्य प्रभावः परिलक्ष्यते। प्रारम्भे तु अयं प्रभावः आंशिक-रूपेण आसीत् यद्यपि अयं प्रभावः प्रतिदिनं वर्धते तथापि पूर्णरूपेण संस्कृतस्य प्रभावः अस्योपरि न दृश्यते। प्राकृत-शब्दानां प्रयोगः निरन्तरं भवति, कैश्चिद्भिः एतादृशाः शब्दाः प्रयुक्ताः अभवन् ये न तु शुद्धसंस्कृतस्य आसन् न च प्राकृतस्य। शब्दकोशः अधिकांशतः प्राकृतस्येव आसीत्। एषु सहस्रशाः शब्दाः ईदृशाः सन्ति ये संस्कृते प्रयुक्ताः न भवन्ति यदि च भवन्ति तर्हि विभिन्नेषु अर्थेषु।

एषा स्वतन्त्रा भाषा, यस्य विस्तारः उत्तरभारते अधिकमात्रायाम् अभवत् 'बौद्धसङ्करसंस्कृतम्' इति कथ्यते।[१]

ललितविस्तरस्य, महावस्तु इत्येतयोः च ग्रन्थभाषा शुद्धसंस्कृतम् नास्ति। एषा गाथासंस्कृतम् मिश्रसंस्कृतम् बौद्धसंस्कृतं वेत्युच्यते। एषा खीष्टाब्दात्पूर्ववर्तिनी भाषा। पाण्डुलिपीनां प्रतिलिपिषु पक्षपातो दृश्यत एव। अत्र शब्दानां वर्णनेषु संस्कृतभाषायाः प्रभावो स्पष्टतः दरीदृश्यते। तदानीं संस्कृतस्य महत्याः प्रतिष्ठायाः सूचको वर्तत एषः प्रभावः। ललितविस्तरे अनेके विशुद्धाः संस्कृतशब्दरूपा अपि प्रयुक्ताः वर्तन्ते केचन तु आंशिकरूपेण परिशुद्धा एव। ग्रन्थस्यास्य शब्दभण्डारो मध्यदेशीय एव। केचन शब्दाः संस्कृतभाषायाः वर्तन्ते परं तस्य अभीष्टार्थस्तु

संस्कृतार्थात् भिन्नः वर्तते। यतो हि संस्कृतभाषायां एतेषां शब्दानां प्रयोगो नास्ति प्रचलितः प्रयुक्तश्चेदिभन्नार्थे एव कृतो वर्तते।

काले ह्युपगते संस्कृतभाषायाः प्रभावः वृद्धिं प्राप्तः। मध्यदेशीयशब्दानां प्रचलनमल्पतामुपगतम् संस्कृतपदानां प्रयोगो श्रेयस्करः परिगणितः। मध्यदेशीयपदानाम् अशुद्धयः भूत्वा तेषां संस्कृतीकरणमासीत् प्रचलितम्। एतेन मध्यदेशीयभाषायाम् स्वरूपं विनष्टतां प्राप्तम्।

एषा भाषा मूलतः मध्यदेशस्य ईसा-पूर्वस्य काचित् पुरातनी वार्तालापस्य, अपि च तस्याम् आश्रिता भाषाऽऽसीत्, संस्कृतं कदापि न, किन्तु आरम्भादेव हस्तलिखित-लिपिषु संस्कृतं प्रति नम्रभावः परिलक्ष्यते। वर्णविन्यासे (Spelling) तु अस्माभिः स्पष्टतः संस्कृतस्य प्रभावः दृश्यते। एषु ग्रन्थेषु त्रिविधाः शब्दाः प्राप्यन्ते-केचन शब्दाः शुद्धसंस्कृतस्य सन्ति। केचन आंशिकरूपेण संस्कृतस्य सन्ति केचनस्तु स्वकीये शुद्धे मध्यदेशीय रूपे एव सन्ति। एषां ग्रन्थानां शब्दभण्डारः (Vocubulary) मध्यदेशीय रूपे एव परिलक्ष्यते। ये शब्दाः संस्कृतस्येव सन्ति संस्कृते वा तेषां भिन्नार्थः अस्ति। यत्र-तत्र एषां वर्णरचनायां (Spelling) संस्कृतस्य प्रभावः परिलक्ष्यते, तत्रापि तेषां मूलरूपं प्रकटयति, यतः तत्र एषां प्रयोगः नाभूत् यदि च अभवत् तर्हि अपरस्मिन्नेव अर्थे।

समयेन सह संस्कृतस्य प्रभावोऽपि अस्यां भाषायां वर्धते। लेखकैः सम्पादकैः शुद्धमध्यदेशीयशब्दानां बहिष्कारं कृत्वा तेषां स्थाने शुद्धसंस्कृतशब्दानां व्यवहारस्य परम्परा प्रारब्धास्ति। अधिकांशतः शब्दरूपाणि धातुरूपाणि च संस्कृतरूपे प्राप्यते। गद्यभागस्य भाषा शुद्धसंस्कृतं प्रतीयते परन्तु यदि ध्यानपूर्वकं विचारयामः तर्हि गद्यभागेऽपि यत्र-तत्र असंस्कृताः शब्दाः प्राप्यन्ते। पद्यभागस्य अपेक्षया गद्यम् अत्यधिकं संस्कृतं रूपं परिदर्शयति। पद्यभागस्य शब्दानां परिवर्तनं कटुतरं भवति यतः शब्दानां मात्रादीनामपि ध्यानं अपेक्ष्यते अन्यथा तु छन्दोभङ्गस्य सम्भावना भवति।

अस्याः भाषायाः कयाचित् परिचित-मध्यदेशीय-प्रादेशिकभाषया सह सम्मेलनं नोचितम्। इमां नैकैः विद्वद्भिः विभिन्नैः प्राकृतैः सह सम्मेलनस्य अनेकाः यत्नाः क्रियन्ते, किन्तु परीक्षणे ये सर्वे निराधाराः भ्रामकाः च सिध्यन्ते

स्म, किन्तु निश्चितरूपेण एवं कथनं न समीचीनं यत् एषा भाषा कस्य प्रदेशस्य भाषाऽऽसीत्, तथापि अस्याः भाषायाः काश्चन विशेषताः सन्ति।[६]

याः अन्यासु भाषासु न प्राप्यन्ते। कैश्चित् विद्वद्भिः एवं विचार्यते यत् एषा भाषा अर्द्धमागधी अस्ति किन्तु इदं सम्यक् न। केषुचित् कथनेषु सादृश्यत्वात् एषः भ्रमः अभवत् किन्तु परीक्षणोपरान्तम् एव ज्ञातम् यत् सादृश्यस्यापेक्षया विभिन्नता अधिकाऽस्ति इति।

अद्यापि लंकादेशे पालिभाषायाः अभ्यासी बौद्धभिक्षुः यदा संस्कृतं लिखति वदति वा तदा सः प्रायः 'अस्माकम्' इत्यस्य स्थाने **'अम्हाकं'** 'युष्माकं' इत्यस्य स्थाने **'तुम्हाकं'** इत्यस्य प्रयोगः करोति एवमेव सद्धर्मपुण्ड़रीके शुद्धसंस्कृतस्य प्रवाहे मध्ये-मध्ये पालिभाषायाः शब्दाः प्राप्यन्ते। अनेन इदं ज्ञायते यत् सद्धर्मपुण्ड़रीकस्य प्रणेता पालिभाषायाः श्रेष्ठः अभ्यासी आसीत् इति।

उत्तरभारतीयबौद्धग्रन्थेषु 'मिश्रितसंस्कृतस्य पालित्रिपिटकानां च शब्दानां प्रभूतप्रयोगस्य कारणमपि स्पष्टमेव प्रतीयते। सर्वास्तिवादी बौद्धाः खीष्टाब्दपूर्वात् एव पालि-त्रिपिटकानां संस्कृते रूपान्तरणमारब्धवन्तः। ये भिक्षवः पालिभाषया सह संस्कृतस्यापि पूर्णज्ञातारः आसन्। रूपान्तरणस्य क्रमे ये भिक्षवः पालिभाषायाः त्रिपिटकानां च शब्दावल्या प्रभाविताः अभवन्। अस्य परिणामोऽयं अभवत् यत् महायान-ग्रन्थानां शुद्धसंस्कृते रचनासमयेऽपि ते पालिशब्दानां त्रिपिटकानां शब्दावल्याः भाषायाश्च प्रभावेन स्वसंस्कृतस्य ग्रन्थान् अपि पूर्णतः मुक्ताः कर्तुं न शक्तवन्तः, यस्य परिणामस्वरूपं अस्य महायानग्रन्थस्य भाषा शुद्ध संस्कृतं न भूत्वा पालिभाषया प्राकृतभाषया च प्रभाविता अस्ति। एषा भाषा एव मिश्रितसंस्कृतस्य रूपेण महायान-ग्रन्थेषु उपलभ्यते। पालिभाषायाः तु अत्यधिकः प्रभावः वर्तते तस्याः सम्पूर्णवाक्यानि एव संस्कृते रूपान्तरितानि सन्ति। एषां सन्दर्भानां तुलनया इदं सुस्पष्टं भवति यथा-

**सद्धर्मपुण्डरीकम्-** "स धर्मं देशयति स्म। आदि कल्याणं मध्य-कल्याणं पर्यवसाने कल्याणं सार्थं सुव्यंजनं केवलं परिपूर्णं पर्यवदातं ब्रह्मचर्यं सम्प्रकाशयति स्म।"

**दीघ०**–"सो धम्मं देसेति आदिकल्याणं मज्झे कल्याणं परियोसानकल्याणं सत्थं सव्यंजनं केवलपरिपुण्णं परिसुद्धं ब्रह्मचरियं पकासेति।"

**सद्धर्म०**– "बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां मनुष्यानां च।"

**विनय०**– "बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय अत्थाय हिताय सुखायदेवमनुस्सानं।"

**सद्धर्म०**– "विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धो भगवान्।"

· **दीघ**– "विज्जाचरणसम्पन्नो सुगतो लोकविदु अनुत्तरो पुरिसदम्मसारथिः सत्था देवमनुस्सानं बुद्धो भगवा।"

पालि-शब्दानां संस्कृतछायाकरणे यदा-कदा अशुद्धय अपि वर्तन्ते यथा-

- 'औदविल्यप्राप्ताः'- इदं स्पष्टतः पालि - 'उप्पिलावितत्ता' इत्यस्य संस्कृतीकरणमस्ति, किन्तु अस्य सम्यक्रूपम् 'उत्प्लावितात्मानः' भवितव्यम्। (सद्धर्मपुण्डरीकम्, पृ. ५)
- चेतः परिवितर्कमाज्ञाय'-अत्र अस्मिन् अर्थे 'आज्ञाय' रूपस्य प्रयोगः व्यावहारिके संस्कृते न भवति। इदं पालिच्छाय-संस्कृतमस्ति। (तदेव पृ ७)
- 'मञ्जुशिरी'- 'श्री' इत्यस्य स्थाने 'शि (सि) री' इति पालिभाषायाः रूपमस्ति। (तदेव पृ. ७)
- 'ऊर्णाय कोशात्' संस्कृतेऽत्र ऊर्णायाः इति भवितव्यम्। प्रस्तुतं रूपं स्पष्टतः पालिभाषायाः 'उण्णाय' इत्यस्य छायाऽस्ति। (तदेव पृ. ७)
- गाथा ४- अत्र 'भोक्ति' शब्दः पालिशब्दस्य 'होन्ति' इत्यस्य छाया कृता।
- गाथा ६- अत्र 'दृश्यन्ति'-शब्दोऽयं पालिशब्द 'दिस्सन्ति' इत्यस्य संस्कृत-छायाऽस्ति। संस्कृते तु 'दृश्यन्ते' अयं प्रयोगः सम्भाव्यते।
- अदृशि- अयं पालिशब्दः 'अदस्सि' इत्येन रूपान्तरितोऽस्ति। संस्कृते तु 'अदर्शत्' अयं प्रयोगः सम्भाव्यते।

● गाथा ६- अत्र 'प्रकाशेन्ति' इति पालिभाषायाः 'पकासेन्ति' इत्यस्य छायाऽस्ति। संस्कृते तु 'प्रकाशयन्ति' अयं प्रयोगः सम्भाव्यते।

● 'भिक्षवोति'- 'अत्र भिक्षवः +इति' अस्य सन्धेः इदं रूपं संस्कृते न भवति। इदं पालिभाषायाः छायाऽस्ति। (सद्धर्मपुण्डरीकसूत्रम् पृ. ६)

● गाथा ११-अत्र 'कुर्विषु' इदं 'कुब्बिंस' इत्यस्य पालिच्छायं संस्कृतभाषीकरणमस्ति।

● 'तेषां पि' अत्र 'अपि' इत्यस्य मात्रं 'पि' इति रूपं संस्कृते न भवति। इदं पालिभाषायाः साधारणं रूपमस्ति। (तदेव पृ. ६)

● गाथा १३- अत्र 'गग्वालुकाः'- अयं शब्दः पालिभाषायामेव भवति संस्कृते न। अयं संस्कृतभासः विकृतप्रयोगश्चास्ति। संस्कृते 'गाबालुकाः' एषः प्रयोगः भवति।

● गाथा १४-अत्र 'शंख शिलाप्रवाडं'- अत्र 'प्रवाडं' पालिभाषाया रूपमस्ति। संस्कृते 'प्रवालं' एवं रूपं भविष्यति।

एतादृशैः उदाहरणैः ग्रन्थोऽयं सम्पूरितोऽस्ति। अनेन इदं सिध्यति यत् महायानस्य ग्रन्थः हीनयानिनः पालिभाषायां प्रबलप्रभावेन लिख्यते।

एर्जटनमहाभागेन बौद्धमिश्रसंस्कृतस्य सप्ताः प्रधानाः विशेषताः प्रतिपादिताः सन्ति यथा-

(a) "Buddhist Hybrid Sanskrit traditions, as a whole, starts from or goes back to, an early Buddhist canon, or quasi-canon, which was compulsed not in Sanskrit but in a Middle-Indic vernacular which very probably already contained dialect mexture."

(b) "Some parts of this old canon, or passages from it, are preserved in BHS, sometimes in more than one form. wherever recorded, are always close to the original on which they are based than corresponding standard Sankrit features, wherever recorded."

(c) "The verser of BHS texts of my classed 1 and 2, as presented in our mss., are on the whole semi-Middle-Indic or hybridized. This means that they represent the BHS Traditions in its purest form in texts of class 2, the accompanying prose parts of these texts are nearly sanskritized in Phonology and morphology according to the mss. In vocabulary the prose is just as Middle-Indic as the verses."

(d) "In all BHS works, as presented in our mss. and edition, there are very many forms, which ae standard Sanskrit. These include

many forms which cannot possibly have exited, at any time, in any Middle-Indic dialect. They represent alterations in the traditons, later in time than the original Middle India canon, at least. As time went on, the tendency was in general towards ever increasing sanskritization. Yet the BHS tradition continued to liue, apparentily for centuries, as a religious language among the buddhists or at least some Buddhists of North India. The hall-mark which distinguishes it is the vocabulary, which contains not only technical religious terms, but quantities of pure secular words, which never occur in standard Sanskrit, Very rarely can and serious doubt arise as to whether a particular work should be classed as BHS. When if its grammar is virtually Sanskrit or entirely so, its vocabulary will decide."

(e) "There is clear evidence that so these Sanskrit words and forms are substituted for older, non-Sanskrit ones, by later copyists or redactors of the individual work containing them, in other words that some much works were originally more Middle-Indic than is indicated by some, or evenall, of the mss. in which they are preserved to us. In SP for example, one recension Sanskritizes some words, another recension others: the original text of SP must have been less Sanskritic than either."

(f) "There is, further, evidence, that in citing or incorporating older materials, and BHS text may be expected to have introduced some Sanskritization of originally Middle-Indic features.

(g) "It however ceratin that some Sanskrit-appearing features are ortho-graphic only, the words were pronounced as in Middle-Indic. This is proved by the metrical structure of the verses of BHS texts of classes 1 and 2. How old this misleading sanskritic spelling is, we have no way of telling; it appears very commonly, the not invariably, in the mss. of all the percified texts. That the same was true of the same or similar features in the accompanying prose, at least in earlier times, seems a reasonable guess: naturally there can be no direct proff that the prose was pronounced otherwise than as written." - Buddhist Hybrid Sanskrit Dictionary, Page 89.

1. Buddhist Hybrid Sanskrit Page 1-7
२. सद्धर्मपुण्डरीकम्- नलिनाक्षदत्तद्वारासम्पादितम् भूमिका पृ. १६-१७)
३. ललितविस्तरसूत्रम्, भूमिका शांतिभिक्षु शास्त्री

# बौद्धसंघस्य सम्प्रदायः

प्रारम्भिक-बौद्धस्रोतसामनुसारं तु भगवतः बुद्धस्य निर्वाणस्य शतवर्षानन्तरमेव दशवस्तूनां विवादं गृहीत्वा संघे भेदः संजातः, यस्य फलस्वरूपं भिक्षुषु मूलबौद्धधर्मं प्रति कटु प्रतिक्रियायाः भावना जागृता, यत्र बहुभिक्षूणाम् एका महती संगीतिः सञ्जाता तस्मात् कारणात् ते महासांघिकाः कथ्यन्ते। एभ्यः महासांघिकेभ्यः महायानस्याभ्युदयः अभूत् पश्चात् महासांघिकानामपि उपसंप्रदायाः अभवन्।

द्वितीयसंगीति-समये बौद्ध-संघ-भेदोपरान्तं तृतीयसंगीतिपर्यन्तं अष्टादशनिकायाः विकसिताः जाताः। बौद्धधर्मस्याष्टादशसम्प्रदायानां विवरणं एवमस्ति-

वसुमित्रस्यानुसारन्तु बुद्धाब्दस्य द्वितीये शतके व्यावहारिकैः गौकुलिकैश्च सह लोकोत्तरवादिनामपि महासांघिकानां मध्यात् आविर्भावः अभूत्। थेरवादि-सम्मतीय-परम्परासु व्यावहारिकानां गोकुलिकानामपि उल्लेखोऽस्ति। विनीतदेवस्य ग्रन्थे लोकोत्तरवादिनामपि उल्लेखोऽस्ति। भव्यस्य महासांघिक-सूच्यां केवलं महासांघिकानां गोकुलिकानामपि उल्लेखोऽस्ति। तारानाथस्यानुसारं लोकोत्तरवादी गोकुलिकेभ्यः पृथक् नासीत् एकव्यावहारिक-महासांघिकेभ्यश्च। बारोमहाभागस्य विचारानुसारं लोकोत्तरवादि एकव्यावहारिकेभ्यः पृथक् नासीत्। लोकोत्तरवादिनामपि अभेदः चैत्यकैरपि स्थापितः जातः।

**लोकोत्तरवादी**-लोकोत्तरवादिनां नाम्ना एव इदं सूच्यते यत् बुद्धस्य बोधिसत्त्वस्य च लोकोत्तरस्य सिद्धान्तः विशेषतया मान्य आसीत्। महावस्तुना अस्य समर्थनं भवति। निदानकथावत् महावस्तौ बुद्धचरितस्य त्रिभागेषु विवरणं प्रस्तूयते। प्रथमे तु दीपंकरबुद्धस्य समयस्य बोधिसत्त्वचर्यायाः वर्णनमस्ति, द्वितीये च तुषितस्वर्गस्य बोधिसत्त्वस्य च गर्भावक्रान्तेः च सम्बोधिपर्यन्तं वर्णनमस्ति तृतीये

च धर्मचक्रप्रवर्तनस्य संघस्य च अभ्युदयस्य महावग्गेन सह तुलनीयं वर्णनम् अस्ति। नानाजातकावदानसूत्रगाथानां समावेशेन अयं ग्रन्थः विपुलाकारः सञ्जातः। बोधिसत्त्वस्य लोकोत्तरत्वं तेषाञ्च आध्यात्मिकविकासस्य भूमीनामत्र वर्णनं प्रस्तूयते। खीष्टाब्दपूर्वस्य द्वितीयशताब्द्याः चतुर्थशताब्द्याः च मध्ये अस्य ग्रन्थस्य रचना सम्पूर्णा अभवत्। परमार्थस्यानुसारं लोकोत्तरवादी लौकिकधर्मान् यथार्थं न अमन्यत् यत् ते कर्मणः उद्भूयते कर्म च स्वयमेव विपर्यायात् उद्भूयते। लोकोत्तरधर्मः पारमार्थिकोऽस्ति। मार्गः मार्ग-फलं च पारमार्थिकमस्ति। मार्ग-फले द्वौशून्यभावौ संगृहीतौ स्तः। द्वि शून्यभावयुक्त प्रज्ञैव एव मार्गोऽस्ति। शून्यत्वमेव परमार्थः तस्य च बोधोऽप्यस्ति।

वसुमित्र-भव्य-विनीतदेवेषु लोकोत्तरवादिनां अन्यः सिद्धान्तः महासांघिकानां सदृश एव अस्ति ।

**एकव्यावहारिकः** - परमार्थस्यानुसारं एकव्यावहारिकसम्प्रदाये सकलाः धर्माः, संसारः निर्वाणं च, लोकधर्मः लोकोत्तरधर्मश्च, प्रज्ञप्तिमात्रम् अवस्तुमात्रं च मन्यते स्म। अस्य समानवाचकपदस्य सकलधर्मेषु अभेदव्यवहारस्वीकरणात् ते एकव्यावहारिकाः कथ्यन्ते स्म। भव्यस्यानुसारं तथागतः एकचित्तेन एकक्षणे सकलान् धर्मान् जानाति अस्य स्वीकरणात् अयं समुदायः एकव्यावहारिकः इत्युच्यते।

**कौक्कुटिकः** - अस्य सम्प्रदायस्य नाम कौक्कुटिकः, कोक्कुलिकः गोकुलिक वासीत्। कुक्कुलस्यार्थः 'भस्म' इति भवनात् 'कुक्कुलकथायाः च कारणात् 'कौक्कुलिकः कथ्यते। इदं सम्भाव्यते यत् कुक्कुटारामेण सम्बन्धात् तं कौक्कुटिकः कथ्यते। कौक्कुटिकः इदं मन्यते स्म यत् पिटकेषु मात्रम् अभिधर्मः एव तथागतस्य यथार्थदेशनास्ति। सूत्रं विनयं च मात्रम् उपायमात्रमस्ति। अतएव अस्य निकायस्य अनुयायी विनयानुशासनस्य पालनं न करोति। सूत्रपरिशीलनमपि सः अनावश्यकं मन्यते स्म अकथयत् च एवं विद्याध्ययनं मुक्तमार्गेबाधकं भवति। धर्म-देशनां प्रति अपि स उदासीनोऽऽसीत् ध्यानमात्रस्य च महत्त्वं प्रददाति।

बुद्धघोषस्यानुसारं ते सकल संस्कारान् कुक्कुल-मात्रं स्वीकृतवन्तः अस्य च मतस्य समर्थने आदीप्तपर्यायस्योद्धरणानि सन्ति।

**बहुश्रुतीयः**-अभिलेखैः गान्धारे अन्ध्रे च बहुश्रुतीयानां स्थितिः ज्ञायते। परमार्थस्यानुसारं अर्हत् याज्ञवल्क्यः तस्य प्रवर्तकः आसीत्। तेषु च सूत्रेषु नीतार्थनेयार्थयोः भेदः वर्तते। हरिवर्मनः सत्यसिद्धिशास्त्रस्यापि अनेन सम्प्रदायेन सम्बन्धं स्वीकरोति। अस्मिन् शास्त्रे पञ्चपिटकानाम् उल्लेखः प्राप्यते-सूत्रपिटकं, विनयपिटकम्, अभिधर्मपिटकं, संयुक्तपिटकं च। वसुमित्रस्यानुसारं बहुश्रुतीय-सम्प्रदाये बुद्धस्य 'पञ्चस्वराणि अर्थात् देशनायाः पञ्चवस्तूनि शान्तं लोकोत्तरं च मन्यन्ते स्म-अनित्यत्त्वं, दुःखं, शून्यत्त्वं, अनात्मं निर्वाणं च। एतानि वस्तूनि निर्णायिका विमुक्तिमार्गे महत्त्वपूर्णानि सन्ति। देशनायाः अवशिष्टानिवृत्तानि लौकिकानि सन्ति। महादेवस्य अर्हतविषयकपञ्चवस्तूनि अस्मिन् सम्प्रदाये स्वीकृतानि आसन्। दुःखसत्यं संवृतिसत्यं, आर्यसत्यं च वस्तुतः सत्यमस्ति। समापत्तेः लाभः संस्कार-दुःखत्व बोधने भवति दुःखदुःखत्वस्य परिणामदुःखत्वस्य च बोधेन न। संघः लोकोत्तरः वर्तते।

**प्रज्ञप्तिवादः**-परमार्थस्यानुसारं प्रज्ञप्तिवादस्य जन्म बहुश्रुतीनामभ्यन्तरसुधारेणाभवत्। अस्मात् कारणात् बहुश्रुतीय-विभज्यवादी अपि कथ्यते स्म। महाकात्यायनः अस्य सम्प्रदायस्य प्रवर्तकः कथ्यते। भव्यस्यानुसारं प्रज्ञप्तिवादिनां विवरणे अष्टादश दुःखस्कन्धाः न सन्ति। द्वादशानि आयतनानि परिनिष्पन्नार्थाः न सन्ति। अष्टादशदुःखानि परमार्थतः सत्यभूतानि सन्ति। चैतसिकः प्रज्ञप्तिमार्गः न अस्ति। अकालमरणं न भवति। पुरुषः कर्ता न। सकल दुःखानां कारणं पूर्व-कर्म अस्ति। वसुमित्रस्यानुसारं पुण्येन आर्यमार्गः प्राप्यते ।

**महासांघिकः**- चैत्यकः, शैलः, आन्ध्रकः शाखा-चैत्य-शैलापरशैलोत्तरशैलसम्प्रदायानां जन्म महासांघिकाभ्यन्तरेण द्वितीयमहादेवस्य कारणात् निगद्यते। वसुमित्रस्य चीन्यानुवादस्यानुसारं चैत्य-निकायेषु बोधिसत्त्वस्य दुर्गति-प्राप्तिः सम्भवोऽस्ति, स्तूपस्य पूजया महाफलं न भवति, महादेवस्य पञ्चवस्तूनि स्वीक्रियन्ते।

बुद्धघोषस्य विवरणे पूर्वशैलम्, अपरशैलम्, राजगिरिकं सिद्धार्थिकं-निकायान् अंधकः अन्ध्रको वा कथ्यते। कथावत्थौ तेषाम् अनेकेषां मतानां

निर्देशोऽस्ति- सकलधर्माः स्मृति-प्रस्थानस्य विषयाः सन्ति। (कथावत्थु १-६) अतीत- अनागतं, प्रत्युत्पन्नं, रूपं, अन्य स्कन्धः, सकलधर्मः यथार्थैव सन्ति, ते स्वरूपतः सन्ति न तु अयर्थाथाः ( कथावत्थु १-१० )

**पूर्वशैलीयः** - पूर्वशैलसम्प्रदायः बुद्धघोषेण (अन्धकानां) परवर्ती शाखा इति मन्यते। वसुमित्रस्य परमार्थस्य विवरणे उत्तरशैलस्य नाम्नैव सम्प्रदायः विवक्षितः अस्ति। अशोकस्य समये अयं उद्भूतः पश्चात् आन्ध्रदेशे अयं विकसितः, परं श्वानच्वांगस्य समयपर्यन्तम् अयं सम्प्रदायः लुप्तप्रायः आसीत्। वसुमित्रेण इदं ज्ञायते यत्-पूर्वशैलीयानामनुसारं बोधिसत्त्वः दुर्गतिना विमुक्तो भवितुं न शक्यते। स्तूपपूजां चैत्य-पूजा च महाफलम् इति न स्वीकर्तुं शक्यते।

अर्हतेषु शुक्रविसृष्टि, अज्ञानं, विचिकित्सा, वाक्भेदश्च स्वीक्रियन्ते। कथावत्थौ पूर्वशैलानाम् अन्यो सिद्धान्ताः स्पष्टीभवन्ति -

दुःखाहारः मार्गस्य अंगोऽस्ति मार्गपर्यायन्नश्च । (कथा० २-६)

अन्तरभावस्य सत्ता स्वीकार्यास्ति । कथा० ८ -२ प्रभृताः ।

**अपरशैलः** - अपरशैलसम्प्रदायोऽपि अन्धकानाम् (अन्ध्रकानां) एका शाखासीत्। नागार्जुनकोण्डस्य अभिलेखेषु दीघनिकायस्य, मज्झिमनिकायस्य, संयुत्तनिकायस्य पंचमातुकस्योल्लेखः प्राप्यते। वसुमित्रस्यानुसारम् अपरशैलीयसम्प्रदाये बोधिसत्त्वः दुर्गतिना अमुक्तः इति कथ्यते, स्तूपचैत्यानां पूजा महाफलं इति न मन्यते। अर्हतेषु शुक्र-विसर्गः अज्ञानं, विचिकित्सा, परवितारणा वचीभेदश्च स्वीक्रियन्ते। कथावत्थौ अन्यानि मतानि सूच्यन्ते-नियतस्य नियमे अवतरणं स्वीक्रियते इदमपि च मन्यते यत् षडायतनानां एकसार्धं गर्भे जन्म भवति । लोकोत्तर ज्ञानस्य द्वादशवस्तुकत्वम् सकलधर्माणां च एकचित्तक्षणिकत्त्वम् अपि अपरशैलैः स्वीकार्यमस्ति।

**राजगिरिकः** -अन्धकानां एकाऽपरा शाखा राजगिरीयसंप्रदायः यस्मिन् धर्माः परस्परं असंगृहीता विजातीया इति स्वीकरोति । कश्चिदपि धर्मः अपरैः संप्रयुक्तः नास्ति। चैतसिकधर्माणां सत्तायाः प्रत्याख्यानं क्रियते यतः ते मनसः भिन्नाः परं चित्त-सम्प्रयुक्ता न भवन्ति। दानं चैतसिकः धर्मः इति निगद्यते। परिभोगमयदानेन पुण्यं वर्धते।

इमे त्रयः सिद्धान्ताः परस्परं विरुद्धाः प्रतीयन्ते। चैतसिकधर्मः अस्त्येव न तर्हि कथं दानं चैतसिकधर्मः भविष्यति ? यदि च दानं चैतसिकधर्मोऽस्ति तर्हि परिभोगमयदानस्य वैशिष्ट्यं निर्मूलमस्ति। दानेन इह परत्र च कार्यं सम्पद्यते। राजगिरीयैः सिद्धार्थिकानां घनिष्ठो सम्बन्धोऽऽसीत्। उभयोः विश्वासः अभिन्नः कथ्यते।

**वैतुल्यकः** – वैतुल्यकानामनुसारं इदं कथयितुं न शक्यते यत् संघः दक्षिणायाः प्रतिग्रहणं करोति। यथार्थः संघः मार्गात् फलेष्वेव निष्पद्यते । अनेन ऋतं अन्यः संघः परमार्थभूतः आसीत्। इदमपि च कथयितुं न शक्यते यत् संघः दक्षिणायाः विशोधनं करोति, न च एवं यत् संघः भक्षयति, पिबति, आस्वादनं करोति च। संघस्य विषये वैतुल्यकानां एतेः सिद्धान्ताः संघस्य एकम् आध्यात्मिकरूपं प्रतिपादयन्ति। तैः इदमपि मन्यते स्म यत् संघाय दानस्य किमपि महत् फलं न भवति इदमपि च यत् बुद्धाय दानमेव महत् फलं भवति।

तेषामनुसारं इदं न कथयितुं शक्यते यत् भगवान् बुद्धः मनुष्यलोके न्यवसत् । वस्तुतः मात्रं तेषां एकं निर्मितं रूपमेव लोकेऽऽगत्य देशनां कृत्वा तुषितलोके प्रत्यागच्छत् । इदमपि न कथयितुं शक्यते यत् बुद्धः धर्मस्य देशनाम् अकरोत्। ते स्वयं तुषितलोके एव अतिष्ठन् ततः तैः धर्मदेशनायै एकः अभिनिर्माणः प्रेरितः। अनेन द्वारेण धर्मदेशनां प्राप्य आनन्दः धर्मस्य देशनामकरोत्। एकाभिप्रायेण मैथुनधर्मं प्रति सेवितव्योऽस्ति। बुद्धघोषस्यानुसारं एकाभिप्रायेण तात्पर्यं कारुण्येनासीत्। यथा स्त्रिया सह बुद्धपूजनोपरान्तम् इदं प्रणिधानं कुर्यात् यत् आवां संसारे एकसार्धं न्यवसाव।

**वात्सीपुत्रीयः तस्य च प्रभेदाः** – वात्सीपुत्रीयानामुद्भवः निर्वाणात् द्विशतवर्षपश्चात् अभवत्। तस्य अभिधर्मस्य नवभागाः आसन् तस्य च नाम शारिपुत्राभिधर्मः धर्मलक्षणाभिधर्मः वा आसीत्। वसुमित्रेण भव्य कथावत्थुना इदं ज्ञायते यत् अस्य सम्प्रदायस्यानुसारं पुद्गलः साक्षात्कृतपरमार्थरूपेण उपलभ्यते न तु पुद्गलः एकस्कन्धात्मकः न च स्कन्धेभ्यः भिन्नः, न च स्कन्धेषु अवस्थितोऽस्ति न च तेभ्यः पृथक्, यत् उपादानीये स्कन्धे वा, धातौ आयतने च निर्भरोऽस्ति

तत् प्रज्ञप्ति नाम। पुद्गलेन ऋतं अन्यः कोऽपि धर्मः अस्मात् लोकात् परलोकं न संक्रमणं करोति ।

**सकलसंस्कृतवस्तूनि एकक्षणिकानि सन्ति ।**

**पञ्चविज्ञानानि न तु सरागानि न च विरागाः ।**

पञ्चाभिधाप्राप्ततीर्थिकजना अपि सन्ति। कामधातोः तमपि विरागः इति कथ्यते। अयं दर्शन-प्रहातव्यः संयोजनानां प्रहारेण भिन्नोऽस्ति।

क्षान्तिः, नाम, आकारः, लौकिकाग्रधर्मश्च सम्यक्तनियामपर्यन्तं प्रेषिकाः चतस्रः अवस्थाः सन्ति। दर्शनमार्गे ईदृशानि द्वादशचित्तक्षणानि सन्ति यत्र प्रतिपन्नस्य अवस्था भवति। त्रयोदशे क्षणे स्थितिफलस्य अभिधानं भवति।

इदं कथयितुं न शक्यते यत् निर्वाणः सकलधर्मेभ्यः भिन्नः अभिन्नः वा अस्ति। इदमपि यत् निर्वाणः वस्तुतः सत्तावान् अस्ति सत्ताहीनो वा।

वात्सीपुत्रीयेभ्यः सम्मतीयानां पृथक् सम्प्रदायरूपेण उद्भूतः कदाचित् खीष्टाब्दपूर्वे खीष्टाब्दस्य वा प्रथमशताब्द्याम् अभवत्। क्रमशः त एव वात्सीपुत्रीयेषु प्रधानाः अभूवन्। एभ्यः अवान्तर-कुरूकुल्लयोः सम्प्रदाययोः उद्भवोऽभवत्। नृपस्य हर्षवर्धनस्य भगिनी राज्यश्री सम्मतीय-निकाये श्रद्धालू आसीत्। श्वानच्वाङ्गमहाभागस्य विवरणेन तेषां महत्त्वं सूच्यते। तेषां वाङ्मये अस्मिन् समये केवलं सम्मतीय निकायशास्त्रे एकस्मिन् च विनये ग्रन्थाः चीन्यनुवादेषु अवशेषाः सन्ति। वसुमित्रस्य अनुसारं वात्सीपुत्रीयानाम् अवान्तर-भेदः एकगाथायाः व्याख्ययाऽभवत् यस्य आशयः आसीत्-विमुक्ते भूते पुनः परिहाणिः भवति, लोभात् पतति, पुनरागमनं भवति। सुखपदं प्राप्य भोगं करोति, अभीष्टं मुक्तपदं प्राप्यते। सम्मतीयेन अत्र चतुर्फलैः अभिसम्बद्धषट्पुद्गलानां संकेतः मन्यतेस्म-स्रोतापन्नः कुलंकुलः, सकृदागामी, अर्हत् च। धर्मोत्तरीये अत्र त्रिविधार्हतानां संकेतः प्राप्यते। भद्रयाणीयश्रावकस्य, प्रत्येकबुद्धस्य, बुद्धस्य च। भव्यस्यानुसारं तस्य मूलसिद्धान्तोऽऽसीत् यत् भवनीयः भवश्च, निरोधव्यः निरुद्धजनितव्यः जातश्च, भरणीयः मृतश्च, कृत्यः कृतश्च, भोक्तव्यः भुक्तश्च, गन्तव्यः गामी च, विज्ञेयं विज्ञानं च अस्य सत्तास्ति। कथावत्थुः तस्य अन्यान् सिद्धान्तान् प्रस्तौति-कथावत्थुः पुद्गलस्य उपलब्धिः साक्षात् परमार्थतः भवति

पुद्गलाः च स्कन्धैः न भिन्नाः न च अभिन्नाः सन्ति। अर्हत्त्वात् अर्हतानां पतनं न सम्भवं।

**देवलोके ब्रह्मचर्यवासः असंभाव्यते ।**

**क्लेशानां क्रमेण प्रहाणः भवति ।।**

पृथक् जनाः कामं रागं व्यापादं च त्यक्तुं शक्नुवन्ति। अभिसमयः अनुपूर्व क्रमिकं वा भवति। रूपधातौ षडायतनिक-आत्मभावः भवति। कुशल इति चित्तेन समुत्थितं कायकर्म, कुशलकर्म, रूपकर्म अस्ति। जीवितेन्द्रियः रूपमयः नास्ति। कर्मणः कारणात्-अर्हत् अर्हत्वात् पतति। रूपं मार्गोऽस्ति। विज्ञप्ति शीलम् अस्ति।

अनुशयः, अव्याकृतः, अहेतुकः, चित्तविप्रयुक्तः च अस्ति । रूपधातौ अनुशयितः रूपरागः रूप-धातु-पर्यापन्नः च सन्ति। ईदृशाः एव अरूप-रागाः, अरूप-धातु पर्यापन्नाः सन्ति। कर्म कर्मोपचयात् भिन्नमस्ति रूपं कुशलं अकुशलं वास्ति । रूपं विपाकमस्ति। ध्याने आन्तरात्मिकाः अवस्थाः सन्ति। धर्मोत्तरीयः, भद्रायणीयः, षण्णागरिकः च सकलपरम्परासु धर्मोत्तरीय वात्सीपुत्रेभ्यः निर्गता प्रथमा शाखा मन्यते। भव्यस्यानुसारं ते कथितवन्तः यत् जातौ अविद्या जातिः च विद्येते, निरोधे अविद्या निरोधश्च। पूर्वोक्तगाथायां अर्हतः परिहाणि-स्थिति-समापत्तीनां संकेतः प्राप्तः। कथावत्थौ एषां एकः सिद्धान्तः उल्लिखितोऽस्ति-चतुर्सत्यानां फलानां च अभिसमयः अनुपूर्वं भवति। षण्णागरिकसम्प्रदाये अर्हतानां षड्भेदाः मन्यते स्म, येषां लक्षणानि सन्ति-परिहाणिः, चेतना अनुरक्षणा, स्थितिः, प्रतिवेधना, अकोप्यश्च।

**आधार-ग्रन्थाः**

१. बौद्धधर्म के विकास का इतिहास।
२. बौद्धदर्शन मीमांसा।

# महायानस्युद्भवः विकासश्च

प्रथमे खीष्टाब्दे राज्ञः कनिष्कस्य उपस्थितौ एका संगीति अभूत् या द्वयोः वर्गयोः विभक्ता-हीनयानं महायानञ्चेति।

प्रज्ञापारिमिता-सद्धर्मपुण्डरीकसूत्रादि महायांनीयग्रन्थेषु इदं वर्णितं यत् महात्मा बुद्धः स्वश्रोतॄणां प्रवृत्तिभेदं विकास-भेदं चावलोकयन् द्विधा उपदेशं दत्तवान् हीनयानं महायानञ्च। महायानाचार्याः हीनयानीयान् श्रावक-यानेति स्वकीयान् च एकयान-अर्हतयान-बोधिसत्त्वयान-बुद्धयानञ्चेति कथयन्ति। महायानसूत्रेषु इदं वर्णितं यत् महायानसूत्राणां देशना त्रिषु चरणेषु सम्पन्ना। प्रथमे तावत् सम्बोधिनः त्रिसप्ताहानन्तरं तथागतः अवतंसकसूत्राण्युपदिष्टवान्। द्वितीये तु यानानां देशना, तृतीये च सद्धर्मपुण्डरीकम्, प्रज्ञापारमिता, महापरिनिब्बानसुत्तं महावैपुल्यसूत्रञ्च उपदिष्टाः। महात्मा बुद्धः प्रथमोपदेशम् ऋषिपतनमृगदावे दत्तवान्, यत् श्रावकयानं हीनयानं वा इति कथ्यते। द्वितीये काले महात्मा बुद्धः गृध्रकूटपर्वते बोधिसत्त्व-पारिवारिकान् सम्बोध्य आगमानां देशनां षटपारिमितान् चोपदिष्टवान् यः सर्वसत्त्वानां दुःखनिवृत्तेः मार्गोऽस्ति यश्च बुद्धयानं बोधियानं महायानं वा इति कथ्यते। तृतीये काले च श्रीधान्यकटकवने श्रीगुह्यपति वज्रपाणिं, राजानं इन्द्रभूत्यादीन् सम्बोध्य चतुर्विधं तन्त्रं उपदिष्टवान् यः तन्त्रयानम् इति कथ्यते। त्रयाणां यानानां प्रज्ञापना प्रवृत्यनुसारं कथिता सा च एकयानं बुद्धयानं वा इति निगद्यते।

एतेषां सकलविचाराणां मूले भगवतः बुद्धस्य तानि वचनानि विलसन्ति येषामुपदेशः सः विविधधात्वध्याशयाधिमुक्तिसंयुतविनेयजनानां कल्याणार्थं विविधेषु स्थलेषु धर्मचक्रस्य प्रवर्तनं कृत्वा अकरोत्।

प्रथमधर्मचक्रप्रवर्तनम्-वाराणस्याः ऋषिपतन-मृगदावे प्रथमं धर्मचक्रप्रवर्तनमस्ति। अस्य पात्राणि श्रावकवर्गीयाः ते जनाः सन्ति ये स्वलक्षणे

ब्रह्मसत्तायां च आधृतस्य चतुर्विधार्यसत्यस्य उपदेशस्य योग्याः सन्ति। अस्य विषयवस्तुः - स्वलक्षणसत्ताया आधारेण चतुर्णामार्यसत्यानां स्थापनास्ति। श्रावकवर्गीयजनानां दृष्ट्या एषा नीतीर्थ देशना अस्ति किन्तु योगाचारः माध्यमिकश्च महायानसिद्धान्तवादीनां दृष्ट्या एषा नेयार्थ देशनास्ति।

द्वितीयधर्मचक्रप्रवर्तनम् गृध्रकूटपर्वते प्रवर्तितम्। अस्य विनेयजनाः महायानयः सन्ति। शून्यत्वं, अनुत्पादः अनिरोधश्च अस्य विषयवस्तु अस्ति। निःस्वभाव धर्मस्य कारणात् विज्ञानवादिना इयं नेयार्थदेशनेति मन्यते। आचार्यभाव विवेकज्ञानगर्भशान्तरक्षितादिस्वतान्त्रिकाणाम् अत्र मतभेदोऽस्ति। अस्यानुसारं आर्यशतसहस्रिका-प्रज्ञापारमितादिसूत्राणि नेतार्थसूत्राणि सन्ति। यतः अत्र सकलधर्माणां परमार्थतः निःस्वभावत्वं स्पष्टतया निर्दिष्टमस्ति। भगवती प्रज्ञापारमिताहृदयसूत्रादिना ऋतं नीतार्थः न मन्यते, अस्यार्थोऽपि परमार्थतः निःस्वभावत्वमस्ति तथापि परमार्थतः इदं अति स्पष्टं नास्ति यत् नीतार्थसूत्राय आवश्यकमस्ति।

प्रासंगिक-माध्यमिकानामनुसारं द्वितीयधर्मचक्रं नीतार्थ-देशनास्ति। अत्र सूत्रस्य मुख्यः विषयः शून्यता अस्ति सः नीतार्थः। यस्य विषयः संवृतिसत्यः अस्ति सः नेयार्थः। अतः भगवती प्रज्ञापारमिताहृदयादिसूत्रमपि नीतार्थमस्ति।

तृतीयधर्मचक्रप्रवर्तनम्- वैशाल्यां इदं अन्तिमं धर्मचक्रप्रवर्तनमभवत्। श्रावकः महायानयश्च अस्य विनेयजनाः सन्ति। शून्यत्वं, अनुत्पादः अनिरोधश्च अस्य विषयवस्तूनि सन्ति। विज्ञानवादीनां इदं मूलभित्ति अस्ति। तेषामनुसारं एषा नीतार्थ-देशनास्ति यतः द्वितीये धर्मचक्रे सकलधर्माः निःस्वभावाः दृश्यन्ते। केचित् विज्ञानवादिनः पदार्थं निस्वभाव केचित् च सस्वभावं कथयन्ति। तेषामनुसारं यानि सूत्राणि धर्माणां सस्वभावतायाः निःस्वभावतायाः च सम्यक् विभाजनं कुर्वन्ति तान्येव नीतार्थानि मन्यन्ते येषां च इदं विभाजनं स्पष्टं नास्ति तानि सूत्राणि नीतार्थानि न भूत्वा नेयार्थानि सन्ति।

आचार्यभावविवेकः शान्तिरक्षितः च तृतीयधर्मचक्रप्रवर्तन नीतार्थ-देशना इति स्वीकुरुतः यतः अनया भगवतीप्रज्ञापारमिताहृदयादिसूत्राणाम् अभिप्रायः स्पष्टः क्रियते।

आचार्यबुद्धपालितचन्द्रकीर्ति-आदि प्रासंगिकमाध्यमिकाः इमां सर्वथा नेयार्थ-देशनेति स्वीकुर्वन्ति। यतोहि विज्ञानवादीनां सिद्धान्तः युक्तिहीनः दोषदुष्टश्चास्ति, अतः तृतीयधर्मचक्रं नेयार्थ-देशनाऽस्ति। अस्य प्रवर्तनं भगवान् बुद्धः एतेषु विनेयजनेषु अनुग्रहार्थं कृतवान्। ये तत्काले शून्यता-सदृशं गम्भीरविषयाभिमुखं आसन्।

महायानसूत्रालंकारे बोधिचर्यावतारे च महायानस्य प्रमाणे अनेकाः युक्तयः प्रस्तूयन्ते। अस्मिन् ग्रन्थे इदं निगद्यते यत् यदि महायानं पश्चातुद्भाष्येत तर्हि एतस्याः शंकायाः निराकरणं तथागतः पूर्वमेव अकरिष्यत्। महायानं एकतः स्व प्रामाणिकतार्थं युक्तीं प्रस्तौति अपरतः थेरवादीन् हीनयानीति कथयन् तेषां संकीर्णत्वं प्रतिपादयति।

**विद्वत् विचारः**- विदुषां मन्तव्योऽस्ति यत् हीनयानीय-सिद्धान्तान् आलोचयन् महायानस्य कतिपयाः सम्प्रदायाः विकसितवन्तः।

रीज डेविड्समहाभागैः महायानं सकलधर्माणां परिवर्तितं विकृतं च रूपमिति संभावना अभिव्यज्यते। महामहोपाध्याय हरप्रसाद शास्त्रीमहोदयः महायानस्य विकासे भगवद्गीतायाः शैवसम्प्रदायस्य च प्रभावः, पारसी ग्रीक-कलयोः प्रभावः, अर्धबर्बर जातौ धर्मप्रचारस्यावश्यकतायाः कारणात् परिवर्तनं, धर्मस्य च प्रभावः इति स्वीकृतवान्। भरतसिंहोपाध्यायः विविधसिद्धान्तानां विकासं महायानस्य विकासे कारणमिति मनुते। प्रमुखाः सिद्धान्ताः इत्थं सन्ति-द्वयोः सत्ययोः कल्पना, बुद्धस्य त्रिकाय-सिद्धान्तः, बुद्ध भक्तेः वा समावेशः, बोधिसत्त्वसम्बन्धिसिद्धान्तः, बोधिचित्तोत्पादः, आध्यात्मिक विकासस्य च दशभूमयः, धर्मशून्यत्त्वं, तथतायाः च विचारः। गोविन्दचन्द्रपाण्डेयस्य विचारोऽस्ति यत् ईसापूर्व द्वितीयशताब्द्याः द्वितीयशताब्दिपर्यन्तं महायानस्य अभ्युदयः अभूत्। भारतीयसंस्कृतेः संक्रमण-कालोऽऽसीत्। तत्कालेविदेशिजातयः भारते आगता आसन्। ताः च स्वप्रभावस्यविस्तारम् अकुर्वन्। बौद्धधर्मः अस्यां प्रक्रियायां महत्त्वपूर्णं भागं गृहीत्वा विश्वव्यापी अभवत्। महायानस्य विकासे पाण्डेयमहाभागेन विविधकारणानि उत्तरदायीरूपेण मन्यते यथा- महासांघिकानां सिद्धान्तः, औपनिषद् ब्राह्मणवादः, मायावादः, भगवतधर्मस्य चावतारवादः, भक्तेः तत्त्वानां प्रभावः।

महायानस्य स्थापनायां प्रमुखा भूमिका नागार्जुन, वसुबन्धु, आर्यदेव असंग प्रभृत्याचार्याणां मन्यते।

नागार्जुनस्यानुसारं देशना द्विविधास्ति गुह्या व्यक्ता च। प्रथमा बोधिसत्त्वार्थं दत्ता द्वितीया च अर्हत् विषयकासीत्। हीनयाने अनित्यस्य, दुःखस्य, अनात्मनः च महत्त्वमस्ति। असङ्गेन आशयुपदेशप्रयोगसमयादीनां दृष्ट्या महायान-हीनयानयोः मध्ये भेदः निगद्यते। एषु चतुर्वृत्तेषु महायानात् विरुद्धत्वात् हीनयानं वस्तुतः हीनमेवास्ति-

**अशस्योपदेशस्य प्रयोगस्य विरोधतः ।**
**उपष्टम्भस्य कालस्य यद्धीनं हीनमेवं तत् ।।**

महायानसूत्रालंकारः १ - ४०

हीनयाने पुद्गलनैरात्म्यस्य बोधेन क्लेशावरणं क्षयति अर्हत् पदस्य प्राप्तिर्भवति। श्रावकः अपरैः उपदेशं गृहणाति, अपरान् च उपदिशति, प्रत्येक-बुद्धः न कस्यचिदपि गुरुः भवति न च शिष्यः। महायाने धर्मनैरात्म्यस्य शून्यतायाः वा बोधेन ज्ञेयावरणस्य क्षयभूतत्वात् बुद्धपदत्वं सर्वज्ञत्वं च प्राप्यते। विदुषां कथनमस्ति यत् यैः बोधिसत्त्वाः पूज्यन्ते महायानसूत्राणि च पठ्यन्ते ते एव महायानिनः सन्ति।

स्थविरवादे शून्यत्वं अनात्मवादस्य पर्यायोऽस्ति। हीनयाने साधकः निर्वाण-प्राप्त्या सन्तुष्टोऽस्ति। महायानस्युच्चतमं लक्ष्यं बुद्धज्ञानं, सर्वज्ञत्वं, अनुत्तरज्ञानं सम्बोधेः प्राप्तिः वा अस्ति, एतत् 'तथता' अपि कथ्यते। महायाने केवलं एकयानं बुद्धयानं मन्यते। स्थविरवादे च बोधिपक्षीयधर्माणां स्वीकृतिः अस्ति। अष्टसहस्रिका-प्रज्ञा-पारमितायां कथ्यते यत् हीनयानस्य अनुयायी एकात्मनः दमनं, शमनं, निर्वाणस्य च कामना करोति परन्तु बोधिसत्त्वः परमार्थे स्वसकलप्राणीन् च स्थापयितुम् इच्छति, स्वेन च सह अप्रमेयप्राणिना परिनिर्वाणार्थम् उद्योगं करोति ।

हीनयानस्युपदेशः पञ्चवर्गीयभिक्षुकेभ्यः दीयते, महायानस्युपदेशः बोधिसत्त्वानां समक्षं दीयते। महायानी परावृत्तिभोगं स्वीकरोति। एषु द्वयोः सत्ययोः -परमार्थ-संवृत्ति-सत्ये च अतिबलं दीयते। महायानी त्रिकायस्य

(धर्मकायः निर्माणकायः संभोगकायः च) कल्पनायां बलं ददाति। महायानिभिः अष्टाङ्गिक-मार्गस्य स्थाने बोधिसत्त्व-चर्या विकासिता।

महासांघिकाः बुद्धं लोकोत्तरं मन्वते, तेषां शरीरं अनास्रवविशुद्धं दोषरहितञ्च मन्वते । ते च अपरिमितं रूपं, अगणित-भौतिक-शरीरान् च धर्तुं अशक्नुवन्। महायानीनां शिक्षा परमार्थसत्यस्य विषयेऽस्ति व्यावहारिकी न। त्रिपिटिकस्य शिक्षा व्यावहारिकी पारमार्थिकी न। अर्हन्तं शुष्कज्ञानी इति कथ्यते यावत् बुद्धत्वप्राप्तौ प्रज्ञाकरुणयोः भावना निहितास्ति। मंजुश्रीआचार्याः प्रारम्भे महाकरुणा-सिद्धान्तस्य अनुयायिनः आसन्। 'आर्यधर्मसंगीतौ' इदं कथ्यते यत् महाकरुणा एकः धर्मोऽस्ति।

अष्टसाहस्रिकायां महायानस्य सम्बन्धे इदं कथ्यते यत् महायानं अप्रमेयतायाः अधिवचनम् अस्ति। पारमिता-मार्गे चलयति। आकाश इव अति महत्त्वात् महायानमस्ति, यथा गगनम् अप्रमेयं प्राणेभ्यः अवकाशोऽस्ति तथैव महायानेऽपि प्राणेभ्यः अवकाशोऽस्ति। महायाने बुद्धानां संख्या गंगायाः रज इव असंख्या मन्यते। हीनयाने श्रावकयानस्य साधना, चतुरार्यसत्यानां साक्षात्कारः, प्रत्येक-बुद्धस्य साधना, प्रतीत्यसमुत्पादः, सम्यक् सम्बुद्धस्य साधना, ब्रह्म-विहार-भावना, पारमितानां च अभ्यासः-इत्यादयः निगद्यन्ते। हीनयानस्य सिद्धान्तानां विकासः एव महायाने अभूत। दीघनिकाये मात्रं सप्तबुद्धानाम् उल्लेखोऽस्ति, पश्चात् बुद्धस्य जीवनं अनिवार्यरूपेण धर्मभावस्याङ्गोऽभवत्। भावी बुद्धस्य मैत्रेयस्यापि अत्रोल्लेखोऽस्ति।

**वज्रयानस्युद्गमस्थानम्** - तिब्बतिग्रन्थेषु इदं कथ्यते यत् बुद्धः त्रयोदशे वर्षे राजगृहस्य गृध्रकूटपर्वते महायानधर्मस्य चक्रप्रवर्तनं कृतवान षोडशे च वर्षे मन्त्रयानस्य तृतीय धर्मचक्रप्रवर्तनं श्रीधान्यकटके कृतवान्। धान्यकटकं गुन्टूरमण्डले धरणीकोट नाम्ना प्रसिद्धमस्ति। वज्रयानस्य जन्मस्थानं अयमेव प्रदेशः श्रीपर्वतञ्चास्ति। यस्य ख्यातिः तन्त्रशास्त्रस्य इतिहासे अत्यधिकम् अस्ति। भवभूतिना मालतीमाधवे श्रीपर्वतं तान्त्रिकोपासनायाः केन्द्ररूपे चित्रितम् यत् बौद्ध भिक्षु श्री कपालकुण्डला तान्त्रिकपूजायां निरताऽऽसीत्। सप्तमे शतके बाणभट्टः श्रीपर्वतस्य माहात्म्येन सम्यक्रूपेण परिचितः आसीत्। हर्षचरिते

सकलजनानां मनोरथसिद्धये 'श्रीपर्वतं' इति निगद्यते। श्री हर्षवर्धनः रत्नावल्यां श्रीपर्वतात् आगतं एकं सिद्धं अवर्णयत्। शंकरदिग्विजये श्रीशैलं तान्त्रिकानां केन्द्रः मन्यते, यत्र शंकराचार्यः गत्वा स्वापूर्वतर्कस्य बले तान् पराजितान् अकरोत्। इदं प्रसिद्धमस्ति यत् नागार्जुनः श्रीपर्वते स्थित्वा अलौकिक सिद्धीं प्राप्तवान् श्रीपर्वते मन्त्रयानं वज्रयानं चोद्भूतौ। अस्य प्रमाणं तिब्बति-सिंहलि ग्रन्थेषु सम्यक्रूपेण प्राप्यते। चतुर्दशशताब्द्यां 'निकाय-संग्रह' नामक ग्रन्थे वज्रयानं वज्रपर्वतवासी निकायः निगद्यते। ते सकलग्रन्थाः वज्रयानस्य एव सन्ति, अतएव सम्भवतः श्रीपर्वतमेव वज्रयानेन सम्बद्धत्वात् वज्रपर्वतस्य नाम्ना उच्यते।

**वज्रयानम्** – महायानस्य विकासस्य नाम 'मन्त्रयान' अस्ति। यस्य अग्रिम-विकासः वज्रयानस्य संज्ञया अभिहितः। सौम्यावस्थायाः नाम मंत्रयानम् अस्ति, उग्ररूपस्य संज्ञा 'वज्रयानमस्ति'। विज्ञानवादस्य गहनसिद्धान्तानां ज्ञानस्य योग्यता साधारण जनेषु नासीत्। ते तु इदृक् मनोरमधर्मं वाञ्छन्ति स्म यस्मिन् अल्पप्रयत्नेन महत् सुखस्य प्राप्तिर्भवेत्। वज्रयानसम्प्रदायः शून्यतया सह महासुखस्य कल्पनां सम्मेलयति शून्यतायाः एव नाम 'वज्रम्', वज्रम् कदापि न विनश्यति। तत् तु दुर्भेद्यम् अस्त्रमस्ति, वज्रं दृढसारं, अपरिवर्तनशीलं, अच्छेद्यं, अभेद्यं अविनाशी चास्ति। इदं शून्यं 'निरात्मा' यस्य गाढालिंगने मानव-चित्तं (बोधिचित्तं) विज्ञानं च सर्वदा बद्धं भवति। इदं च युगलमिलनं सर्वकालाय सुखानन्दं उत्पादयति, अतएव वज्रयानं शून्य-विज्ञान-महासुखानां त्रिवेण्याः संगमं विरच्य असंख्य-जीवानां कल्याणस्य मार्गम् उन्मुक्तं अकरोत्।

**बौद्धतन्त्रम्** – त्रिपिटकानां अध्ययनात् एवं प्रतीयते यत् तथागतस्य मूलशिक्षायामपि मन्त्रतन्त्रयोः बीजं अन्तर्निहितम् आसीत्। स्थविरवादिभिः 'आटानाटीयसुत्ते' एवं अलौकिकं वृत्तं प्राप्यते। उत्तरकालिकानामाचार्याणां तन्त्रमन्त्रयोः दृढविश्वासोऽभवत्। बुद्धस्य इन्द्रियेषु (सिद्धिषु) पूर्णविश्वासः जातः। अस्मिन् प्रसंगे अयं चतुरिद्धिपादानां-छन्दः (इच्छा) वीर्यः (प्रयत्नं) चित्तः (विचारः) विमंसा (परीक्षा) च इत्येषां वर्णनं प्राप्यते यत् लौकिक-सिद्धीनां उत्पादने समर्थमासीत्। तत्वसंग्रहे शान्तरक्षितस्य स्पष्टं कथनमस्ति यत् बुद्धधर्मं

पारलौकिक-कल्याणस्युत्पत्तौ यादृशं सहायकं अस्ति तादृशं लौकिक-कल्याणस्युत्पत्तौ अपि अस्ति, अतएव बुद्धः स्वयमेव मन्त्र-धारणी-तांन्त्रिकविषयानां शिक्षा अददत् यस्मात् अस्मिन्नेव लोके प्रज्ञारोग्यादिवस्तूनां उपलब्धिः भवितुं शक्नोति। 'साधनमाला' यस्यां विविध विद्वद्भिः रचित देवता-विषयक द्वादशाधिकत्रिंशत मन्त्राः-स्वयं बुद्धात् उद्भवन्ति स्म। विभिन्नावसरेषु देवतानां बहवः मन्त्राः बुद्धः स्वशिष्यान् बोधयति स्म। गुह्यसमाजस्य परीक्षा कथयति यत् तन्त्रस्युदयः बुद्धद्वारा अभूत। तथागतः स्वानुयायीन् उपदेशसमये अकथयत् यदाहं दीपंकर कश्यपबुद्धरूपे उत्पन्नः तदाहं तान्त्रिक शिक्षा एतद् कारणात् न दत्तवान् यत् मे श्रोतृषु तासां शिक्षाणां ग्रहणस्य योग्यता नासीत्।

विनयपिटकस्य द्वयोः कथयोः अलौकिकसिद्धीनां प्रदर्शनस्य मनोरञ्जकानि वृत्तानि वर्णितानि सन्ति। राजगृहस्य एकेन श्रेष्ठिना चन्दननिर्मितभिक्षापात्रं अतीवोपरि वृक्षशिखरे बन्धितम्। बहवः तीर्थंकराः आगतवन्तः परं तत् अवतारणे समर्थाः नाभूवन्। तदा भरद्वाजः स्वयोगसिद्धेः बलेन आकाशस्योपरि उत्थितवान् तत् च गृहीत्वा उपरि एव राजगृहस्य त्रिवारं प्रदक्षिणां कृतवान्। जनाः आश्चर्यचकिताः जाताः परं बुद्धः तुच्छकाष्ठपात्राय एतादृशः शक्ति-प्रयोगः नितान्तमनुचितः इत्यनुभूतवान्। भगवान् बुद्धः शक्तिप्रयोगोऽयं भरद्वाजस्य अभद्रदृष्टिः रिति अकथयत् भारद्वाजस्य च दुर्नियतं ज्ञातवान्। एतादृशं मगधनरेश बिम्बसारेण पुरस्कृतं 'मेण्डक' नामक गृहस्थस्य परिवारस्य सिद्धीनां वर्णनं विनयपिटके अन्यत्र प्राप्यते। अनेन अयं निष्कर्षः लभते यत् तन्त्र-मन्त्र-योगसिद्धयादीनां शिक्षा बुद्धकालाद् उद्भूता। सा तु प्रथमतः बीजरूपेण आसीत्, अनन्तरं पूर्णरूपेण विकसितवती।

महायानस्य उदयस्य इतिहासेन वयं परिचिताः यत् प्रथमतः महासांघिकाः बुद्धस्य व्यक्तित्त्वं लौकिकापेक्षया अलौकिकमिति स्थापितवन्तः। वेतुल्लवादीनां एषा स्पष्टा मान्यताऽऽसीत् यत् बुद्धः अस्मिन् लोके कदापि न आगतवान् न च उपदिष्टवान्। इत्थं बुद्धस्य लोकोत्तररूपेण ते न सन्तुष्टाः आसन्, प्रत्युत् ते स्पष्टशब्देषु एषा युगान्तकारि-भावनेति उद्घोषितवन्तः यत् एकाभिप्रायेण मैथुन-सेवनं कर्तुं शक्यते। उभौ सिद्धान्तौ-ऐतिहासिक बुद्धस्य अस्वीकृतिः विशेषावस्थायां च

मैथुनस्य स्वीकृतिः-क्रान्तिकारकौ आस्ताम्। अनेन इदं सिद्धयति यत् बुद्धस्य अनुयायीनां महती संख्या अस्मिन् वृत्ते विश्वसिति स्म यत् तथागतः अलौकिकंपुरुषः आसीत्, मैथुनस्य चाऽचरणं विशिष्टदशायां न्याय्यम् आसीत्। अस्मिन् द्वितीये सिद्धान्ते वज्रयानस्य (तान्त्रिक बुद्धधर्मः) बीजं स्पष्टतः निहितमस्ति। 'मंजुश्री मूलकल्पस्य रचना विक्रमस्य प्रथमे द्वितीये च शतके अभूत्। अस्मिन् ग्रन्थे मन्त्रधारण्यादयः विशेषतः वर्ण्यन्ते। अतः महायानस्य समये तन्त्रमन्त्रयोः भावना नष्टा नाभूत्, प्रत्युत् एषा अभिव्यक्तिं प्राप्तुं अग्रेसरि आसीत्। योगाचारे योगस्याचरणे विशेषं महत्त्वं अस्य फलस्यागमनस्य सूचनासीत्।

## आधारग्रन्थाः


१. महायान-शांतिभिक्षुशास्त्री

२. ब्रौद्धधर्म के विकास का इतिहास

३. महायान-डॉ. विजयकुमार जैन (अप्रकाशित ग्रन्थ)

# विज्ञानवादः/योगाचारः

विज्ञानवादस्यापरनाम योगाचार अस्ति। अस्य नामकरणस्य कारणमसङ्गस्य योगाचारभूमिशास्त्रमस्ति। योगस्याभ्यासत्वात् एतान् योगाचारिणः कथयन्ति। योगस्य आचारस्य चोभयोः संयुताभ्यासत्त्वादपि योगाचारः उच्यते।

बलदेवोपाध्यायः आध्यात्मिकसिद्धान्तानां कारणात् विज्ञानवादं व्यावहारिक साधनात्मक-धार्मिकदृष्ट्या योगाचारः कथ्यते। बाह्यार्थस्य शून्यत्वं अङ्गीकारात् आन्तरिकशून्यभावस्य च परिनियोगात् योगाचार नाम्ना कथ्यते।

गोविन्दचन्द्र पाण्डेयः योगाचारं विज्ञानवादस्य अंकुरोद्गमः इति मन्यते अस्य च कालः ख्रीष्टाब्दपूर्वं प्रथमतः तृतीयशताब्दिपर्यन्तं मन्यते । पञ्चमशताब्दिपर्यन्तं मैत्रेयासङ्गवसुबन्धूनां विज्ञानवादस्य परिणतिः योगाचारे भूता इति निगद्यते। विज्ञानवादस्य परिणतिः योगाचारे अभवत्-इत्यस्यावधारणा महायानसूत्रेषु प्राप्यते। योगाचारस्य प्रमुखानि त्रीणि सूत्राणि सन्ति-संधिनिर्मोचनम्, लंकावतारः घनव्यूहश्च। योगाचारी उभयोः सत्तयोः न विश्वासं करोति। एकोऽपि भूत-भविष्य-वर्तमानं सत्यं न मन्यते। एषः कार्यकारणयोः श्रृखलां मन्यते। इदमपि आलयविज्ञानं कथ्यते।

योगाचारस्य मूलाधारः प्रतीत्यसमुत्पाद अस्ति। अविद्यायाः कारणात् मानवीयं कर्म तस्य च अनुभवस्य संसारं प्राप्नोति। अतीतजीवनस्य संस्कारः पंचस्कन्धानां रूपे मातृगर्भात् उत्पद्यते। तदा तं विज्ञानं चैतन्यं वा कथ्यते। पंचेन्द्रियाणां मनसः च व्यक्तावस्थायाः नाम एव रूपमस्ति। विज्ञानवादी विज्ञानं चित्तं वा सत् मन्यते अन्यान् च असत् अवगम्यते, यतः चित्तेन जगतः सकलानां पदार्थानां प्रत्यक्षमनुभवति। चित्तेन जगतः प्रवर्तनं जगतश्च निरोधोभवति। एषः वस्तूनि प्रतिक्षणं परिवर्तनशीलानि मन्यते। यतः यदा वस्तुनः उत्पत्तेः पश्चात् कार्यं कारणं च स्थिरं न भवितुं शक्नोति तदा ज्ञानं कथं सम्भाव्यते अतएव कञ्चित् सर्वकालिकं मन्तुं भविष्यति। चित्तं सत् अवगम्यते। चित्तं

मनः, विज्ञप्तिः, निर्वाणं, धर्मधातुः इत्यादिभिः नामभिः उच्यते। मननक्रियया मनः, चेतनक्रियया सम्पन्नत्वात् चित्तं, वस्तूनां पदार्थानां च कारणात् विज्ञप्तिः विज्ञानं वा कथ्यते। विज्ञानस्यावस्थाया उपरान्तं प्राणिनः सांसारिकजीवनं आरभ्यते। विज्ञानवादस्य दृष्टौ आलयविज्ञानं ग्राह्यं ग्राहकं चास्ति ।

विज्ञानमवस्थायाः अनुसारं अष्टधास्ति पञ्चेन्द्रियाणां विज्ञानं, मनोविज्ञानं, संक्लिष्टमनोविज्ञानं आलयविज्ञानं च। विज्ञाने अहंकारस्य अस्तित्त्वभूतत्वात् निर्वाणस्य प्राप्तिः न भवितुं शक्नोति। आलयविज्ञानं विषयानां पवनं सद्विद्विज्ञानं च तरंगाणि मन्यते।

विज्ञानवादिभिः पदार्थः द्विधा विभक्तः-संस्कृतः असंस्कृतश्च। हेतुप्रत्ययजन्यः पदार्थः संस्कृतः हेतुप्रत्ययेन ऋतश्च सस्वभावः पदार्थः असंस्कृतः कथ्यते। असंस्कृतपदार्थेषु विकारः न भवति। इदं भूतकोटिः अवमन्यते। भूतकोटेरर्थः सत्यवस्तुनः पर्यवसानमस्ति। विज्ञानवादी माध्यमिकानां इव द्विधा सत्तां स्वीकरोति पारमार्थिकी व्यावहारिकी च। लंकावतारसूत्रे बौद्धयोगः योगाचारश्च माध्यमिकतुलनायां अर्वाचीनः निगद्यते। आलयः, मनः, प्रवृत्ति-भेदैः विज्ञानं त्रिधावगम्यते।

**दार्शनिक-सिद्धान्तः** - सौत्रान्तिकानां मते बाह्यार्थस्य सत्ता ज्ञानेन अनुमेया अस्ति प्रतीतेः कारणात् अर्थात् ज्ञानेन विज्ञानवादी अत्र अग्रसरः अस्ति यदि बाह्यार्थस्य सत्ता ज्ञानं अवलम्बितास्ति तर्हि ज्ञानमेव यथार्थसत्तास्ति। विज्ञानं विज्ञप्तिः वा एकमात्रं परमार्थोऽस्ति। जगतः पदार्थः माया-मरीचिका इव निःस्वभावः स्वप्नवत् च निरूपाख्योऽस्ति। विश्लेषणेन कस्यचित् वस्तुनः रंगः आकारः रुक्षत्वं वा प्राप्यते । अनेन ऋतस्य कस्यचित् वस्तुस्वभावस्य परिचयं वयं न लभामहे, यतः यदि बाह्यपदार्थः अणुरूपः तर्हि तस्य ज्ञानं न भवितुं शक्नोति। यदि स प्रविचयरूपोऽस्ति तर्हि (अनेकपरमाणूनां संघातात् समुद्भूतः) तस्य ज्ञानं असंभवमस्ति यतः अस्य प्रत्यंगस्य एककालिकं ज्ञानं संभवं न भवितुं शक्नोति। अतः सत्ता केवलं एकस्येव पदार्थस्यास्ति, पदार्थ एव विज्ञानमस्ति।

विज्ञानवादी विशुद्धप्रत्ययवादी अस्ति-भौतिकपदार्थः नितरां असिद्धोऽस्ति। विज्ञानमेव बाह्यपदार्थस्याभावेऽपि सत्यपदार्थोऽस्ति। इदं स्वसत्तार्थं किमपि

अवलम्बनं न वाञ्छति । अनेन विना एव इदं सिद्धं अतएव इदं निरालम्बनवादी इति कथ्यते ।

अस्य दृष्टौ शून्यवादः हेयः अस्ति यतः यदा प्रतिवादिनां अभिप्रायं अवगम्य तस्य युक्तीः खण्डयति तदा वयं शून्यवादं तिरस्कुर्मः। योगाचारस्य कथनमस्ति-

१ - **त्वयोक्तसर्वशून्यत्वे प्रमाणं शून्यमेव ते।**
**अतो वादेऽधिकारस्ते न परेणोपपद्यते ।।**

२ - **स्वपक्षस्थापनं तद्वत् परपक्षस्य दूषणाम् ।**
**कथं करोत्यत्र भवान् विपरीतं वदेन्न किम् ।।**

**सत्तामीमांसा** - योगाचारमते सत्ता माध्यमिकमतवत् द्विविधा मन्यते-१-पारमार्थिकी २-व्यावहारिकी। व्यवहार-सत्तां द्वयोः भागयोः विभक्तं करोति १-परिकल्पित-सत्ता २-परतन्त्र-सत्ता च। अद्वैत-वेदान्तीनामिव एषां कथनमस्ति यत् जगतः सकल व्यवहारः आंरोपं उपचारं वा अवलम्बते । वस्तुनि अवस्तुनः आरोपः अध्यारोपः इति कथ्यते। यथा-रज्जौ सर्पस्य आरोपः। तत् वस्तु यस्मात् रज्जुः घटयति सा परिनिष्पन्नसत्ता अस्ति। अत्र सर्पस्य ज्ञानं परिकल्पितं रज्जोः सत्ता च परतन्त्रशब्देन अभिहिता भवति।

**लंकावतारसूत्रे त्रिविधसत्ता** - अत्र परमार्थसंवृत्तयोः भेदः दृश्यते। परमार्थसत्यस्य सम्बन्धः अनेन ज्ञानेन भवति-अस्य नामान्तरं भूतकोटिः अस्ति। संवृत्तिः तस्य प्रतिबिम्बमात्रमस्ति। यस्यार्थः बुद्धिः अस्ति या द्विविधा उच्यते १- प्रविचयबुद्धिः २ - प्रतिष्ठापिका बुद्धिः। प्रविचयबुद्ध्या पदार्थानां यथार्थरूपस्य ग्रहणं क्रियते शून्यवादिनामेव -

**बुद्ध्या विवेच्यमानानां स्वभावो नावधार्यते ।**
**तस्मादनभिलाप्यास्ते निःस्वभावाश्च देशितः ।।**

वस्तु-तत्त्वस्य इदं विवेचनं प्रविचयबुद्धेः कार्यमस्ति ।

प्रतिष्ठापकबुद्धया भेद -प्रपञ्चः अभाषितो भवति। अयं प्रतिष्ठापन-व्यापारः 'समारोपः' इति कथ्यते। लक्षणं, इष्टं हेतुः भावश्च-एषां चतुर्णां आरोपः भवति। यं लक्षणं भावः वा वस्तुनि स्वयं उपस्थितं न भवेत् तस्य

कल्पनं प्रतिष्ठापनं इति कथ्यते। लोक-व्यवहारस्य मूले इदं सदा प्रवर्तते। अस्याः प्रतिष्ठापिकाबुद्धेः अतिक्रमणं योगिजनस्य प्रधानं कार्यं अस्ति। परिकल्पितपरतन्त्रसत्ययोः परस्परं भेदः अस्ति। परतन्त्रबाह्यसत्यं सापेक्षमस्ति।

**१- परिकल्पितसत्ता-** यस्मिन् वस्तुनः नाम अर्थः वा नाम्नः प्रयोगः वा संकल्पेन कुर्यात् ।

**२-परतन्त्र सत्ता -**. इयं भ्रान्तेः कारणमस्ति। एषा स्वयं न उत्पद्यते अपितु हेतुप्रत्ययात् उत्पद्यते। परिकल्पितलक्षणे ग्राह्य-ग्राहक भावः स्पष्टतया उदयति परं भेदस्य कल्पना नितान्तभ्रान्तिः अस्ति। सा परतन्त्रसत्ता, यस्यां ग्राह्यग्राहकयोः त्रिविधलक्षणानि कल्पनायां अवलम्बयेयुः। ग्राह्यस्य त्रिभेदमसंगः स्वीकरोति स्म १ - पदाभासः (शब्दः) २- अर्थाभासः (अर्थः) ३ - देहाभासः (कायः)। ग्राहकस्यापि त्रिभेदाः सन्ति क- मनः, ख- उद्ग्रहः (चक्षुर्विज्ञानमादि पञ्चेन्द्रियविज्ञानम्), ग- विकल्पः। ग्राह्यग्राहकयोः त्रिभेदाः यस्यां अवस्थायां उत्पद्यन्ते तस्याः अवस्थायाः सत्ता परतन्त्रसत्ता इति कथ्यते -

**त्रिविधं त्रिविधाभासो ग्राह्यग्राहकलक्षणम् ।**
**अभूतपरिकल्पो हि परतन्त्रस्य लक्षणम् ।।**

ग्राह्य-ग्राहकभावौ परिकल्पितौ यावत् द्विविधकल्पना विद्यते। यस्मिन् काले उभौ भावौ निवर्तेते, तात्कालिकावस्थो **परिनिष्पन्ना-लक्षणा** कथ्यते। परतन्त्रपरिकल्पितयोः मिश्रणं यदा समाप्नोति तदा परिनिष्पन्नावस्था भवति। कल्पनया विना उपशमतः परमार्थतत्त्वस्य प्रतीतिः कथमपि न भवति ।

आचार्य असंगः महायानसूत्रालंकारे सत्यस्य त्रिविधप्रकारस्य वर्णनं अतीवं सुन्दररूपेण अकरोत्।

## आधार-ग्रन्थाः


●बौद्धधर्म के विकास का इतिहास

●बौद्धदर्शन मीमांसा

●महायान-शांति भिक्षु शास्त्री


---

# शून्यवादः

माध्यमिकजनाः परमार्थसत्यं "शून्य" इति नाम्ना कथयन्ति। अत एव एषाम् आचार्याणां मतं शून्यवादस्य नाम्ना प्रसिद्धमस्ति। अस्य शून्यवादस्य तात्त्विकस्वरूपस्य निरूपणे विद्वत्सु सातिशयं वैमत्यम् उपलभ्यते। हीनयानीयाचार्यैः ब्राह्मण-जैन-विद्वद्भिश्च शून्यशब्दस्यार्थः सर्वत्र सकलसत्तायाः निषेधोऽभावः वा कृतः, परं माध्यमिकाचार्याणां मौलिक-ग्रन्थानामनुशीलनेन अस्य अभिप्रायः नास्ति अभावः। कस्यचिदपि पदार्थस्य स्वरूप-निर्णये चतुर्कोटीनां प्रयोगः सम्भाव्यः प्रतीयते-अस्ति (विद्यते), नास्ति (न विद्यते), तदुभयं (अस्ति नास्ति च उभयं), नोभयं (न च अस्ति, न च नास्ति)। 'अस्ति' 'नास्ति' च अस्याः द्विविधकल्पनायाः निषेधः। एषां कोटीनां सम्बन्धः सांसारिक-पदार्थे नास्ति, परं परमार्थ-मनोवाण्या अगोचरात् नितराम् अनिर्वाच्योऽस्ति। चतुर्विधकोटीनां साहाय्येन तस्य निर्वचनं-वर्णनं लक्षणं वा कथमपि न कर्तुं शक्यते। सविशेषवस्तुनः निर्वचनं भवति। निर्विशेषवस्तु कथमपि निर्वचनस्य विषयः न भवितुं शक्नोति। अस्मात् कारणाद् अनिर्वचनीयत्वं सूचयितुं परमतत्त्वस्य 'शून्यभावः' प्रयुज्यते। परमार्थ चतुष्कोटयः विनिर्मुक्ताः सन्ति-

**न सन् नासन् न सदसन्न चाप्यनुभयात्मकम् ।**
**चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकाः विदुः।।** -माध्यमिककारिका १/७

शून्यस्य प्रयोगः विशिष्ट-सिद्धान्तस्य सूचकोऽस्ति अस्य अपरनाम-माध्यमिकः अस्ति। शून्यवादानुसारं वस्तु न तु ऐकान्तिकं सत् अस्ति न च ऐकान्तिक-असत् प्रत्युत् तस्य स्वरूपं सद् असतोः मध्ये बिन्दौ एव निर्णीतं भवितुं शक्नोति यत् शून्यरूपमेव भविष्यति। शून्यः अभावो न, यतः अभावस्य कल्पना सापेक्षकल्पना अस्ति-अभावोऽपि भावम् अपेक्ष्यते परन्तु शून्यभावः परमार्थस्य सूचकत्वात् स्वयमेव निरपेक्षोऽस्ति अतः निरपेक्षत्वात् शून्यम्

अभावः न स्वीकर्तुं शक्यते। आध्यात्मिक-मध्यममार्गस्य प्रतिष्ठापकत्वात् अस्य दर्शनस्य नाम 'माध्यमिकम्' इति निगद्यते।

जगतः सकलपदार्थानां पश्चात् किमपि नित्यवस्तु (यथा आत्माद्रव्यः) न विद्यते, प्रत्युत तानि निरालम्बानि निःस्वभावानि च सन्ति-अस्येव ज्ञानं शून्यभावस्य ज्ञानमस्ति। हीनयानिनां मतानुसारं मोक्षः कर्मक्लेशयोः क्षयात् सम्पद्यते, परन्तु मोक्षोपयोगि-साधनानाम् अन्वेषणे विरामः नोचितः । कर्मक्लेशयोः सत्ता संकल्पानां कारणादस्ति। शुभ-संकल्पात् रागः, अशुभ संकल्पात् द्वेषः, विपर्यासस्य संकल्पात् मोहः उदेति, अतएव सूत्रे भगवतः बुद्धस्य गाथा अस्ति -

**गहकारक ! दिट्ठोसि पुनः गेहं न काहसि।**

हे काम ! अहं तव मूलं जानामि। तव मूलं संकल्पितोऽस्ति । अद्याहं तव सङ्कल्पं न करिष्यामि यस्मात् तदुत्पत्तिः न भविष्यति। संकल्पस्य कारणं प्रपञ्चोऽस्ति। प्रपञ्चस्य अर्थोऽस्ति-ज्ञानं-ज्ञेयं, वाच्यं-वाचकः, घटं-पटं, स्त्री-पुरुषः, लाभालाभः, सुखं-दुःखं प्रभृति विचाराः। अस्य प्रपञ्चस्य निरोधः शून्यभाव-सर्वधर्म नैरात्म्य-ज्ञाने भवति। अतः शून्यभावः मोक्षोपयोगी अस्ति। वस्तुनः उपलब्धौ प्रपञ्चस्य जन्म अस्ति। तदुपरान्तं संकल्पैः कर्मक्लेशो उत्पद्यन्ते यस्मात् प्राणी संसारस्य आवागमने भ्रमति परं वस्तुनः अनुपलब्धौ सकलार्थानां मूलप्रपञ्चस्य जन्म एव न भवति। इत्थमेव शून्यभावस्य ज्ञानेन योगी निर्वाणं प्राप्नोति, अत एव सकलप्रपञ्चैः निवृत्तिः शून्यमेव निर्वाणमस्ति। अस्मात् कारणात्, नागार्जुनेन शून्यम् आध्यात्मिकभावाय इयत् महत्त्वं प्रदत्तम्-

**कर्मक्लेशक्षयान्मोक्षः कर्मक्लेशाः विकल्पतः ।**
**ते प्रपंचात् प्रपंचस्तु शून्यतायां निरुध्यते ।।**
**अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपंचितम् ।**
**निर्विकल्पकमनानार्थमेतत् तत्त्वस्य लक्षणम् ।।**

शून्यस्य लक्षणानि इत्थं दातुं पारयामः-इदम् अपरप्रत्यय मास्ति अर्थात् एकेन अपरान् अस्य उपदेष्टुं न शक्यते। प्राणी अस्य तत्त्वस्य अनुभूतिं स्वयमेव कुर्यात्। इदं शान्तम् अर्थात् स्वभावरहितमस्ति। इदं प्रपञ्चैः कदापि प्रपञ्चितं न भवति। अत्र प्रपञ्चस्यार्थोऽस्ति शब्दः यतः सः अर्थस्य प्रपञ्चं

करोति। शून्यार्थस्य प्रतिपादनं केनचिदपि शब्देन कर्तुं न शक्यते, अत एव इदम् अशब्दम् अनक्षरतत्त्वं च कथ्यते।

इदं निर्विकल्पं विकल्पस्यार्थोऽस्ति चित्तप्रचारः अर्थात् चित्तस्य चलनं, चित्तस्य व्यापारो वा। शून्यत्वं चित्तव्यापारस्य अन्तर्गतं नागच्छति, अत एव सूत्रकारस्य कथनमस्ति यस्मिन् परमार्थसत्ये ज्ञानस्य प्रचारः नास्ति, तत्र अक्षरप्रचारः कथं भविष्यति ? अर्थात् इदं तत्त्वं अज्ञेयम् अशब्दं चास्ति ।

इदं अनानार्थम् अर्थात् नानार्थैः विरहितमस्ति। यस्य विषये धर्माणाम् उत्पत्तिः मन्यते, तद्वस्तु नानार्थं भवति, अत एव इदं तत्त्वं नानार्थरहितम् अस्ति। यथा अस्य तत्त्वस्य प्रतिपादनं नागार्जुनः करोति, प्रकारोऽयं प्रकार-निषेधात्मकः भवेत्, परन्तु शून्यतत्त्वम् अभावात्मकं कथमपि नास्ति। जगतः मूले विद्यमानोऽयं भावः पदार्थ एवास्ति। शून्यतामेव प्रतीत्यसमुत्पादोऽस्ति -

**यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।**
**सा प्रज्ञप्तिरुपादाय प्रतिपत् सैव मध्यमा ।।**

शून्यवादस्य निराकरणस्य निमित्तं पूर्वपक्षेण अनेकाः युक्तयः प्रदर्शिताः। आसां विशिष्टं खण्डनं नागार्जुनेन स्व विग्रह-व्यावर्तिन्यां विस्तरेण कृतम्। आचार्यस्य प्रधानं लक्ष्यं तर्केण सह शून्यवादस्य विरोधीनां मुखच्छादनं क्रियते पूर्वपक्षः एवम् अस्ति। वस्तुसारस्य निषेधः सम्यक् न, यतः -

यान् शब्दान् युक्त्या सह प्रयोक्ष्यति, तेऽपि शून्याः असारा एव भविष्यन्ति। यदि न, तर्हि पूर्ववृत्तं यत् सकलवस्तूनि शून्यानि सन्ति, असत्यं भविष्यन्ति। शून्यभावं साधयितुं प्रमाणस्य नितान्तम् अभावोऽस्ति। सकलवस्तूनि यथार्थत्वेन मन्तव्यम्। यतः शुभाशुभं भेदं सर्वे स्वीकुर्वन्ति, असिद्ध-वस्तुनः नाम न प्राप्यते परं जगतः सकलपदार्थानां नाम लभ्यते। यथार्थपदार्थस्य निषेधः युक्तियुक्तं न, प्रतिषेध्यमपि सिद्धं कर्तुं न शक्यते।

अस्य पक्षस्य खण्डनं नागार्जुनेन आभिः युक्तिभिः सह इत्थं कृतम्।

एषां प्रमाणानां भावानां यथार्थत्वं सिद्ध्यति, तानि प्रमाणानि वयं कथमपि साधयितुं न शक्नुमः यतः एतस्यां दशायां तत् प्रमाणं न भूत्वा प्रमेयं भविष्यति। न तु प्रमाणम् अग्निवत् स्वात्म-प्रकाशो भवति।

प्रमेयैः तस्य सिद्धिः न भवितुं शक्यते। प्रमेयस्तु स्वसिद्धये परतन्त्रोऽस्ति, सः प्रमाणानां सिद्धिः कथं करिष्यति ? यदि करिष्यति तर्हि प्रमाणं भविष्यति, न तु प्रमेयः भवितुं शक्यते। न अकस्मात्-संयोगात् प्रमाणं सिद्धयितुं शक्यते। अतः प्रामाण्यवादे नागार्जुनस्य इदं सारगर्भितं मतमस्ति –

**नैव स्वतः प्रसिद्धिर्न परस्परतः परप्रमाणैर्वा।**
**न भवति न च प्रमेयैर्न चाप्यकस्मात् प्रमाणानाम्।।**

भावानां सत्यत्वं शून्यरूपत्वमस्ति। इदं शुभाशुभभावानां विरुद्धं न, एषा भावना प्रतीत्यसमुत्पादस्य कारणात् एव। यदि इदं न मन्येत्, प्रत्युत शुभाशुभभेदः स्वतः परमार्थरूपेण मन्येत् तर्हि सः अचलः एकरसः च। तं ब्रह्मचर्यादीनां अनुष्ठानेन कथमपि परिवर्तितं न कर्तुं शक्यते। शून्येऽभूते सति नाम भवति। नाम्नः कल्पना स्वयं सद्भूता न भूत्वा असद् भूतास्ति। यः पदार्थः सत् स्थिरः अविकारी च भवेत् तस्यैव नाम भविष्यति, यत् असत् भविष्यति, तस्य नाम न भविष्यति इदं कल्पनं नितान्तं निःसारमस्ति।

इत्थं विग्रहव्यावर्तन्यां शून्यवादस्य मौलिक समर्थनमस्ति। प्रमाण विध्वंसने नागार्जुनेन प्रमाणवादः खण्डितः परन्तु इदं खण्डनं परमार्थदृष्ट्या कृतम्। व्यावहारिकजीवने सर्वथा मननीयम् अस्ति। प्रमाणानां खण्डनं आचार्येण प्राबाल्येन कृतम् यत् भूतकालिकशताब्दिषु इदं माध्यमिक–मतं वस्तुस्थितिपोषकस्य स्थाने सर्वविध्वंसकनास्तिकवादः जातः।

शून्यस्य यथार्थस्वरूपस्य प्राप्तये महायानग्रन्थेषु शून्यस्य विविधप्रकाराणां विशदं वर्णनं प्राप्यते। यस्य निर्वाणस्योपलब्धेः निमित्तं बोधिसत्त्वाय ज्ञातुं नितान्तं आवश्यकमस्ति। शून्यस्य ज्ञानं बोधिसत्त्वस्य प्रज्ञासंभारस्यान्तर्गतं भवति। शून्यभावस्य विंशतिप्रकाराणाम् अध्ययनेन शून्यस्य विशालं व्यापकं च कल्पनं अस्माकं पुरः उपतिष्ठति। अस्य जगतः कश्चिदपि पदार्थः किञ्चिदपि कल्पनं काचिदपि धारणा एकान्ततः सत्यं न। अस्यैव तत्त्वस्य संक्षिप्तं प्रकाशनं शून्यशब्देन अभिव्यज्यते।

# शून्यवादः आक्षेपः परिहारश्च
## (आचार्यनागार्जुनकृतशून्यतासप्ततेः सन्दर्भे)

आचार्यनागार्जुनेन विरचितमध्यमकशास्त्रेषु षट्महाकृतयः 'युक्तिषड्वर्गः" इति नाम्ना भोटविद्वत्सु प्रसिद्धाः सन्ति, एषु 'शून्यतासप्ततिः' इति ग्रन्थरत्नमेकमस्ति। 'शून्यतासप्ततिः' इति ग्रन्थरत्नम् आचार्य सेम्पादोर्जे महाभागेन भोटभाषया संस्कृतवृत्तिसहितं हिन्दीभाषायामनूदितम् यत् केन्द्रीय-तिब्बतन-उच्चतर-संस्थानम्, सारनाथम्, वाराणसीस्थानात् प्रकाशितमस्ति।

आचार्यनागार्जुनेन शून्यवादसिद्धान्तविशेषस्य स्थापना कृता। शून्यतासप्ततौ शून्यवादेन सम्बन्धिताः आक्षेपाः परिहाराः च प्रस्तूयन्तेऽत्र। नागार्जुनाचार्येण मूलमाध्यमिककारिकायां शून्यवादः प्रतिपाद्यते स्म, पश्चात् प्रतिपक्षिभिः शून्यवादस्य मान्यतासु आक्षेपाः प्रस्तूयन्ते, तेषामाक्षेपानामुत्तरस्वरूपमाचार्यनागार्जुनेन 'विग्रहव्यावर्तनी' 'शून्यतासप्ततिः' इति ग्रन्थरत्नद्वयं विरचितम्। शून्यतासप्ततेः प्रारम्भरे एव स्पष्टीकरणेन भवति यत् भगवता बुद्धेन उत्पाद-स्थिति-भङ्ग-सत्-असत्-हीन-मध्य-उत्तमादीनां या देशना कृता सा लौकिक व्यवहारवशात् कृता तात्त्विकदृष्ट्या न, यथा-

**उत्पादस्थितिभङ्गास्ति नास्तिहीनसमोत्तमम्।**
**लौकिकव्यवहारात्तु बुद्धेनोक्तं न तत्त्वतः।।** शून्यता सप्ततिः, १

सन्दर्भेऽस्मिन् प्रतिपक्षी प्रश्नं करोति-यत् आत्मेत्यादिः योऽभिहितः, स नास्ति किम् ? आत्मा नास्तीत्यपि बुद्धिप्रवृत्तेः अवश्यमेवास्त्यात्मा ?

अर्थात्- अवश्यमेवात्मा भवितव्यः। अस्योत्तरं नागार्जुनेन एवं प्रतिपादितम्

**आत्मा काश्चिन्न चानात्माह्यात्मानात्मेतरश्च न।**
**वाच्यः सर्वः स्वभावेन शून्यो निर्वाणसदृशः।।२।।**

आत्मा-अनात्मा-आत्मानात्मा-एतेभ्यः इतरः कोऽप्यभिधेयः विषयः

पक्षः वा नास्ति यतः सर्वे भावाः निर्वाणसदृशाः स्वभावेन शून्याः सन्ति।

सर्वेषां भावानां निः स्वभावे कथने प्रतिपक्षी पृच्छति यत् 'सर्वे भावाः स्वभावशून्याः' किमितीयं राजाज्ञा? आहोस्वित् 'सर्वे भावाः स्वभावशून्याः' इत्यवगमयितुमस्ति काचिद् युक्तिरपि? अस्योत्तरे सर्वेषां भावानां शून्यत्वं एवं प्रतिपाद्यते आचार्यनागार्जुनेन यत् सर्वेषां भावानां स्वभावः हेतुः प्रत्यायानां सामग्रयां, तेषां पृथक्क् पृथक् अवस्थासु अत एव शून्यमेव विद्यते। भावानामुत्पादो न भवति यतः सः न विद्यते। अभावस्योत्पादः न भवति यतः सः असदस्ति विरुद्धस्वभावाच्च सदसत् नोत्पद्यते यथा-

**भावो नोत्पद्यते भावान् नाभवोऽविद्यमानतः।**
**सदसन्न विरोधान्न स्थितिभङ्गो ह्यजातितः।।४।।**

उत्पन्नपदार्थः नोत्पद्यते यतः तस्योत्पादः पूर्वमेव जातः। यस्योत्पादः पूर्वमेवास्ति सः नोत्पद्यते, इत्यादयः यथा-

**न जायते यदा जातं, नाजातमपि जायते।**
**जाता जाताच्च नैवं हि जायमानोऽपि जायते।।५।।**

एवमेव प्रतिपक्षिभिः संख्यायाः सत्ता, प्रतीत्यसमुत्पादः, हेतुः, निर्वाणं, कालसत्ता, संस्कृत-असंस्कृतधर्मः, कर्मफलं, अस्तित्त्वं-नास्तित्त्वं, रूपादिमहाभूतं, विज्ञानम्, अनित्यत्वं, कर्म, अविद्या, भावरित्यादयराक्षेपाः प्रस्तूयन्ते। बिन्दूना-मेषामुक्तीनामाधारेण बुद्धवचनानाञ्चाधारेऽऽचार्यनागार्जुनेन स्वमतानुसारमुप-स्थापनस्य प्रयासः कृतः। उत्पादस्थिति-भङ्गरहितानां बुद्धवचनानामेवाधारे सर्वान् निःस्वभावत्वेन प्रतिपादयति स्म।

यदाचार्यनागार्जुनेन विविधपदार्थानामस्तित्त्वं खण्ड़ितम् तदा प्रतिपक्षिभिः कथितम् यत् यदि भवता भावः न स्वीकृतः तदा भावः स्वीकर्तव्यः। अस्योत्तरे एवं कथ्यते यत् भावं विना न विद्यतेऽभावः। भावोऽपि न तु स्वतरुत्पद्यते न च परतः।

यदि भावस्य सत्ता भवेत् तर्हि स नित्यः भविष्यति यदि च नास्ति तर्हि उच्छेदः। यदि उभौ स्तः तर्हि परस्परं विरोधः भविष्यति अत एव भावं स्वीकर्तुं

न शक्यते। यदि भावः सदस्ति तर्हि शाश्वतस्य प्रसङ्गो भविष्यति यदि च भावः नास्ति तर्हि उच्छदेस्य प्रसङ्गो भविष्यति। तेषां भावः स्वीकर्त्तुं न शक्यते।

सर्वान् भावान् परमार्थरूपत्वेन प्रतीत्यसमुत्पन्नं स्वभावशून्यं प्रतिपादयन् एवमुच्यते यत् तथागतेन लोकदेशनानां भङ्गोऽपि न क्रियते तत्त्वतः कस्यचिदपि धर्मस्य देशनापि न क्रियते। तथागतस्य देशनानामज्ञानात् अनेन निर्विकल्प-प्रतिपत्तिना जनाः भयभीताः भवन्ति यथा-

**लोकभासनभङ्गो न धर्मः कश्चिन्न तत्त्वतः।**
**भीतोऽज्ञोऽकल्पनिर्हारे सौगते वचने त्वतः।।७०।।**

श्रद्धावान् तत्त्वान्वेषणे व्यस्तरुपदिष्टे कस्मिञ्चिदपि धर्मे चास्थितः सन् कश्चनापि (पुद्गलः) अस्यां प्रतिपत्तौ युक्त्यानुसरन् तदन्वयाभिलाषुकः भावाभावौ (प्रपञ्चौ) प्रहाणोपशान्तो भवति यथा-

**तत्त्वान्वीक्षारतः श्राद्ध उक्ते कुत्रापि न स्थितः।**
**प्राप्य युक्त्या नयं शान्तः भावाभावप्रहाणतः।।७२।।**

इदं प्रत्ययतामवगम्य कुदृष्टिकल्पना-जालं विनिवृत्तं भवति फलतः राग-द्वेष-मोहविरहितं भूत्वा सोऽस्पष्टे (अप्रतिष्ठिते) निर्वाणे उत्पद्यते यथा-

**इदम्प्रत्यताज्ञानात् दृष्टिजालविनिर्गतः।**
**अस्पष्टं याति निर्वाणं रागप्रतिघमोहहः।।७३।।**

सर्वेषां भावानां स्वभावतः शून्यत्वात् भगवता तथागतेन भावानां प्रतीत्यसमुत्पादः देशितः। परमार्थं तु मात्रं इयतमेवास्ति। भगवता बुद्धेन लोकव्यवहारस्यापेक्षया सर्वविधधर्माणां यथार्थतः प्रज्ञापनं कृतम्।

एवमेव नागार्जुनाचार्येण शून्यतासप्ततौ शून्यता-स्थापनस्याक्षेपानां परिहारः कुर्वता शून्यवादः पुनरपि स्थापितः।

**संदर्भसंकेतः**

१. क. मूलमध्यमकारिका ख. विग्रहव्यावर्तनी ग. रत्नावली घ. शून्यतासप्ततिः ङ. युक्तिषटिका- (भोट एवं चीनी अनुवादे) च-वैदल्यसूत्रम्।

# बौद्धन्यायस्य वैशिष्ट्यम्

सर्वासु न्यायपरम्परासु प्रमाणस्य स्वरूपं, प्रकारः, प्रामाणिकता प्रभृतयः विषयाः विवेच्यन्ते परं मतभेदाः दृश्यन्ते। मतभेदा अपि तत्त्वविचारसदृशाः वर्तन्तेऽतएवात्रापि खण्डन-मण्डनयोः प्रक्रिया प्रचलति। सर्वाणि तर्कशास्त्राणि परस्परं सहयोगत्वेन प्रतिपक्षित्वेन वा दृश्यन्ते।

सकलप्रमेयपदार्थानां ज्ञानं प्रमाणेन भवति। प्रमाणस्याभावे प्रमेयार्थस्य ज्ञानं न संभाव्यते, अत एव भारतीयेषु दर्शनेषु एकेन मतेन स्वीक्रियते यत् प्रमेयार्थस्य सिद्धिः प्रमाणाधीनाऽस्ति। सांख्यदर्शने ईश्वरकृष्णः **'प्रमेयसिद्धिः प्रमाणाद्धिः'** इति उक्तवान्। बौद्धदार्शनिकौ दिङ्नागः प्रज्ञाकरगुप्त अपि 'प्रमाणाधीनो हि प्रमेयाधिगमः' इति कथयित्वा पुष्टमिदं कृतवन्तौ। जैनदार्शनिकः उमास्वामिः **'प्रमाणनयैरधिगमः'** इति सूत्रेण प्रमाणं नयं च अर्थाधिगमस्य करणम् इति प्रतिपादितवान्।

प्रमाणेन प्रमेय-ज्ञानं भवति। सकलभारतीयदर्शनैः स्वीकृतोऽयं सिद्धान्तोऽस्ति अत एव न्याय-वैशेषिकसांख्य-योग-पूर्वमीमांसा- उत्तरमीमांसा-जैन-बौद्ध-चार्वाक-प्रभृति सकलदर्शनेषु प्रमाणशास्त्रीयग्रन्थानां प्रणयनमभवत्।

ज्ञानस्य प्रमाणस्य वा स्वरूपे मतभेदाः सन्ति-किमपि ज्ञानं गुणत्वेन स्वीकरोति यथा न्याय-वैशेषिकः। मीमांसकाः ज्ञानं क्रियारूपेण व्यापारत्वेन वा स्वीकुरुतः। वेदान्तः उपनिषदः च ज्ञानं द्रव्यत्वेन स्वीकुरुतः हीनयानिबौद्धः सांख्यश्च ज्ञानं सम्बन्धत्वेन स्वीकुरुतः।

प्रमाणस्य प्रकारेऽपि मतभेदाः सन्ति-

**चार्वाकः** मात्रं प्रत्यक्षं प्रमाणं स्वीकरोति। **बौद्धः वैशेषिकश्च** प्रत्यक्षम् अनुमानं च, **सांख्यः** जैनश्च प्रत्यक्षम्, अनुमानं, शब्दं (आप्तं) त्रिविधं स्वीकुरुतः, **नैयायिकः** प्रत्यक्षं, अनुमानं, उपमानं शब्दं च चतुर्विधं स्वीकरोति। **प्रभाकरः**

(मीमांसकः) एभिः चतुर्भिः सह अर्थापत्तिं स्वीकरोति, **कुमारिलभट्टः (मीमांसकः)** उक्त पञ्चभिः सह अनुपलब्धिं स्वीकरोति।

सम्भवं, ऐतिह्यं चेष्टा परिशेषं च प्रमाणं **पौराणिकाः तान्त्रिकाः गणितज्ञश्च** स्वीकुर्वन्ति। बौद्धन्यायस्य सूत्रपातः पिटककाले एवाभवत् यस्य प्रतिछविः विनयपिटकस्य चतुर्विधेषु अधिकरणेषु प्राप्यते। इमानि चतुर्विधानि अधिकरणानि सन्ति- १. **विवादाधिकरणं**-विभिन्न विषयाणां निर्णयः २. **अनुवादाधिकरणम्**- सः विषयः यत्र एकः पक्षः अपर पक्षस्य नियमम् उल्लङ्घ्य दोषरूपेण निगदति। ३. **आपत्ताधिकरणम्**-सः विषयः य कोऽपि भिक्षुः आचारस्य किमपि नियमं सिद्धान्तमुल्लघिंनवान्। ४. **किच्चाधिकरणम्**-संघस्य कस्यचित् नियमस्य विषये विचारोऽस्ति, किन्त्वस्य क्रमिकः विकासः बौद्धदर्शनस्य चतुर्सम्प्रदायेषु वैभाषिके, सौत्रान्तिके, माध्यमिके योगाचारे चाभवत् तथाप्यस्य स्फुटं रूपं नागार्जुनस्य वसुबन्धोः च ग्रन्थेषु परिलक्ष्यते। दिङ्नागेन बौद्धन्यायः सम्बर्धितः स तु बौद्धन्यायस्य संस्थापकत्वेन सम्बोध्यते।

भगवतः बुद्धस्य तत्त्वज्ञानाय सर्वजनेषु प्रचारस्य गहनप्रेरणासीत्। स्वमतस्य स्थापना परमत-खण्ड़नं विना न सम्भवमासीत्, अत एव भगवान् बुद्धः स्वयमेव स्वकीय समसामयिकमतानाम् आलोचनां कृतवान् स्वस्य अनुयायियानस्य कृते प्रेरितवान्। पालि-त्रिपिटके सर्वत्र एव तेषां प्रभावशालि प्रवचनस्य तर्कपूर्णशैल्यां च वादस्य विधिः परिलक्ष्यते। उदानस्य 'आयुसङ्खा-रोस्सज्जनसुत्त (६/१) इत्यस्यानुसारं बुद्धस्य वृद्धे भूते मारः पुनराक्रमणं कृतवान् कथितवान् च यत् अधुना भवान् आयुसंस्कारं समाप्य निर्वाणलाभं करोतु। अस्योत्तरे भगवान् बुद्धः कथितवान्-

**"न तावाहं पापिम, परिनिब्बायिस्सामि याव मे भिक्खू-उप्पन्नं परप्पवादं सहधम्मेन सनिग्गहितं निग्गहेत्वा सप्पाटिहारियं धम्मं देसेस्सन्तीति।"**

-यावत्कालपर्यन्तम् अस्माकं भिक्षवः तर्के युक्त्यां च पटवः न भवेयुः, प्रतिपक्षिभिः कृतप्रश्नानां पूर्णं समाधानं कुर्युः तावत्कालपर्यन्तमहं निर्वाणलाभं न करिष्यामि। आचार्य धर्मकीर्तिः सुप्रसिद्धग्रन्थे प्रमाणवार्तिके (१/२८७) बौद्धप्रमाणमीमांसायाः सम्बन्धम् बुद्धवचनैः स्थापयनकथयत् यत् **"यत्किञ्चिदुदयधर्मकं तत्सर्वं**

**निरोध-धर्मकम्"** इत्यादिवचनैः भगवान् बुद्धः उत्पत्ति-निरोधरूप-साध्य-साधनयोर्मध्ये व्याप्तिं निगद्य अनुमानस्य प्रयोगं प्रदर्शितवान् अनेन च व्याप्तेः अविनाभावित्त्वं इति लक्षणं स्फुटति। धर्मचक्रप्रवर्तने सूत्रे भगवता बुद्धेनार्यअष्टांगिकमार्गेषु सम्मादिट्टि (सम्यदृष्टिं) सर्वप्रथमं सर्वप्रमुखं च स्थानं प्राप्तम्। सकल बौद्धन्यायेऽस्य सम्यग्दृष्टेः विकासोऽभवत्। धर्मकीर्तेरनुसारं सर्वेषां पुरुषार्थानां सिद्धिः, कस्यचित् वस्तुनः ग्रहणं त्यागः वा सम्यग्दृष्ट्या सम्भाव्यते। अत एव सकल बौद्धाः स्वरेणैकेन प्रमाणस्य प्रथमं लक्षणं सम्यग्ज्ञानं इति कुर्वन्ति तत्पश्चात् सम्यक्त्वस्य विशद् व्याख्यां कुर्वन्ति।

दिङ्नागात्पूर्वं गौतमस्य न्यायसूत्रे वात्स्यायनेन भाष्यः लिखितः किन्तु भाष्यस्य प्रतिद्वंन्द्विन्यायस्य कोऽपि ग्रन्थः नासीत्। दिङ्नागेन नवीना दिशा प्रदर्शिता, बौद्धविज्ञानवाददृष्ट्या सौत्रान्तिकदृष्टेरपि समावेशं कुर्वन् न्यायस्य नवीना स्थापना कृता। यदि दिङ्नागः न्यायविषयकरचनां कुर्यात् तर्हि न्यायशास्त्रस्य यः विशालः वाङ्मयः रच्यते सम्भवतः सः न नाधुना प्राप्यते। दिङ्नागेन न्यायशास्त्रस्य विस्तरणे प्रदीपस्य कार्यं कृतम्।

दिङ्नागस्य प्रसिद्धे ग्रन्थे बौद्धसमुच्चये बौद्धसिद्धान्तेषु कृत-आक्षेपानामुत्तराणि दीयन्ते, अपि च गौतमीयन्यायस्य विशेषतः वात्स्यायनस्य सिद्धान्तानां कटु आलोचना क्रियते। दिङनागस्य प्रमाणसमुच्चयस्य खण्डनाय वात्स्यायनस्य च मतस्य रक्षायै उद्योतकरभारद्वाजेन न्यायवार्तिकस्य रचना कृता। उद्योतकरस्य युक्तीनां खण्डनाय स्वपक्षस्य स्थापनाय च धर्मकीर्तिना प्रमाणवार्तिकम् विरचितम्, यस्य प्रत्युत्तरे वाचस्पतिमिश्रेण न्यायवार्तिके तात्पर्यटीका लिखिता। एवं कथ्यते यत् धर्मकीर्तेः प्रहारेण पीड़ितस्योद्योतकरस्य वाणीरूपिधेनोरुद्धाराय वाचस्पातिमिश्रः तात्पर्यटीकां लिखितवान्। बौद्धनैयायिकानां खण्डने उदयनाचार्यः न्यायवार्तिक-तात्पर्य-परिशुद्धेः रचनामकरोत्। एवमेव गौतमीय न्यायः बौद्धन्यायश्च उभौ वादि-प्रतिवादिरूपेण बहुकालपर्यन्तं प्रवर्तते। प्राचीन-भारतीय-दर्शनानां प्रज्ञाप्रकर्षः बौद्धानां दार्शनिक-स्थापनाभिः तेषां च वाद-विवादेन सम्भाव्यते स्म। विकास-क्रमोऽयमवगम्यैवास्य लक्षणानां वैशिष्ट्यमवगन्तुं शक्यते।

भारतीयदर्शने प्रयुक्ताः शब्दाः बौद्धदर्शनेऽपि प्रयुज्यन्ते परं तेषामर्थाः विशिष्टाः सन्ति, ते समान-अभिप्रायं न निगद्यन्ते। बौद्ध-पारिभाषिक-शब्दानां स्वकीयः विशिष्टोऽर्थोऽस्ति। प्रमाणमीमांसायां प्रमेयव्यवस्थायामपि बौद्धानां सांख्य-वैशेषिक-न्यायादिषु मौलिकभेदाः सन्ति। दर्शन-न्याययोः मौलिक भेदस्य कारणं बौद्धानां वेद-ईश्वर-आत्मनादीनामस्वीकर्ता त्वस्त्येव, बौद्धानां स्वकीयाः सिद्धान्ताः-अनित्यता, क्षणभंगुरता, शून्यता, विज्ञप्तिमात्रता च मूलरूपेण वर्तन्ते। एतन्मौलिकभेदान् विचारयन् प्रमाण-लक्षणं, प्रमाण-व्यवस्था च क्रियते।

प्रत्यक्षशब्दस्य बौद्धसम्मतोऽर्थोऽस्ति-अर्थक्रियाकारिता। नैयायिकादिदार्शनिकाः अक्षाश्रितज्ञानस्यार्थे प्रत्यक्षस्य प्रयोगं कुर्वन्ति अत एव तैः प्रत्यक्षस्य लक्षणं इन्द्रियार्थ-सन्निकर्षज्ञानं कृतम्। अर्थ-साक्षात्कारत्वात् बौद्धाः इन्द्रियविज्ञानमतिरिक्तमन्यविधं प्रत्यक्षस्य प्रकारं-स्वसंवेदनं, मानस-योगिज्ञानमपि प्रत्यक्षस्य अन्तर्गतं स्वीकृतवन्तः। बौद्धसम्मत चतुर्विध-ज्ञानानां संग्राहकम् एकं प्रत्यक्षलक्षणमस्ति-**'कल्पनापोढमभ्रान्तम् प्रत्यक्षम्।'** प्रत्यक्षज्ञानं कल्पना स्वभावरहितं भवितव्यम् तञ्चार्थक्रियाक्षमवस्तूनि केनचिदपि प्रकारेण विपर्ययस्तं भ्रान्तं न भवितव्यम्। कल्पनाम् अपेत्य बौद्धानां प्रत्यक्षलक्षणस्य हृदयोऽस्ति। कल्पनाऽस्ति- वाचकशब्देन वाच्यार्थस्य सम्बन्धः। यदि एकस्मिन् ज्ञाने अभिधेयवस्तुनोऽऽकारेण सहाभिधानस्य (वाचक शब्दस्य) आकारः प्राप्येत् तर्हि कल्पना-ज्ञानमिति कथ्यते। प्रत्यक्षज्ञानं एवंविधस्य कल्पनया रहितं भवितव्यम्। एवं बौद्धमते निर्विकल्पं प्रत्यक्षं मान्यमस्ति। वैयाकरणाः चार्वाकाश्च प्रत्यक्षं सविकल्पं इति स्वीकुर्वन्ति। नैयायिकाः मीमांसकाश्च निर्विकल्पकं सविकल्पकं च उभे मन्यन्ते। बौद्धमतेऽपि एकप्रकारस्य सविकल्पं भवति यः प्रत्यक्ष-पृष्ठभावी विकल्पः कथ्यते, तस्मात् प्रत्यक्षस्थले वस्तुनः निश्चयः भवति किन्तु इदं नैयायिकादीनां सविकल्पप्रत्यक्षात् सर्वथा भिन्नमस्ति।

अनुमानज्ञानं लिङ्ग (हेतु) ग्रहणस्य साध्य-साधनयोः च सम्बन्धस्मरणस्य (व्याप्ति ज्ञानस्य) पश्चाद् भवति। धूमस्य पर्वते (पक्ष-धर्म) ग्रहणस्य पश्चात् साध्यसाधनयोश्च सम्बन्धस्मरणस्य पश्चात् अस्य मानस्य भूतत्वात् अनुमानम् इति कथ्यते। अनुमानस्य द्वौ भेदौ स्तः-स्वार्थः परार्थश्च। स्वार्थानुमानं ज्ञानात्मकं

परार्थानुमानं शब्दात्मकं भवति। अनुमानस्य स्वार्थः परार्थः भेदौ बौद्धानां अनुकरणस्याधारे पश्चात् नैयायिकेष्वपि प्रचलितावभवताम्। मीमांसाकाः अनुमानं दुर्बलत्वेन प्रत्यक्षं च प्रबलत्वेन स्वीकुर्वन्ति, अत एव बौद्धेतराः प्रायः सर्वे दार्शनिकाः प्रत्यक्षविरोधे अनुमानेनेऽर्थनिश्चयं न मन्यन्ते। अनुमानाय हेतोः व्याप्तिज्ञानस्य च सर्वोपरि महत्त्वमस्ति। हेतुः त्रिविधं भवति-कार्यं, स्वभावः अनुपलब्धिः च। एषु कार्यं स्वभावश्च विध्यात्मकः विधिः वा हेतू स्तः अनुपलब्धिश्च निषेधहेतुश्चास्ति। बौद्धाः मात्रमभावप्रतीतेः निश्चयोऽनुपलब्धिहेतुना अनुमानेन कुर्वन्ति।

अनुमानाय त्रिविधहेतवः स्वीक्रियन्ते। अस्योत्तरे बौद्धनैयायिकाः स्वभावप्रतिबन्धद्वारूप व्याप्तेः नियमं प्रस्तुवन्ति। तेषां मते साधनं साध्यं तदेव निश्चितं कर्त्तुं शक्नुवन्ति यदा उभयोः मध्ये स्वभाव-प्रतिबद्धता प्रतिबद्धस्वभावता वा भवेत्। हेतुः साध्येन सह स्वभाव प्रतिबद्धः ययोः, द्वयोः स्थितयोः भवति ते स्तः-तादात्म्यं तदुत्पतिश्च। तादात्म्यस्थले पारमार्थिकरूपेण साध्य-साधनयोरभेदो भवति किन्तु अनयोः विकल्पकृत भेद अपि मन्यते तयोश्च आधारे साध्यसाधनयोः भेद-गर्भितः गम्यगमकभावः भवति। एवमेव निश्चयारूढ़ रूपानां अपेक्षया भेदः किन्तु वास्तविक अभेदः मन्यते। तदुत्पत्तिः तु द्वयोः भिन्नयोः मन्यते। एवमेव लिङ्गं यदि साध्यात् उत्पन्नो भवति तर्हि साध्य-साधनयोः स्वभाव-प्रतिबन्धः निर्बाधरूपेण भवति। एवमेव तादात्म्य-तदुत्पत्तियोराधारेऽबिनाभावरूपव्याप्तिः सिध्यति। बौद्धाः अस्य अनिवार्यस्य अव्यभिचरित नियमस्य चाधारे द्वौ विधिहेतू एकश्च निषेध हेतुः स्वीकुर्वन्ति।

अपोहेन शब्देन विवक्षायाः ज्ञानं दिङ्नागस्य मौलिकताऽस्ति। बौद्धन्यायस्य आचार्येषु नागार्जुनः, वसुबन्धुः दिङ्नागः, धर्मकीर्तिः, धर्मोत्तरः, शान्तरक्षितः, कमलशीलः मोक्षांकरगुप्तः, ज्ञानश्रीरत्नकीर्तिः प्रमुखाः सन्ति।

## आधारग्रन्थाः


१. प्राक्कथनम्-प्रो. जगन्नाथ उपाध्यायः, बौद्धतर्कभाषा, प्राच्य प्रकाशन वाराणसी १९६९

२. बौद्धन्याय-श्चेरवात्स्की ३. बौद्धधर्मदर्शन-आचार्य नरेन्द्रदेव

४. बौद्धन्यायशास्त्र-डॉ. विजयकुमार जैन (अप्रकाशित)

# बौद्धदर्शनसन्दर्भे भारतीयदर्शनेषु साम्य-विवेचनम्

भारतीयदर्शनेषु द्वे धारे प्रचलिते स्तः- श्रमणदर्शनं वैदिकदर्शनञ्च। श्रमणसंस्कृतेः अन्तर्गतं जैनदर्शनं, बौद्धदर्शनं चार्वाकदर्शनं च गण्यन्ते, वैदिकदर्शनेषु अस्मिन् सन्दर्भे एकं कथानकम् उल्लेखनीयमस्ति। स्वामिनः रामानुजाचार्यस्य पृष्ठभागे एकं व्रणमभवत्। तेन स्वप्नमाध्यमेन अनुभूतम् यत् अधर्मस्य खण्डनं बहुविधं कृतम् परं धर्मस्य वार्ता न कृता। अधर्मः पृष्ठभागोऽस्ति, तस्य विषये किमर्थं विचार्यते ? यद् उपस्थितम् तस्य विषये विचारणीयम्, अत एव खण्डनस्यापेक्षया मण्डनस्य चर्चा महत्त्वपूर्णास्ति।

सम्पूर्णधर्माणाम् एकः मापदण्डः भवितव्यः-स करुणाऽस्ति। सम्प्रदायः (मजहब) मानवस्य अपेक्षा अस्ति परं यत्र-तत्र स्थिरता भवितव्या। अद्य निरन्तरं प्रतिस्पर्धा भवति अत एव निरन्तरयात्रार्थं धर्मसम्प्रदायस्य सम्प्रदायोऽपेक्ष्यते (मजहबों के मजहब की जरूरत है) भारतीयसंस्कृतेः बन्धने (पिंजड़े में) प्राणाः अद्यापि प्रताड़यन्ति (छटपटा रहे हैं) अलगाववादः चरमोत्कर्षे दृश्यते, अद्य संस्कृतेः अवशिष्टप्राणस्य अभिज्ञानमस्माभिः (पहचान) करणीयम्। संस्कृतिः मूर्तिमत् रूपत्वेन अवलोकनीयम्, वैषम्यस्य माध्यमेन न, अपितु साम्यस्य माध्यमेन एव द्रष्टुं शक्यते। भारतीयदर्शनेषु साम्यम् इति विषयमवलम्ब्य निश्चितरूपेण राष्ट्रियभावनायाः विकासे वयं योगदानं प्रस्तोतुं शक्ष्यामः।

बौद्धदर्शनं भारतीयदर्शनेषु नास्तिकदर्शनरूपेण गण्यते- **'नास्तिको वेदनिन्दकः।'** परम् आस्तिक-नास्तिकयोः यथार्थं मूल्याङ्कनमपेक्ष्यते। ये पाप-पुण्य-पुनर्जन्मादीनि स्वीकुर्वन्ति, ते. आस्तिकाः सन्ति। पाणिनेः एतत्परिभाषानुसारं बौद्धदर्शनं जैनदर्शनञ्च आस्तिकदर्शनमस्ति। प्रारम्भादेव भारते वैदिकधारा अवैदिकधारा च प्रवहति निरन्तरम्। बौद्धदर्शनं अवैदिकदर्शने श्रमणसंस्कृतेश्चान्तर्गतं वर्ण्यते।

बौद्धदर्शनं भारतीयदर्शनानां प्रभावकः केन्द्रबिन्दु अस्ति। बौद्धदर्शनस्य अन्य भारतीयदर्शनानां च साम्यस्य केचित् पक्षाः प्रस्तूयन्ते यथा-

**बौद्धदर्शनं चार्वाकदर्शनं च-** बौद्धदर्शनं चार्वाकदर्शनं च ईश्वरस्य सत्तां सृष्टिकर्तृत्त्वञ्च न स्वीकुरुतः।

- उभे आत्मनः अस्तित्त्वं नित्यत्त्वं वा न स्वीकुरुतः अपि च, हिंसात्मकयज्ञस्य श्राद्धादीनां च फलं न स्वीकुरुतः। उभे च वेदस्य प्रामाणिकतां न स्वीकुरुतः।

**बौद्धदर्शनं जैनदर्शनं च-** बौद्धदर्शने जैनदर्शने च मूलरूपेण आत्मतत्त्वं विहाय बहुबिन्दुषु साम्यं वर्तते यथा-

- सृष्टिकर्त्तुः ईश्वरस्य सत्तायाः खण्डनम्।
- वेदस्य प्रामाणिकतायाः अस्वीकृतिः।
- द्विविधं प्रमाणं स्वीकृतम्-प्रत्यक्षं अनुमानञ्च।
- प्रमाणस्य परिभाषा समानाऽस्ति- सम्यग्ज्ञानमेवास्ति।
- मोक्षस्य/निर्वाणस्य सिद्धान्ते साम्यम्।
- पञ्चव्रतेषु पञ्चशीलेषु च अद्भुतसाम्यम्।
- उभयोः परम्परयोः अनेके शब्दाः समानरूपेण प्रयुज्यन्ते यथा- जिनः, जिनेन्द्रः, अर्हत्, सम्यग्दर्शनादयः।
- उभौ श्रमणपरम्परायाः पोषकौ धर्मौ स्तः।
- वीतरागतायाः महत्त्वं प्रतिपाद्यते।
- उभयोः परम्परयोः जनभाषायां महत्त्वम् अस्ति- बौद्धपरम्परायां पालिभाषायाः, जैनपरम्परायां प्राकृतभाषायाः पश्चात् आचार्यैः संस्कृतभाषाऽपि स्वीकृता।
- बौद्धपरम्परायां त्रिशरण-गमने जैन- परम्परायां पञ्चपरमेष्ठी-शरणे च साम्यमस्ति।

**वैदिकपरम्परा बौद्धदर्शनं च-** त्रिपिटके वेदकालीन-ब्राह्मणाः प्रशंस्यन्ते। त्रिवेदाः उल्लिख्यन्ते। यद्यपि वेदस्य प्रामाण्यं न स्वीक्रियते वेदस्य च अपौरुषेयत्वेऽपि प्रश्नचिन्हानि प्रस्तूयन्ते दृश्यन्ते च तथापि-

- पालिव्याकरणे वैदिकव्याकरणे च अनेकबिन्दुषु साम्यं दृश्यते यथा देशीयशब्दाः, रूपाणां बाहुल्यम् इत्यादयः।

– पालिसाहित्ये 'ब्रह्मा' इति पदं महत्त्वपूर्णं स्थानं प्राप्नोति। विविध-देवतानां स्थितिः स्वीक्रियते।

– पुनर्जन्मनि, मोक्षे कर्मवादेऽपि सैद्धान्तिकं साम्यमस्ति।

– वैदिकयज्ञानां परिवर्तनस्य, परिमार्जनस्य च प्रयासः क्रियते।

– सिंगालोवादसुत्ते व्यावहारिकपक्षोऽपि प्रस्तूयते।

– 'ब्राह्मण' शब्दस्य महत्त्वं गुणानामाधारेण स्वीक्रियते।

– पालि-त्रिपिटकं वेदसदृशं मान्यमस्ति। महायानपरम्परायां च वैपुल्यसूत्राणि विद्यन्ते।

– सेलसुत्त-मज्झिमनिकाये प्रशंसायां कथ्यते यत् यज्ञेषु मुख्यम् अग्निहोत्रं छन्दषु मुख्या सावित्री।

– उभयोः परम्परयोः ज्ञानस्य महत्त्वं प्रतिपाद्यते।

**उपनिषदः बौद्धदर्शनं च–** उपनिषदि बौद्धपरम्परायां च अनेकबिन्दुषु साम्यं दृश्यते–

**अविद्या–** उपनिषदि सा विद्यास्ति यया अविद्यादिसंसारस्य बीजस्य विशरणं हिंसनं अर्थात् विनाशः भवति–

**"ये मुमुक्षवो दृष्टानुश्रविकविषवितृष्णाः सन्तः उपनिषद्शब्दवाच्यां वक्ष्यमाणलक्षणां विधां**.......इति"

बौद्धदर्शने अविद्यया संसारचक्रं चलति। प्रतीत्यसमुत्पादस्य द्वादशेषु अङ्गेषु प्रथमा अविद्याऽस्ति। चतुरार्यसत्यानाम् अनित्यस्य, दुःखस्य, अनात्मनः अज्ञानमेव 'अविद्याऽस्ति'।

**नामरूपम्–** बौद्धदर्शनम् आत्मनः सत्तां न मन्यते। जन्मपरम्परायां नामरूपेभ्यः षडायतनम् उत्पद्यते स्पष्टरूपेण च कथ्यते यत् इमे नामरूपे न मम स्तः न च अहमस्मि उपनिषदि एवं कथ्यते यत् नाम रूपं प्रति विमोहस्य त्यागः करणीय इति।

–सत्य–श्रद्धा–इन्द्रिय–निग्रह– चित्तशुद्ध्यादय अनेके शब्दाः सन्ति ये उभयोः परम्परयोः सामीप्यं सूचयन्ति।

**मोक्षः-** यथा निरन्तरं प्रवहिताः नद्यः नाम-रूपे विसृज्य समुद्रे विलीनाः भवन्ति तथैव विज्ञानं नामरूपेभ्यः विमुक्तो भूत्वा परात्परं दिव्यं पुरुषं प्राप्नोति।

- बुद्धस्य दर्शनं स्वप्रमाणाय मात्रं तथागतस्य अभिसम्बोधे प्रतिष्ठितमस्ति।

- उपनिषद्- दर्शनस्य सत्यता याज्ञवल्क्य- उद्दालक-श्वेतकेतु-भारद्वाज-महादास-ऐतरेयादिभिः अनेकैः साधकैः साधिकाभिः प्रस्तुता।

- उपनिषदि ऋषिभिः स्वनामानं विहाय कृतित्त्वस्याभिमानं त्यक्तम्। तथागतेनापि न कथ्यते यत् एवं मया कथितम् इति।

-उपनिषदत्सु ऋषिभिः स्वज्ञाने दृष्टम्- **'दिवीव चक्षुरातत**--ऋग्वेदः।

- औपनिषद्-ऋषिभिः बाह्यजगतः अन्वेषणाय महती साधना कृता, 'ब्रह्म' नाम्ना आहूताः। बौद्धपरम्परायां जगदिदं-नामरूपमस्ति। उभे पृथक् पृथक् पदार्थे न स्तः-बाह्यजगत् नामरूपञ्च। सत्यमेकं दर्शनस्य द्वे दृष्टी स्तः।

- आत्मज्ञानस्य द्वौ दिशौ स्तः १. अनात्मपदार्थेषु आत्मबुद्धिः न करणीया २. अपरञ्च परमार्थरूप-अनुभवातीत-नित्य-शुद्ध-बुद्ध-मुक्तस्वभाव-आत्मतत्त्वस्य तादात्म्येन अनुभूतिः।

- प्रथमस्तु साधनपक्षः द्वितीयञ्च साध्यः।

- वाचस्पतिमिश्रेण पञ्चस्कन्धेषु आत्मन अस्वीकरणस्य विचार एव आत्मनः स्थितिं प्रति संकेतयति। - धम्मपदे मनसः प्राधान्यं वर्तते-

**मनोपुब्बंगमा धम्मा मनोसेट्ठा मनोमया।**
**मनसा चे पदुट्ठेन भासति वा करोति वा**
**ततो नं दुक्खमन्वेति चक्कं व वहतो पदम्।।**[1]
**मनोपुब्बंगमा धम्मा मनोसेट्ठा मनोमया।**
**मनसा चे पसन्नेन भासति वा करोति वा।**
**ततो न सुखमन्वेति छाया 'व' अनपायिनी।।'**

- उपनिषदि मनसः प्राधान्यं वर्ण्यते, इन्द्रियेषु मनस एव प्राधान्यमस्ति-

**'मनसा ह्येव पश्यति मनसा श्रृणोति''**[2]

मनसा एव पश्यति मनसा च श्रृणोति। काम-सङ्कल्प-विचिकित्सा श्रद्धा-अश्रद्धा-धृति-अधृति-इत्यादयः मन एव अस्ति।[3]

यथा सूर्ये अस्ते सति सकलानि किरणानि तस्मिन् तेजोमण्डले एकीकृतानि भवन्ति, सूर्ये च उदिते सति तानि पुनरपि प्रस्फुटन्ति, तथैव तानि इन्द्रियाणि प्रधाने मनसि एकीभावं प्राप्नुवन्ति। अस्मात् सः पुरुषः न श्रृणोति, न पश्यति, न वदति, न गृहणाति न च स्पृशति।[4]

**आचार्य गौड़पादः बौद्धदर्शनं च-** भरतसिंहोपाध्यायेन **"बौद्धदर्शन तथा अन्य भारतीय दर्शन"** इत्यस्मिन् ग्रन्थे बौद्धदर्शन-वेदान्तयोः साम्यं प्रस्तूयते। आचार्यः गौडपादः सकलबाह्य-आध्यात्मिक-पदार्थान् स्वप्नवत् वितथं कथयति।

**वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः।**
**अन्तः स्थानान्तु भावानां संवृतत्वेन हेतुना।।**

अदीर्घत्वाच्च कालस्य सत्ता देशान्न पश्यति। प्रतिबुद्धश्च वै सर्वस्मिन् देशे न विद्यते।

**अभावश्च रथादीनां श्रूयते न्यायपूर्वकम्।**
**वैतथ्यं तेन वै प्राप्तं स्वप्नं आहुः प्रकाशितम्।।**

जागृतावस्थाया अनुभवेषु स्वप्नावस्थायाश्च अनुभवेषु आचार्यः कोऽपि विभेदं न पश्यति। सः उभौ समानत्वेन असत्यम् इति स्वीकरोति -

**स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः।**
**भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना।।**

यत् आदौ नास्ति, यच्च अन्ते नास्ति, तत् वस्तुतः वर्तमाने अपि नास्ति। अतः वितथम् अस्ति असत्यमस्ति-

**आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।**
**वितथैः सदृशाः संतोऽवितथा इव लक्षिताः।।**

जागृतावस्थायां भोजनोपरान्तं स्वप्नावस्थायामपि जनः बुभुक्षायाः स्वप्नं द्रष्टुं शक्नोति, एवमेव स्वप्नावस्थायां भोजनोपरान्तमपि जागृते बुभुक्षितः भवितुं शक्नोति तर्हि जागृतावस्थायाः का विशेषता ?

यः कश्चिदपि ग्राह्यग्राहकभावोऽस्ति तत्सर्वं चित्तस्य स्पन्दनमस्ति-

''**चित्तस्पन्दितमेवेदं ग्राह्यग्राहक-वद्द्वयम्** स्वप्नमयजीवस्य यथा मरणं जीवनं चास्ति, मायामयजीवस्य यथा मरणं जीवनं चास्ति, निर्मितकजीवस्य यथा जीवनं मरणमस्ति तथैव अस्मिन् संसारे सकलप्राणिनः जीवन्ति म्रियन्ते च।

इति पृष्टे किम् अन्तिमं सत्यम् उच्छेदवादोऽस्ति ? उत्तरमस्ति-नास्ति इति।

**संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै।**
**सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै।।**

संवृत्तिना सर्वमिदम् उत्पद्यते अत एव नास्ति शाश्वतम्। सद्भावे तु असद् एवास्ति अतः उच्छेदः नास्ति। यत् संवृत्तिना कल्पितं तत् परमार्थं नास्ति।

**योऽस्तिकल्पित संवृत्या परमार्थेन नास्त्यसौ।**
**परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः।।**

गौडपादानुसारं सर्वधर्मः अनादिः आकाशसदृशः एवास्ति तत्र नानात्वं यत्र-तत्र-कुत्रापि नास्ति-

**प्राकृत्याकाशवज्ज्ञेयाः सर्वेधर्मा अनादयः।**
**विद्यते न हि नानात्वं तेषां क्वचन केचन।।**

गौडपादाचार्यः कथयति-

**क्रमते नहि बुद्धस्य ज्ञानं धर्मेषु तायिनः।**
**सर्वे धर्मास्तथा ज्ञानं नैतद् बुद्धेन भाषितम्।।**

यद्यपि अत्र शङ्कराचार्यः बुद्धस्यार्थः पुरुषोत्तमः नारायणः वा इति कथयति। भरतसिंह उपाध्यायस्य कथनमस्ति यत् जगन्मिथ्यात्वं मायावादं च अवलम्ब्य आचार्यः गौडपादः विज्ञानवादिबौद्धानां समरूपं उद्घोषयति। विज्ञानवादस्य मूलभूतसिद्धान्तान् सः 'तस्मान्न जायते चित्तं सर्वं न जायते चित्तं, एवं न चित्तजा धर्माः कथितवान् यथा बौद्धाचार्यः **'लोकसंवृत्तिसत्यं च, सत्यं च परमार्थतः** कथयित्वा द्विविधसत्यं निरूपयति तथैव गौड़पादाचार्यः अपि संवृत्तिसत्यं परमार्थसत्यं च विचारितवान्। भरतसिंहोपाध्यायस्यानुसारं अद्वैतवेदान्ती निर्विशेषब्रह्म **'जन्मादि यस्य यतः'** इत्यस्य रूपे तं जगत्कृतित्त्वं समर्प्य तं विकारी कर्त्तुं न वाञ्छति पश्चात् समर्थनं न करोति किन्तु विवर्तस्य स्थापना करोति स च माया-अविद्यादीनां साहाय्येन स्वकाठिन्यं दूरीकरणाय

गृहीतवान्।

**वेदान्तदर्शनं बौद्धदर्शनं च-** वेदान्त-बौद्धपरम्परयोः प्रचलिता अनेके पारिभाषिकशब्दाः समरूपाः प्रयुज्यन्ते-नामरूपे-नामरूपे च न आत्मधर्मो..तै च पुनर्नामरूपे सवितरि अहोरात्रे इव आत्मनि कल्पिते, न परमार्थतो विद्यमाने...[५] सत्य-श्रद्धा-इन्द्रियनिग्रह-चित्तशुद्धयादिशब्दाः सन्ति ये उभयोः परम्परयोः सामीप्यतां वर्धयन्ति।

**मोक्षः-** "अस्तम् अर्दानम् अविशेषात्मभावं गच्छन्ति प्राप्नुवन्ति। नाम च रूपं च नामरूपे विहाय हित्वा...[६] बौद्धपरम्परायां निर्वाणं अस्तगमनं, शान्तं प्रणीतं च कथ्यते, उपनिषदि ब्रह्मभावः। भरतसिंहोपाध्यायमहाभागेन एवमपि कथ्यते यत् उपनिषदः बौद्धदर्शनं च मुक्तावस्थायां सम्मिलति-

**'विमुक्तश्च विमुक्ष्यते-[७] विमुक्तोऽमृतो भवति[८]**

बौद्धदर्शनेऽपि पुनर्जन्मनः निरोधः इति कथ्यते परमसुखञ्च उच्यते-

**निब्बाणं परमं सुखम्। निब्बानं हि महराज अकम्मजं अहेतुजं**[९]

**तस्मान्न संस्कार्योऽपि मोक्षः**[१०]

आचार्यः शङ्कर अपि व्यावहारिकसत्यं पारमार्थिकसत्यं च स्वीकृत्य स्वकाठिन्यं दूरीकृतवान्, यद् विना निष्प्रपञ्चब्रह्म, सप्रपञ्चब्रह्मविषयकश्रुतीनां संगतिं न स्थापितवान्। भगवान् शङ्करः वेदान्तदर्शनस्य प्रयोजनम् आत्यन्तिक दुख-निवृत्तिं स्वीकृतवान्। प्रतीत्यसमुत्पादस्य खण्डनमपि तात्त्विकदृष्ट्या कृतवान्। यत्र दुःखं निवृत्तिरूपनैतिकतत्त्वेन सम्बद्धमस्ति तत्र खण्ड़नं कृतवान्।

शाङ्करभाष्ये शङ्करः बौद्धदर्शनं खण्डयन् **'सर्ववैनाशिकारः'** इति कथितवान्। तत्र तेन सर्वास्तिवादी, विज्ञानवादी सर्वशून्यवादी च परिगणितम्।

एवं एकतः शङ्कराचार्यः 'प्रच्छन्नबौद्धः' इति कथ्यते, तस्य निर्गुण निर्विशेष ब्रह्म शून्यस्य अपरं नाम, शाङ्करवेदान्तश्च शाश्वतवादि औपनिषद आत्मवादस्यावरणम् अवधार्य शुद्ध-बौद्ध-विज्ञानवादस्य नवसंस्करणम् ?[११]

राहुलसांकृत्यायनमहाभागेन हर्षस्य खण्ड़नखण्ड़खाद्येऽपि बौद्धप्रभावः मन्यते तत्र साम्यं तु वर्तत एव। श्रीहर्षः स्वखण्डनखण्ड़खाद्ये कथितवान् यत् सौगतवादिषु ब्रह्मवादिषु अयं मुख्यः विभेदोऽस्ति यत् सौगतमतम् सर्वम् अनिर्वचनीयं

कथयति, ब्रह्मवादी च विज्ञानेन व्यतिरिक्तं विश्वमिदं सत्त्वेन असत्त्वेन च अनिर्वचनीयं कथयति-

"एवं च सति सौगतब्रह्मवादिनो को विशेष इति चेदयं विशेषः यदादिमः सर्वमेवानिर्वचनीयं वर्णयति- विज्ञान-व्यतिरिक्तं पुनरिदं विश्वं सत्त्वासत्त्वाभ्याम-निर्वचनीयं ब्रह्मवादिनः सङ्गिरन्ते।"

**गीता बौद्धदर्शनं च-** गीतायां भगवान् कृष्णः धर्मकायवदस्ति। अतर्कावचरोऽपि अस्ति। अनुभवगम्योऽपि अस्ति। गीतायां भक्तिः प्राधान्येन वर्तते। महायानग्रन्थेषु अपि भक्तेः प्राधान्यमस्ति, गीतायां कर्मणः प्राधान्यं वर्तते-

**कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते।**

**पुरुषः सुख-दुखानां भोक्तृत्वे हेतुरुच्यते।**

- गीतायां ज्ञान-कर्मणोः समन्वयः इति कथ्यते-

**"सांख्ययोगौ पृथग्वालाः प्रवदन्ति न पंडिताः।"**

भगवान् बुद्धः अक्रियावादं खण्डयति। गीतायां च बौद्धमध्यममार्गसदृशं समत्वयोगस्य शिक्षा प्राप्यते- 'अयं समत्वयोगः न तु अतिमात्रभोगीजनः प्राप्नोति न च उपवासीजनः प्राप्नोति। तथैव अतिमात्रशयिता अतिमात्र जागृतः च जनः न प्राप्नोति। यः मनुष्यः आहारे-विहारे, जागरणे, शयने च साम्यं वर्धते तस्य योगः दुःखनाशकः सिध्यति।'

यस्य निर्गुणस्य, निर्विकल्पस्य,अचिन्त्यस्य, अनिरुक्तस्य अवस्थायाः रूपेण गीताकारेण मुक्तेः व्याख्या कृता, सा व्याख्या बुद्धस्य निर्वाणविषयकमतस्य अतिसमीपे वर्तते। उभयोः उद्देश्यम् अनित्ये सुखलोकाभावे च शान्तिमार्गस्य अवलोकनमात्रमस्ति। गीतायां वर्ण्यते यत् मानवः आत्मना आत्मोद्धारः कुर्यात् भगवान् बुद्धः कथयति यत् **'अत्त दीपो भव।'**

गीतायाः अनासक्तिकर्म अर्जितफलानां बन्धनात् मोचयति एवं च बौद्धानां अनात्मवादस्य समरूपमस्ति। अत्र भगवतः बुद्धस्य शिक्षाऽपि निहितास्ति- **चरथ भिक्खवे-चारिकं बहुजनहिताय, बहुजनसुखाय लोकानुकम्पाय अत्थाय हिताय सुखाय देवमनुस्सानं।**

**सांख्यदर्शनं बौद्धदर्शनं च-** भगवान् बुद्धः बुद्धत्वप्राप्तेः पूर्वं यत् ध्यानं

कृतवान् तं सांख्यसम्मतसाधना इति मन्यते। आलारकरामः, उद्दकपुत्तश्च सांख्यधर्मानुयायिनौ आस्ताम्। बौद्धदर्शनवत् सांख्येऽपि दुःखनिरूपणं भवति तथा च सृष्टिप्रक्रियायां ईश्वरः नापेक्षते।

**बौद्धदर्शनं योगश्च–** पतञ्जलिः **'चित्तवृत्तिनिरोधः योगः'** इति कथयति स्म। पालिभाषायामपि **चित्तएकग्गता समाधिः** इति कथ्यते।

योगपरम्परायां योगी **'तरति शोकमात्मवित्'** अर्थात् शोकं जयति तथैव बौद्धपरम्परायामपि 'संज्ञावेदयित-निरोधस्य अवस्थां प्राप्य साधकः अनुभवति यथा-जन्ममरणं न भवति, ब्रह्मचर्यवासः सफलीभवति यत् करणीयम् तत् पूर्वमेव कृतम्। विज्ञानवादे योगस्य प्राधान्यात् तस्य नाम एव योगाचार अस्ति। अष्टाङ्गयोगः-यम-नियम-आसन-प्राणायाम- प्रत्याहार-धारणा-ध्यान-समाधिः बौद्धपरम्परायाः समाधौ विपश्यनाध्याने एव प्राप्यन्ते।

**वैशेषिकदर्शनं बौद्धदर्शनं च–** वैशेषिक-परम्परायां दुख-विनाशाय ईश्वरभक्तिः, ज्ञानं, श्रवणम्, मननं, भावना च वर्ण्यन्ते। बौद्धपरम्परायामपि संसारः दुःखरूपेण मन्यते। प्रथमं तु आर्यसत्यं तस्य च उपायरूपेण आर्याष्टाङ्गिकमार्गाः मन्यन्ते- सम्यक्दृष्टिः, सम्यक्संकल्पः सम्यक्वाणी, सम्यक्कर्म, सम्यक्आजीविका, सम्यक् व्यायामः, सम्यक्स्मृतिः सम्यक्समाधिश्च।

वैशेषिकपरम्परायां परमाणुः नित्योऽस्ति। बौद्धदर्शने पञ्चेन्द्रियाः, पञ्चेन्द्रियविषयाः, चतुर्महाभूताश्च चतुर्दशभूताः परमाणवः सन्ति। ये नित्याः न् सन्ति, यतः ते जन्म-स्थिति-क्षय-विनाश-चतुर्परिस्थितिभिः वशीभूताः सन्ति। अयमेव बौद्धानां क्षणिकवादोऽस्ति।

**बौद्धदर्शनं न्यायदर्शनं च–**

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहार-शक्तिम्।**
**शास्त्रान्तरभ्यसनयोग्यतया युनक्ति तर्कश्रमो न तनुते किमिहोपकारम्।।**

**प्रदीपः सर्वशास्त्राणामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता।।** - वात्स्यायनः

हेतुविद्या, हेतुशास्त्रं, प्रमाणशास्त्रं, न्यायशास्त्रं आन्वीक्षिकी इत्यादिनामभिः न्यायः अभिहितः भवति एवं न्यायस्य महत्त्वमवगम्य बौद्धा अस्याः परम्परायामपि

सम्मिलिताः भवन्ति। आर्यः असंगः वादविद्यां षड्सु भागेषु वर्णयति-वादः, वाद-अधिकरणम्, वाद-अधिष्ठानम्, वाद आत्मकारः, वाद-निग्रहः वादे बहुकरः च।

धर्मकीर्तेः प्रहारेण पीडित-उद्योतकरस्य वाणी रूपी गोः उद्धाराय वाचस्पतिमिश्रेण न्यायवार्तिके तात्पर्यटीका लिखिंता। बौद्धन्यायस्य आचार्येषु नागार्जुनः वसुबन्धुः, दिङ्नागः, धर्मकीर्तिः धर्मोत्तरः, शान्तरक्षितः,कमलशीलश्च प्रमुखाः सन्ति।

दर्शन-न्याययोः क्षेत्रे मौलिकमतभेदस्य कारणं बौद्धानां वेद-ईश्वर-आत्मादीनां विरोधः मात्रं नास्ति प्रत्युत् अनित्यता, क्षणभङ्गता, शून्यता, विज्ञप्तिमात्रता-इत्यादीनां स्थापनाऽस्ति।

बौद्ध नैयायिक-सर्वास्तिवादि-वैभाषिक-सौत्रान्तिकादीनां वस्तुवादः वैशेषिकादीनां सदृशं स्थिरः नित्यः च नास्ति। प्रत्युत् क्षणभङ्गी सर्वथा अनित्यश्चास्ति, तथापि ते वस्तुवादिनः सन्ति। बौद्धानां विशेषताऽस्ति यत् प्रमेयानां वस्तुसत्तां न स्वीकुर्वन् प्रमाण-व्यवस्थापनं कुर्वन्ति।

प्रमाणव्यवस्था विशुद्धरूपेण ज्ञानक्षेत्रस्य समस्या अस्ति। अतः बाह्य प्रमेयसत्तावादः अस्य उत्कर्षस्य बाधकोऽस्ति। दिङ्नागः धर्मकीर्तिः इत्यादयः विज्ञानवादिनः सन्ति, ये बाह्यार्थस्य सत्तां न स्वीकुर्वन्तः प्रमाणव्यवस्थापनं कुर्वन्ति एवं संक्षेपेण बौद्धदर्शनस्य अन्य भारतीयदर्शनैः सह साम्य-प्रदर्शनस्य प्रयासः कृतः विस्तरेण एतेषु विषयेषु गवेषणाऽपेक्ष्यते।

## सन्दर्भसंकेताः

१. धम्मपदम् १/१ २. वृहदारण्यक् १५.३ ३. वृहंदारण्यक् १५.४, ४. प्रश्नोपनिषदः १०/४/२ ५. तैत्तिरीयभाष्यम् २/६, ६. शांकरभाष्यम्, मुण्डकोपनिषदः ३.२.६ ७. कठोपनिषदः ५.१, ८. मुण्डकोपनिषदः ३.२.६ ६. मिलिन्दपञ्हो, १०. ब्रह्मसूत्रशांकरभाष्यम् १.१.४, ११. बौद्धदर्शन एवं अन्य भारतीय दर्शन पृ. १०२

दृष्टव्यः- १. दर्शन-दिग्दर्शन-राहुलसांकृत्यायन किताबमहल, इलाहाबाद, २. बौद्धदर्शन तथा अन्यभारतीय दर्शन-भरतसिंह उपाध्याय, ३. भारतीय दर्शन-डॉ. राधाकृष्णन, ४. बौद्धदर्शन तथा अद्वैत वेदान्त- डॉ. चन्द्रधर शर्मा ५. बौद्धधर्मदर्शन -आचार्य नरेन्द्रदेव, विहार राष्ट्र भाषा परिषद, पटना ६. Origen of Buddh, G. C. Pandey, ७. जैन एवं बौद्धदर्शन का तुलनात्मक अध्ययन, अप्रकाशित डॉ. विजय कुमार जैन

# वर्तमानसमये प्रचलिताः बौद्धसंस्काराः

वर्तमान समये संस्काराणाम् आवश्यकताम् अनुभवन् बौद्धसंस्कारग्रन्थः एवम् तीर्थस्मारकग्रन्थश्च भिक्षुज्ञानरतनद्वारा विरचितः। तत्र बौद्धसंस्काराणाम् इत्थम् प्रतिपादनम् वर्तते।

**संस्काराणाम् सङ्ख्या–** श्रीलंका, बर्मा, थाईलैण्ड, जापान् इत्यादि देशस्थाः बौद्धाः स्वसामाजिक मर्यादानुकूलं सर्वान् संस्कारान् धर्मानुसारेण आचरन्ति। बौद्धानाम् कृते सप्त-संस्काराणाम् वर्णनमस्ति- गर्भमंगलम्, मुण्डनम्, नामकरणम्, विद्यारम्भः, विवाहः अन्त्येष्टिश्च।

**पूजायाः आवश्यकसामग्री–** सिक्थवर्तिका (मोमबत्ती) ५ (घृत दीपकाः वा), धूम्रवर्तिका (अगरबत्ती), पीतवस्त्रम्, पीतसूतवस्त्रम् सर्वमांगलिकसंस्कारेषु किन्तु अन्तिमे संस्कारे श्वेतवस्त्रम्, अश्वत्थस्य पञ्चपर्णानि च। पञ्चफलानि एवं पञ्च हाराणि, पुष्पाणि च, यथेच्छम् वस्त्रदानम्।

**गर्भमङ्गलसंस्कारः** – गर्भस्य मङ्गलार्थम् यत् संस्कारः सः गर्भमङ्गल-संस्कारपदेन उच्यते।

**समयः–** गर्भस्य त्रयाणाम् मासानाम् पूर्णे सति गर्भमङ्गलसंस्कारः भवति।

**प्रयोजनम्–** सन्ततेः मातुश्च कल्याणार्थम् गर्भमङ्गलसंस्कारः क्रियते।

**विधिः–** अस्मिन् संस्कारे पूज्यभिक्षून् स्वगृहे निमन्त्र्य सत्कारपूर्वकम् भोजन-प्रदानानन्तरम् त्रिशरणं, पञ्चशीलम् गृहीत्वा पूजादिकम् कर्तव्यम्। उपस्थितैः भिक्षुभिः महामङ्गलसूत्रस्य पाठम् कृत्वा रक्षासूत्रेण गर्भवत्याः कण्ठ-बन्धनम् कर्तव्यम्। गर्भस्य नवमे मासे पूर्णे सति प्रसूतिसंस्कारः अवश्यमेव कर्तव्यः। गर्भप्रसूतेः अनुमानितम् यद् दिनम् वर्तते, ततः सप्तभ्यः दिनेभ्यः प्राक् गृहे पूजायाः आयोजनम् कृत्वा परित्राण-पाठः कर्तव्यः। तत्र विशेषतः निम्नलिखितस्य अंगुलिमालसूत्रस्य पाठं कृत्त्वा पवित्र-परित्राण जलम् मातुः कृते दातव्यम्। येन मातुः शिशोश्च कल्याणम् स्यात्।

**पस्तिं यं भणन्तस्य निसिट्ठानधोवनं।**

**उदकम्पि विनासेति सब्बमेव परिस्सयं।।**

**सोत्थिथना कब्मबुट्ठानं यं च साधेति तं खणे।**

**थेरस्संगुलिमालस्स लोकनाथेन भासितं।**

**कप्पट्ठायीमहातेजं पस्तिं तं भणामहे।**

**यतोहं भगिनि अरियाय जातिया जातो।**

**नाभि जानामि संकिच्च पाण जीविता वोरोपेता**

**तेन सच्चेन सोत्थि ते होतु सोत्थि गब्भस्साति।।**[1]

**नामकरणसंस्कारः-** उत्पन्नस्य शिशोः पितृभ्याम् प्रथमम् यत् नाम स्थिरी क्रियते तदर्थं यत् संस्कारः, तद् एव नामकरणं संस्कारपदेन उच्यते।

**समयः-** अयम् संस्कारः उत्पत्तेः पञ्च दिवसानन्तरम् कर्तुम् शक्यते।

**प्रयोजनम्-** शिशोः नामकरणम् एव अस्य प्रयोजनम्।

**विधिः-** यदा प्रसूता सम्यक्रूपेण स्थातुं समर्था भवति तदा प्रसवगृहम् सम्यक् संशोध्य प्रसूतया स्नातव्यम्। बौद्ध सम्प्रदाये भिक्षोः श्रामणेरस्य, अनागारिकानाम् वा आह्वानम् कर्तव्यम्। यदि कोऽपि उपलब्धः नास्ति तर्हि योग्येन उपासकेन संस्कारः कल्पनीयः। धर्माचार्यः प्रसूतायै उपस्थितपरिवारजनेभ्यश्च त्रिशरण सहित पंचशीलस्य ग्रहणम् कारणीयम्, पूजावन्दनादिकं कारणीयम्। महामंगलसूत्रपाठः करणीयः। पुण्यानुमोदनादि आशीर्वादगाथा गेया। ततः पंच, सप्त उत्तमनाम्नाम् संकल्पम् विधाय उपस्थित-जनान् आहूय पारिवारिकः एकस्य चयनम् विधाय तस्यैव वारत्रयम् आचार्येण घोषणा करणीया। एवमपि दृश्यते यत् पुत्रस्य नाम पितुः नाम्ना सह संकलितं भवति। कन्यायाः नाम मातृ संबधितं भवति। यदि एवं न क्रियते तर्हि पित्रोः दीक्षानुसारम् किंचित् बौद्धनाम चयनीयम्। तदनन्तरम् पूजां कृत्वा भिक्षुद्वारा प्रतिष्ठितव्यक्ति द्वारा वा तत् नाम उद्घोषणीयम्। ततः निम्नगाथया वारत्रयं शिशुकृते आशीर्वादः प्रदेयः।

**दीघायु होत अयं कुमारो। बलं च वण्णं च सुखं लभन्तु।।**

**पाञ्ञायसीलेन च सम्पयुत्तो। अयं कुमारो सरणमुपेति बुद्धं।।**

**दीघायु होतुं अयं कुमारो। बलं च वण्णं च सुखं लभन्तु।।**

पञ्ञा शीलेन च सम्पयुत्तो। अयं कुमारो सरणमुपेति धम्मं।।
दीघायु होतुं अयं कुमारो। बलं च वण्णं च सुखं लभन्तु।।
पञ्ञा शीलेन च सम्पयुत्तो। अयं कुमारो सरणमुपेति धम्मं।।

तत्र यदि कन्या भवति तदा कुमारस्य स्थाने कुमारी, अथ च सम्पयुत्तो इत्यस्य स्थानेसम्पयुत्ता इति कथनीयम्। न च नाम, गुण-बोधकम् स्यात्, जातिवादबोधकम् अपि न स्यात्, वर्मा, शर्मा, पिप्पल इत्यादि न प्रयोज्येत। अथ येन नाम्ना मनसि हीनभावना न स्यात् तत् नाम स्थापनीयम्। यथा-नामकरणस्य अन्ते मातु अग्रे शिशोः लालन- पालन संबंधि शिक्षा प्रदेया।

या शिक्षा शिशोः सर्वांगीणविकासाय भवति। या माता शिशोः लालन-पालन सम्बन्धिव्यवस्थाम् न जानाति तस्याः शिशोः समुचितः विकासः न भवति। एवं नामकरणस्य अन्ते बौद्धभिक्षुकाय श्रद्धापूर्वकम् आवश्यकवस्तूनि प्रदाय भोजनम् दातव्यम्। ततः ये संबंधिनः वर्तन्ते तेभ्यः अपि भोजनम् दातव्यम्। अस्मिन् मङ्गलमयकृत्ये स्त्रीभिः मङ्गल-गीतम् नृत्यम् च करणीयम्। [२]

**केशकर्तनसंस्कारः-** बालकस्य प्रथमवारम् केशकर्तनम्।

**समयः-**बालकस्य जन्मतः दशमासानन्तरम् अथवा त्रिवर्षेभ्यः प्राक् कर्तव्यम्।

**विधिः-** अयम् संस्कारः कुत्रचित् धार्मिकस्थले अथवा गृहे स्यात्। प्रथमं आमन्त्रितभक्तेन अथवा आदरणीयेन बालकस्य किञ्चित् केशकर्तनम् कारयेत्। तत्पश्चात् नापितेन मुण्डनम् कारणीयम् तत्र गोधूमचूर्णे किंचित् तैलादिकम् निक्षिप्य पिण्डाकारम् कृत्वा शिरसः परिष्कारः करणीयः, तत्पश्चात् पिण्डाकारम् नद्याम् प्रक्षिपेत्। मुण्डनोपरान्तं बालकेन स्नातव्यम्। ततः नवीनवस्त्रादिकम् धारयित्वा माता-पिता बालकम् क्रोडे स्थापयित्वा धूपदीपादिना सम्पूज्य त्रिशरणपंचशील ग्रहणम् कारयेत्। एवं महामंगलसूत्रस्य, रतनसूत्रस्य पाठम् श्रावयेत्। ततः धर्मोपदेशोऽपि स्यात्। आचार्येभ्यः स्वश्रद्धया दानम्, पुण्यं, भोजनादिकम् च सम्प्रदाय सामर्थ्यानुसारेण अतिथिभ्यः जलपानादिकम् प्रदातव्यम्। मंगलगीतम् अपि आचरेत्।

**विद्यारम्भ-संस्कारः- विद्यारम्भसमयः-**जन्मतः पञ्चम वर्षात् सप्तवर्षस्य मध्ये एषः संस्कारः करणीयः।

**विधिः-** कस्मिन्नपि बुद्धविहारे बालकम् उपनीय अथवा गृहे धर्माचार्यम् आहूय विधिवत् पूजाम् सम्पाद्य त्रिशरणेन सह पंचशीलम् ग्राहयेत्। अयमेव बालकस्य दीक्षासंस्कारः। तदा आचार्येण पट्टे **'नमो बुद्धाय'** इति लिखित्वा बालकेन तम् शब्दम् पुनः प्रतिलिपिरूपेण तेषु अक्षरेषु लेखनम् कारयेत्, ततः परम् आचार्यः मंगलसूत्रम् पठित्वा अर्थं बोधयेत्। शिक्षायाः प्रयोजनमपि सम्पादयेत्, तदनन्तरम् बालकस्यं हस्ताभ्याम् दानपुण्यमपि कारयेत्। पुष्पहारैः बालकस्य स्वागतम् कुर्यात्। ततः बालकस्य विद्यालये गमनम् स्यात्, परिवारे मंगलगीतम् स्यात्।

**महत्त्वम्-** संस्काराणाम् जीवने अतीव महत्त्वपूर्णं स्थानम् तथापि विद्यारम्भस्य विशिष्टं स्थानम्, यतोहि मानवान् संकीर्णविचारेभ्यः उद्धार्य आदर्श-जीवनम् प्रददाति। यत् समाजाय, राष्ट्राय, परराष्ट्राय च लाभदायकं भवति। अतः मातृ-पित्रोः कर्तव्यम्, यत् यथाशक्ति बालकान् शिक्ष्यताम्।[3]

**विवाहसंस्कारः-** विवाहसंस्कारः जीवनस्य दाम्पत्यपूर्णं बन्धनमस्ति। अयम् संस्कारः जीवनस्य सहभागी वर्तते। एषा सामाजिकस्वीकृतिः। स्त्री स्यात् पुरुषो वा स्यात् उभयोः एकाङ्गी जीवनम् कष्टकारकम् भवति। विवाहमाध्यमेन पारस्परिक प्रेमभावनया जीवनम् शरणम् भवति। एषः संस्कारः पवित्रभावनाभिः सम्पादयेत्। विवाहः केवलम् भोगसाधनम् एव नास्ति अपितु संयमितजीवनाय योग्यसन्तानोत्पत्तये च भवति।

**समयनिर्धारणम्-** ज्योतिष-शास्त्रानुसारेण शुभदिने शुभमुहूर्ते उभयोः सुविधानुसारेण यस्मिन् दिने वर्षा, ग्रीष्मादि प्रभावः न स्यात् तदा विवाहं सम्पादयेत्। अस्मिन् विषये भगवान् अपि उक्तवान् -

**नक्खत्तं पतिमानेत्तं अत्थोवालं उपच्चगा ।**
**अत्थो अत्थस्य नक्खत्तं किं करिस्सन्ति तारका।।**

अर्थात् ज्योतिषानुयायिनः अज्ञाः सन्ति तथा स्वकर्मभिः वञ्चिताः भवन्ति। कामाय कामम् एव नक्षत्रम् भवति आकाशस्य तारकादिभिः सह तस्य कः सन्दर्भः, प्राचीनपरम्परानुसारेण शुक्लपक्षः विवाहादिकम् सम्पादयितुम् शुभङ्करः भवति।

**स्थानम्-** वर-वधू इति उभौ पक्षौ बिहारम् गत्वा विवाहमङ्गलकार्यं सम्पादयेताम् अथवा उभयोः पक्षयोः सम्मत्या स्वयमेव स्थानम् निर्धारयेत्।

**उभयोः वरणम् मङ्गलकार्यम्-** विवाहकार्यक्रमे सर्वप्रथमम् कन्या-वरयोः सम्वन्धं दृढ़म् कारयेत्, यदा उभौ परस्परम् दृष्ट्वा सन्तोषम् प्राप्नुयाताम् तदा उभयोः वरणं मङ्गलकार्यम् सम्पादयेत्। तस्मिन् समये वरेण सह संबंधम् सुनिश्चित्य त्रिशरणम् पञ्चशीलम् च गृहीत्वा कन्यापक्षः फलप्रसादं, ताम्बूलं, हाराः, पुष्पाणि, अर्थदानादिभिः वरम् सम्मानयेत्। विवाहसमये निम्नलिखितवार्ता ध्यातव्या। उभौ बौद्धौ स्याताम्। निरोगौ स्याताम्। वरः जीविकोपार्जने समर्थः स्यात्। तयोः कौटुम्बिकरक्तसंसर्गः न स्यात्। बालविवाहः, वृद्धविवाहः, विजातीयविवाहश्च वर्जनीयः।

**मण्डपनिर्माणस्य विधिः-** विवाह-मण्डपे प्रतिष्ठितस्थाने मङ्गलकार्यार्थम् सुसज्जितायाः वेदिकायाः निर्माणम् कारयेत्। चर्तुषु दिक्षु चर्तुस्तम्भान् स्थापयेत् तैः सह कदली-पत्रमपि संयोजयेत्, एवम् आम्रपत्रादिकम् अपि योजयेत। परितः पञ्च-पञ्च मृत्तिकायाः कलशान् रङ्गै अलङ्कृत्य एकैकस्योपरि स्थापयेत्। कलशानामुपरि विविधवर्णैः जयमंगलम्-**बुद्धं सरणम् गच्छामि, संघं सरणम् गच्छामि, धम्मं सरणं गच्छामि** इति लेखयेत् पत्रपुष्पादिकम् अपि तत्र योजयेत्।

मञ्चे बुद्धप्रतिमां स्थापयेत्, प्रतिमायाः समक्षम् तत्र पुष्पादिकम् स्थापयेत्। कन्याम् सुगंधितजलैः स्नानम् कारयेत्। हरिद्रालेपनं कारयेत्। कन्यावरयोः पितरौ श्वेतवस्त्रम् धारयेताम्।

**संस्कारविधानम्-** प्रथमे वरस्य दक्षिणभागे कन्याम् उपवेशयेत्। पितरौ उभयतः तिष्ठताम्, धूपैः, पुष्पैः च बुद्धपूजाम् कुर्याताम्।

विवाहमङ्गलसम्पादनकर्तारः बौद्धभिक्षवः प्रतिमायाः वामभागे उपविश्य पूजादिकम् सम्पादयेयुः। ततः वरं कलशं च मंगलसूत्रबन्धनं कृत्वा जनसमूहानाम् हस्तेषु प्रदाय तस्य सूत्रस्य अन्यः भागः तस्मिन् घटे स्थापयेत्। तदा सामूहिकरूपेण त्रिशरणेन सह पंचशीलम् ग्राहयेत्। महामंगलसूत्रस्य रतनसूत्रस्य च पाठम् कारयेत्। सूत्रबन्धने वरमालाधारणविधिः कश्चित् बौद्धकार्यकर्ता सम्पादयेत्।

**कन्या-समर्पण-विधिः**-पाणिग्रहणसमये-अस्य मन्त्रस्य उच्चारणम् वारत्रयम् कर्तव्यम्- **नमो तस्स भगवतो सम्मासम्बुद्धस्स**[४]

प्राचीनकाले यत् किञ्चित् वस्तुप्रदाने, हस्ते जलम् गृहीत्वा समर्पणस्य भारतीया प्रथा प्रचलिता आसीत्। तदनुरूपम् एव विवाहसमये अपि कन्यादाने हस्ते जलदानस्य प्रथा इदानीम् अपि प्रचलति। तदानीम् तत्र उपस्थिताः सर्वे जनाः उत्थिताः भवन्तु। तत्र आचार्यः वर-वध्वोः हस्तयोः परित्राणजलपातेन सह निम्नलिखितं पाठम् कुर्यात्-

**भवतु सब्ब मंगल रक्खन्तु सब्ब देवता।**
**सब्ब बुद्धानुभावेन सदा सोत्थि भवन्तु ते।।**
**भवतु सब्ब मंगलं रक्खन्तु सब्ब देवता।**
**सब्ब धम्मानुभावेन सदासोत्थि भवन्तु ते।।**
**भवतु सब्ब मंगलं रक्खन्तु सब्ब देवता।**
**सब्ब संघानुभावने सदा सोत्थि भवन्तु ते।।**

ततः एवम् वक्तव्यम्, यत् त्रिरत्न-भावनाम् उपस्थितं समाजम् च साक्षीकृत्य स्वकीयाम् प्रियपुत्रम् भवतः पुत्रवधुरूपेण भवते समर्पयामि। इतः प्रारभ्य मम पुत्र्याः सुख-दुखात्मकम् सर्वमपि कार्यम्, अस्याः संरक्षणम्, उत्तरदायित्वम् चेति सर्वम् भवति निहितमस्ति। अहम् आशासे यदियं मनसा, वाचा, कर्मणा च स्व-उत्तरदायित्वस्य पालनं करिष्यति। अहम् निवेदयामि यत् आवयोः सम्बन्धः सर्वदैव मधुरः स्यात्।

**वरस्य पितृभ्याम् स्वीकृतिः**-वरस्य माता-पिता एवम् भूयात् त्रिरत्नस्य भावनामनसि संस्थाप्य उपस्थितसमाजम् च साक्षीकृत्य स्वीकरोमि यत् भवद्भिः प्रदत्तम् उत्तरदायित्वं सम्यक्रूपेण करिष्यामि। स्वपुत्रवध्वाः संरक्षणे अस्याः कामपि अवहेलनाम् न करिष्यामि। अहम् विश्वसिमि, यत् उभयोः पवित्रतमो यो सम्बन्धः सुखस्य समृद्धये सहायको भविष्यति। साधु साधु...............

**वर द्वारा प्रतिज्ञा**-प्रथमं नमो तस्स भगवतो अरहतो सम्मा सम्बुद्धस्स एतत् त्रिवारम् उक्त्वा वरः कथयति अहम् त्रिशरण भावनाम् तथा उपस्थितम् समाजम् साक्षीकृत्य पञ्च प्रतिज्ञाः करोमि।

**प्रथमा-** (सम्मानाय) अहम् मनसा, वाचा, कर्मणा सदैव स्वपत्न्याः सम्मानं करिष्यामि ततः अन्यैः अपि सम्मानम् दापयिष्यामि।

**द्वितीया-** (अनवमाननाय) अहम् स्वपत्न्याः मनसा, वाचा कर्मणा कदापि अपमानम् न करिष्यामि तथा न च अन्येनापि केनापि परिजनेन अपमानिताम् कर्तुम् अवसरम् दास्यामि। विवाहसिद्धान्तस्य सदैव स्मरणम् करिष्यामि।

**तृतीया-** (अनतिचरिताय) अहम् स्वात्मानम् मादकद्रव्याणाम् सेवनात्, मद्यपानादि कार्यात्, तथा द्यूत-क्रीडायाः पृथक्कृत्य एकपत्नीव्रतम् सन्धार्यताम् परितोषयितुम् प्रयत्नम् विधास्यामि। भगवता बुद्धेन प्रतिपादितम् सद्धर्मम् आश्रित्य स्वपत्न्याः विश्वासपात्रम् भविष्यामि। अहम् आवयोः उभयोः जीवनम् सुखीकर्तुम् प्रयासम् विधास्यामि।

**चतुर्थी प्रतिज्ञा** (इस्सरियवोसग्तोन) अहम् उचितमाध्यमेन धनम् अर्जयित्वा स्वपितुः सेवाम् कुर्वन् यथोचितेन धनेन ऐश्वर्येण च स्वपत्नीम् संतुष्टां कर्तुं प्रयासम् करिष्यामि।

**पंचमी प्रतिज्ञा-** (अलङ्कानुपारानेन) अहमं यथाशक्ति यथासम्भवम् च वस्त्राभूषणैः स्वपत्नीम् परितोषयिष्यामि। अहम् अद्यप्रभृति एताः पञ्चप्रतिज्ञाः मनसा, वाचा, कर्मणा आचरिष्यामि तथा आवाम् परितोषयितुम् प्रयासम् करिष्यामि-साधु-साधु.

**वधुद्वारा प्रतिज्ञा ग्रहणम्-** नमो तस्स भगवतो अर्हतो सम्मासम्बुद्धस्स, इति मन्त्रम् त्रिवारम् उच्चार्य वधू त्रिरत्नभावनाम् उपस्थितम् समाजम् च साक्षीकृत्य पञ्च पवित्राः प्रतिज्ञाः करोति इति कथयति-

**प्रथमाप्रतिज्ञा-** (सुसंविहिता कम्मताचहोति) अहम् स्वगृहस्य सर्वाणि कार्याणि सम्यक् प्रकारेण सावधानो भूत्वा करिष्यामि तथा स्वकार्यव्यवहारैः सर्वान् परितोषयितुम् प्रयासम् करिष्यामि।

**द्वितीया प्रतिज्ञा-** (सुसंगहिता परिजनाय)-अहम् सदाचरणैः प्रसन्नैः व्यवहारैः च स्व स्वश्रुश्वशुराभ्याम् च सह परिवारस्य जनान् प्रसन्नम् कर्तुम् प्रयासम् करिष्यामि।

**तृतीया प्रतिज्ञा-** (अतिचारिणी) अहम् मिथ्याचारेभ्यः अनाचारात्मक वार्ताभ्यश्च

आत्मानम् दूरीकृत्य स्वपत्युः परमम् विश्वासपात्रम् भवितुं प्रयत्नम् करिष्यामि।

**चतुर्थी प्रतिज्ञा**- (संभतंचअनुरक्खति) अहम् स्वपरिवारस्य पत्युश्च धनसम्पत्तिम् तथा गृहस्य अन्यामपि सम्पत्तिम् सम्यक् प्रकारेण रक्षिष्यामि।

**पञ्चमी प्रतिज्ञा**- (दुक्खाचहोति अनलसा सब्ब किच्चे सुं) अहम् गृहस्य सर्वाणि कार्याणि यथा भोजननिर्माणम्, वस्त्राणाम् सीवनम्, स्वच्छतादिकार्यम् मनसा, वाचा, कर्मणा च करिष्यामि। अस्मिन् विषये कदापि आत्मनः अपवादस्य कस्मैश्चिदपि अवसरम् न प्रदास्यामि। एषा या प्रतिज्ञा मया विहिता अहम् अद्यप्रभृति एतासु पञ्च प्रतिज्ञासु आलस्य रहितो भूत्वा मनसा, वाचा, कर्मणा च आचरणम् करिष्यामि।

**सिन्दूरदानम्**- वरः स्वहस्ताभ्याम् वध्वाः शिरसः मध्यभागम् ललाटादारभ्य सिन्दूररेखया प्रपूरयेत् तथा च तदैव वर-वधू मंगलसूत्रमपि धारयेताम्।

**माल्यार्पणम्**- सिन्दूर-दानानन्तरम् वर-वध्वोः हस्तेषु मालाम् दत्वा उपस्थितानाम् जनसमूहानाम् हस्तेषु च पुष्पाणि दत्वा आचार्यः जयमंगलम् इति अट्ठकथाम् वदेत् तथा च प्रतिगाथाम् उच्चार्य अन्ते पुष्पाणि वर-वध्वोः उपरि आशीर्वादरूपेण प्रक्षिप्य एवम् अष्टवारम् एतत् क्रमः प्रतिपादयेत्, तथा अन्तिमायाः गाथायाः पूरितेः सह वरवधू परस्परम् माल्यार्पणम् कुर्याताम्। साधु-साधु-

**धम्मदानम्**- वरवधूभ्याम् स्वसामर्थ्यानुसारम् आचार्याय (बौद्ध भिक्षवे) चीवराणि तथा अन्यानि आवश्यकपरिष्कराणि एवम् धनम् प्रदातव्यम्। तदा आचार्यः पुण्यानुमोदनम् कुर्वन् तथा च मङ्गलमयीम् कामनाम् प्रकटयन् गृहस्थधर्मम् उपदिशेत् तदुपरान्तम् गृहस्यमहिलाः वरवधूम् सहैव नीत्वा स्वादिष्टभोजन-प्रदानानन्तरम् सामाजिकरूपेण उभाभ्याम् दानम् दद्युः। आगन्तुकाः जना अपि वरवधूम्याम् उपहारम् दद्युः।

**अन्तिमसंस्कारः**- मृत्योः अनन्तरम् यः संस्कारः क्रियते सः अंतिमसंस्कारः इति उच्यते।

**विधिः**- मानवानाम् जन्मतः पर्यवसानम् निश्चितम् एव, मृत्युरूपेण सम्पद्यते। शरीरस्य एषः स्वाभाविकः धर्मः अतः यदा निकटसम्बन्धीजनः मृत्युशय्यायाम् मरणासन्नो भवेत् तद कञ्चित् धर्मोपदेशकम् भिक्षुम् वा सत्कारपूर्वकम् आहूय

एतादृशीम् व्यवस्थां कुर्यात्, यस्मात् मरणासन्नं जनं तत्समये उपस्थिताः सम्बन्धिनः धर्मचर्चाम् श्रृणुयुः।

**मृतकशरीरस्य आवश्यकम् कृत्यम्**–मृत्युशय्यारूढ़म् मृतशरीरम् स्नानम् कारयित्वा सामर्थ्यानुसारम् सुगन्धितद्रव्याणाम् लेपनम् कृत्वा तस्य उपरि वस्त्रम् आच्छादयेत्। बौद्धानाम् कृते विकल्परूपेण समाधिप्रदानम् तथा दाहकर्म इति उभयम् अपि वर्तते। एषा समस्या धर्मापेक्षया विशेषरूपेण आर्थिकी विद्यते। यः मृतशरीरस्य दाहकर्म कर्तुम् समर्थो नास्ति सः तम् मृतशरीरम् समाधिस्थम् कुर्यात्। अस्मिन् समये मृत शरीरस्य स्नानम् तथा वस्त्रच्छादानन्तरम् बौद्धाचार्यस्य उपदेशेन तत्र उपस्थिताः सर्वे स्त्रियः पुरुषाः त्रिशरणस्य पंचशीलस्य च ग्रहणम् कुर्युः। तदनन्तरम् मृतजनस्य सम्बन्धिनाम् हस्ते एकम्-एकम् जलप्रपूरितम् पात्रम् दत्वा तस्य समक्षम् स्थालीम् तत् सदृशम् अन्यत्पात्रम् वा स्थापयेत्, तथा जलपात्रात् जलधाराम् तस्मिन् पात्रे शनैः-शनैः पातयेत् तथा अन्ते आसाम् पवित्र-गाथानाम् उच्चारणम् कुर्यात्।[५]

**अनिच्च वत संखाराउप्पाद वय धम्मिनो।**
**उप्पज्जित्वा निरुज्झन्ति सेसंवूप समोसुखो।।**

भगवानबुद्धः उक्तवान् यत् हे भिक्षा! मम उपदेशान् अपि परीक्ष्य ग्रह्णीयात्। अनेन प्रकारेण वैज्ञानिक-बौद्धधर्मः व्याप्तरूढ़िं अन्धविश्वासं च न स्वीकरोति। परञ्च यदा बौद्धसमाजस्य पार्थक्येन सङ्कल्पना अभवत् तदा तैरपि सामाजिकसंस्काराणाम् आवश्यकता अनुभूता। इदानीम् बौद्धधर्मावलम्बिनः कथम् स्वसामाजिकदायित्वम् निर्वहन्ति, तस्य संक्षिप्तं विवरणम् प्रस्तुतम्। सिंगालोवाद सुत्ते गृहस्थस्य परस्परम् कर्तव्यभावः वर्णितः। तत्र संस्काराणाम् परिमार्जितं रूपं प्राप्यते। बौद्धपरम्परायाः मूलभावनायाः एवमेव भवति।

**सन्दर्भ– संकेतः**

१. बौद्ध संस्कार पद्धति चन्द्ररतन नायक थेर पृ. १-२, २. बौद्ध संस्कार एवं तीर्थ स्मारक,
३. बौद्ध संस्कार पद्धति पृ. ४-५, ४. बौद्ध संस्कार एवं तीर्थस्मारक पृ. २६
५. बौद्धसंस्कार एवं तीर्थ स्मारक-भिक्षु ज्ञानश्री पृ. २१-३३

# त्रिकायवर्णनम्

**विधूत-कल्पना-जाल-गम्भीरोदारमूर्तये।**
**नमः समन्तभद्राय समन्तस्फरणत्विषे।।**

महायानपरम्परायां भगवतो बुद्धस्य कायः त्रिकायरूपत्वेन मन्यते। त्रिकायः अस्ति-धर्मकायः, संभोगकायः, निर्माणकायश्च। त्रिविधकायस्य विकासस्य एकः क्रमोऽस्ति। प्रत्येकं मानवस्य शरीरं जनेभ्यः महत्त्वपूर्णमस्ति परं मात्रं शरीरदर्शनेन महापुरुषः न ज्ञायते। बुद्धेन एवं कथ्यते यत् यो धर्मं पश्यति सः मां पश्यति। महापुरुषस्य शरीरस्य वैशिष्ट्यमपि जनेभ्यः आकर्षकं भवति। इदम् एतदेव वैशिष्ट्यं साहित्ये दृश्यते। द्वात्रिंशत् लक्षणयुक्तस्य, अशीति-अनुव्यंजनयुक्तस्य बुद्धस्य शरीरस्य वर्णनं बौद्धसाहित्येऽस्ति। लक्षण-अनुव्यंजनयुक्तः कायः बहुकालपर्यन्तं रूपकाय एव कथ्यते। संभोगकायस्य विकासः पूर्वरूपकायस्य धारणया भवति। भगवतो बुद्धस्य जीवने चमत्कारपूर्णघटनाः सम्मिलिताः जाताः ताभिः बुद्धो लोकोत्तरो जातः। एषां चमत्काराणां प्रतिनिधिः बुद्धस्य निर्माणकायोऽस्ति। भगवान् बुद्धः यं धर्मं स्वदर्शनरूपेण कथयति सः एव धर्मः शील-समाधि-प्रज्ञामाध्यमेन आत्मविकासोऽस्ति। मनः शरीरयोः परिशोधनमस्ति। आत्मपरिशुद्धेः एषा धारणा धर्मकायस्य रूपे विकसिता जाता। शान्तिभिक्षुशास्त्रिणा त्रिकायस्य विभाजनं ब्रह्मणः निर्गुण-सगुणरूपयोः कृतम्।

महायानातिरिक्ताः सर्वेऽपि निकायाः प्रायः रूपकायो धर्मकायश्चेति कायद्वयमेव बुद्धानां स्वीकुर्वन्ति। वैभाषिकाणां मतानुसारं यो हि भगवतः रूपकायः, द्वात्रिंशन्महापुरुषलक्षणैरशीत्यनुव्यञ्जनैः प्रतिमण्डितो भवति, स खलु साम्नावो मातापितृशुक्रशोणितजः एव कायोऽस्तीति। सौत्रान्तिकेष्वपि केचनागमानुयायिनः पक्षमेनमङ्गीकुर्वाणः प्रतीयन्ते, किन्तु युक्त्यनुयायिनस्तावद् रूपकायोऽपि बुद्ध इति

मन्यते। यतो ह्यसङ्ख्येषु कल्पेषु सम्भारसम्भरणेन ज्ञानानुस्यूतः पुण्यपुञ्जात्मक एव रूपकाय इति तेषाम् अभ्युपगमः।

धर्मकायमधिकृत्य वैभाषिक-सौत्रान्तिकेषु नास्ति मतभेदः किन्तु धर्मकाय-सम्बद्धं यन्निर्वाणतत्त्वम् तद् वैभाषिकमतानुसारं द्रव्यसत् धर्मः। सौत्रान्तिकमतेन सु समस्तक्लेशोपक्लेशदोषजातैर्मलावरर्णैर्विमुक्ता अभावात्मिका धर्मतैव तन्निर्वाणम्। आवरणाभावमात्रमेव निर्वाणामत्याशयः। एतदेव सर्वप्रञ्चोपशममात्रमित्युच्यते।

स्वभावधर्मकायो ज्ञानधर्मकायश्चेति द्विविधो धर्मकायः। तत्र अप्रतिष्ठित-निर्वाणमेव धर्मकायः, तद्विषयकं सर्वज्ञानमेव ज्ञानधर्मकायः।

साधकः यथाविधि बुद्धः भवितुम् इच्छति, तस्य चित्रं एभिः चर्मचक्षुभिः न गृहीतुं शक्यते एभिश्च चर्मश्रोतृभिः श्रोतुं न शक्यते वज्रच्छेदिकायाम् एवं कथ्यते, एतैः जनैः अहंरूपेण दृष्टः, घोषेण ध्वनिना ममानुगामी अभवत्, तस्य श्रमः निरर्थकोऽस्ति।

अष्टसाहस्रिकायामपि एवं कथ्यते यत् **'धर्मकायास्तथागताः'** तथागतस्य कायः धर्मकायः अस्ति तं रूपकायेन न दृश्येत्[1] धर्मकायस्य परिनिर्वाणेन तथागतं दृष्टुं भविष्यति। तथागतस्य कायोऽयं भूतकोटिना प्रभावितः, सा चास्ति-प्रज्ञापारमिता असङ्ग-लक्षणा अस्ति।[2] सङ्गस्य रागस्य वा सर्वथा अभाव एव असङ्गता अस्ति। वीतरागस्य पराकाष्ठा एव बुद्धस्य धर्मकायोऽस्ति।

अस्याम् असङ्गतायां वीतरागतायां वा मनसः चित्तस्य स्थितिः कीदृशी भविष्यति-इदं ज्ञानं साधकस्य एवास्ति। साधारणजनेभ्यः बाह्यजगत् मानसिक जगच्च उभौ एव यथार्थौ स्तः परं योगाभ्यासिने बाह्य जगत् नास्ति यदि अस्ति तर्हि चित्रस्य कल्पनया अधिकं किमपि न। तस्य कृते तस्य चित्तगेव मुख्यमस्ति। तद् चित्तमपि यदि जागतिक-कल्पनाभिः आवृतमस्ति- ताः कल्पनाः आत्मना सम्बद्धाः भवेयुः परमात्मना वा, तस्य सम्बन्धः प्रवृत्तिना भवेत् पुरुषेण वा, चेतनेन भवेत् अचेतनेन वा, तत् तु साधारणजनस्य चित्तमस्ति। साधकस्य चित्तं अस्मात् दूरं भवति ताभिः कल्पनाभिः मुक्तं भवति यस्मिन् साधारणजनानां चित्तं आवृतमस्ति तस्य चित्तस्य कृते बाह्य जगत् न भवति। बाह्यजगतिना विविक्तचित्तं वर्णयन् असङ्गः कथयति-

अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत्।
आश्रयस्य परावृत्तिर्द्विधा दौष्ठुल्यहानितः।।
स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः।
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः।। [३]

तच्चित्तम् 'अचित्तम्' इति कथ्यते यतः सः ग्राहकः नास्ति। किमपि वस्तु न गृह्णाति। ग्राह्यम् अर्थात् ग्रहणीयं बाह्यं जगत् तस्य कृते नास्ति, अतएव तद् अनुपलम्भम् इत्यस्ति। लोके एवंविधस्य चित्तस्य न व्यवहारात् तत् लोकोत्तरं ज्ञानमस्ति। द्विविधं दौष्ठुल्यं अर्थात् आवरणम् (क्लेशावरणं ज्ञेयावरणं च) इत्यस्य नष्टे सति आश्रयः आधारभूतः वा चित्तं (आलयविज्ञानं) परावर्तते प्रवर्तते न। चित्तस्य निवृत्ति-परायणता एव आश्रयपरावृत्तिः। 'अनास्रवधातुः' अस्यैवं नाम अस्ति यतः तस्योपरि आवरणं न भवति। इदं अचिन्त्यम् यतः तं तर्केण न ज्ञातुं शक्यते। तत् कुशलमस्ति, तद् ध्रुवमस्ति, तत् सुखरूपमस्ति। यदनित्यं भवति तं बौद्धदर्शने 'दुःखम्' इति कथ्यते। यत् दुःखाभावरूपं तत् ध्रुवमस्ति, तदेव सुखरूपमस्ति। दुःखस्य अभावरेव ध्रुवतानित्यता-अक्षयता-सुखरूपता चास्ति। स एव विमुक्तिकायः। स एव धर्माख्यः अर्थात् महामुनेः बुद्धस्य 'धर्मकायः' इत्यस्ति। अङ्गता-आश्रयपरावृत्ति चित्तस्य वा निवृत्तिपरायणता-इत्यस्य नाम धर्मकायोऽस्ति।

धर्मकायस्य एषा व्याख्या अभावपरकास्ति। चित्तस्य प्रवृत्तावस्थायाः वर्णनं लंकावतारसूत्रे प्रतिपाद्यते। पुद्गलः=जीवः, संततिः =परिवर्तनस्य प्रवाहः, प्रत्यय-स्कन्ध-अणु-प्रधान=प्रकृति, ईश्वरः कर्ता सर्वे चित्तमात्रस्य विकल्पाः सन्ति-

**पुद्गलः सन्ततिः स्कन्धाः प्रत्यया अणवस्तथा।**
**प्रधानमीश्वरः कर्ता चित्तमात्रं विकल्प्यते।।** [४]

एतैः सर्वैः विकल्पैः निवृत्तचित्तस्य स्वरूपं न सम्भवेत् तदपि तं भावात्मकं इति कथितुं न सम्भवति। मात्रं तं निषेधात्मविशेषणैः कथितुं शक्यते। आचार्येण असङ्गेन विचार्यते यत् भगवता बुद्धेन ये वस्तुनः अव्याकृतम् अव्याख्यातम् वा कथ्यन्ते तेषु इदमपि आसीत् यत्-मरणोपरान्तं तथागतः भवति न वा?'

अस्योत्तरं भगवता बुद्धेन न प्रदत्तम्। अस्य इदमेव कारणं भविष्यति यत् आश्रयपरावृत्तिरूपं यत् बुद्धस्य वास्तविकं स्वरूपमस्ति। तं भावरूपे अभावरूपे वा कथनं न सम्भाव्यते-

**न भावो नापि चाभावो बुद्धत्वं तेन कथ्यते।**

**तस्माद्बुद्धतथाप्रश्ने अव्याकृतयोः मतः।** [५]

भगवतो बुद्धस्य धर्मकायस्य भावात्मकं स्वरूपम् अवगन्तुं इदमपेक्ष्यते यत् बुद्धे ज्ञानरूपत्वं कीदृशं मन्यते। बुद्धज्ञानं चतुर्विधं विभज्यते- आदर्शज्ञानम्,समताज्ञानम्, प्रत्यवेक्षाज्ञानम्, कृत्यनुष्ठानज्ञानम् च। आदर्शं ज्ञानं अनेकैः विशेषणैः ज्ञायते। ममकारस्य भावः तत्र नास्ति। तदपरिच्छिन्नं नास्ति-तस्य सीमा नास्ति। तत् केनचित् देशेन स्थानेन बद्धं नास्ति। तत् सदानुगं नास्ति-एवं न यत् कस्मिञ्चित् समये तस्य परम्परा विच्छिन्ना भवेत्। ज्ञेयस्य विषये तत् 'असम्मूढ़म्' भवति। तं समस्त-ज्ञेयं-पदार्थान् सम्यक्रूपेण अवगच्छति। एवंभूतेऽपि तत् तान् ज्ञेयान् प्रति 'आमुखं' न भवति-तान् प्रति तत्र उत्सुकता न भवति। सर्वेषां ज्ञानानां तत् महानाकारः सदृशः भवति यतः तत् सर्वेषां ज्ञानानां निमित्तं भवति। ज्ञानेन सम्भोगबुद्धता तस्य च ज्ञानस्य प्रतिबिम्बम् उदयति। प्रतिबिम्बस्य उद्भावकत्वात् तम् आदर्शः-दर्पणम् इति कथ्यते।[६] सम्भोगबुद्धता इत्यस्याभिप्रायः बुद्धस्य तेन रूपेण अस्ति यस्मात् ते संसारे निवसन्ति यस्य च जनाः दर्शनं कुर्वन्ति।

अस्यादर्शज्ञानस्य सहाय्येन त्रिविधं ज्ञानमवलम्बते। प्राणिनां प्रति समत्वबुद्धिः-सर्वान् समरूपमवगन्तुमेव समताज्ञानमस्ति यत्-भावनाशुद्धेः कारणात् निर्मलं अप्रतिष्ठं च समाविष्टं अर्थात् निर्वाणानुप्रतिष्ठं भवति। सर्वदा मैत्री-करुणाभ्यां अनुगच्छति। प्राणी स्वस्याधिमोक्षम् अनुसारं (श्रद्धा विश्वासश्च) बुद्धं यस्मिन् रूपे द्रष्टुं वाञ्छति-अनेन ज्ञानेन तं तादृशमेव बुद्धदर्शनं भवति। अस्यैव नाम समता-ज्ञानमस्ति।[७]

सभायाः मध्ये यस्मात् सर्वविध-विभूति-दर्शनं भवति, सर्वविध-सन्देहः छिद्यते यस्मात् च महाधर्मस्य वर्षा भवति तस्यैव नाम प्रत्यवेक्षाज्ञानमस्ति।[८] तं

ज्ञानं कृत्यनुष्ठान-ज्ञानं कथ्यते येन सर्वधातुषु-सर्व-लोकेषु अद्भुत-अप्रमेय-अचिन्त्यशरीराणि निर्माप्य सर्वप्राणिनां हितं साध्यते।[९]

एषु चतुर्ज्ञानेषु आदर्शज्ञानस्य यद् वर्णनमस्ति तेन धर्मकायस्यावबोधः भवति परं सामान्यतया भगवतो बुद्धस्य धर्मकायः 'ब्रह्म' सदृशः रहस्यमयः वस्तुबोधः भवति परम् उभयोः पर्याप्तभेदः दृश्यते। ब्रह्म स्वयं-सिद्ध-सत्तास्ति। ब्रह्मम् स्वयमेव कस्मात् एव नोत्पद्यते प्रत्युत् सकलजड़चेतनजगत् उत्पादकोऽस्ति। मात्रं उत्पादक एव न, सर्वेषां स्थितीनां कारणं लयस्य च आधारोऽस्ति। परं भगवतो बुद्धस्य धर्मकायः कापि स्वयंसिद्धसत्ता नास्ति प्रत्युत् चित्तस्य सर्वोच्चा परिपूर्णा च विकासावस्थास्ति। अष्टसाहस्रिका प्रज्ञापारमितासूत्रे एवं कथ्यते यत् वीणायाः शब्दः तन्त्री-पुरुषयोः व्यायामात् उत्पद्यते तथैव बुद्धानां काय-निष्पत्तिः हेतोः अधीनं भवति, प्रत्ययस्याधीनं भवति। अनेक-कुशलमूलानां प्रयोगेन परिनिष्पद्यते, हेतु-प्रत्यय-सामग्रयारुपद्यते। [१०]

अस्य धर्मकायस्य कारणात् बुद्धः 'एक' इति कथ्यते। तस्य अनेकत्वस्य निषेधः क्रियते। यैः कारणात् बुद्धं अनेकं कथयति तानि कारणानि इमानि सन्ति-

१. बुद्धस्य गोत्रे अनन्ताः प्राणिनः सन्ति। तेषु एक एव बुद्धः भविष्यति एवं न। सर्वेः ये बुद्धत्वस्य निमित्तं पारमितानां अभ्यासः कुर्वन्ति ते बुद्धाः भविष्यन्ति अतएव बुद्धः एकः न कथितुं शक्यते।

२. पुण्यं बुद्धत्वप्राप्तेः उद्देश्येन क्रियते। यदि सर्वे पुण्ये संलग्नाः भवेयुः प्राणिनः बुद्धाः भवितुं न शक्नुवन्ति, तेषां बुद्धचर्चा व्यर्थास्ति, अतएव बुद्धः एकः इति मन्तुं न शक्नोति।

३. प्राणीनाम् हितस्य पूर्णता तदेव भवितुं शक्नोति यदा सर्वान् बुद्धः भवितुं अवसरः प्राप्नोति। यदि एक एव बुद्धः भविष्यति तर्हि न सम्भाव्यते।

४. पुण्येन कोऽपि बुद्धः भवितुं शक्नोति। यथा ब्रह्मदिः एकः मूलः आदिपदार्थः इति वा मन्यते तथैव बौद्धपरम्परायां कोऽपि आदि बुद्धः न मन्यते अतएव बुद्धः एकः भवितुं न शक्नोति।[११]

धर्मकायस्यातिरिक्तं बुद्धस्य अपरे द्वे काये स्तः- संभोगकायः निर्माणकायश्च। बुद्धस्य धर्मकायः सर्वेषु बुद्धेषु समरूपं भवति परं संभोगकायः एकरूपं न भवति। पृथक् पृथक् लोकेषु बुद्धस्य संभोगकायः पृथक् पृथक् भवति। बुद्धः यथा ऋषिबलेन स्वसदृशं अनेकबुद्धानां निर्माणं करोति तदा तेषां निर्मितकायानां नाम निर्माणकायोऽस्ति। संभोगकायः बुद्धस्य स्वहिताय अस्ति परं निर्माणकायः सर्वथा परार्थं अस्ति, परहितार्थं अस्ति। विज्ञप्तिमात्रतासिद्धिग्रन्थे एवं प्रतिपाद्यते, यत् सम्भोगकायः द्विविधं भवति-स्व-सम्भोगकायः पर-सम्भोगकायश्च स्वयम्भोगकायस्य दर्शनं सकल लोकधातूनां बुद्धानेव भवति। पर-सम्भोगकायस्य दर्शनं विविध-लोक-धातूनां बोधिसत्त्वानां भवति। एतयोः रंग-रूपे स्वरे च भेदः न भवति परं एवं सम्भोगकाये न। परसंभोगकायस्य चित्तं वास्तविकं न भवति परं स्वयं सम्भोगकायस्य चित्तं वास्तविकं भवति। स्वसम्भोगकायस्य चित्ते आदर्श-समता-प्रत्यवेक्षा-कृत्यनुष्ठान ज्ञानं भवति परं परसम्भोगकायस्य चित्ते न।

पौराणिकेषु एवं मन्यते यत् बुद्धः विष्णो अवतारोऽस्ति। यद्यपि बौद्धपरम्परा इदं न स्वीकरोति परं पुराणेषु बुद्धसन्दर्भे एवं कथ्यते-

पूर्वकाले कस्मिञ्चित् समये शतदिव्यवर्षाणिपर्यन्तं देवासुरसंग्रामः प्रचलति स्म। तस्मिन् संग्रामे हयप्रभृतिदैत्यैः देवगणाः पराजिताः। देवगणाः क्षीरसागरस्य उत्तरे तत्र गत्वा तपश्चर्याम् अकुर्वन्। तैः विष्णुः स्तुतः। स्तुतौ समाप्तायां देवाः परमात्मानं हरिं हस्ते शंख-चक्र-गदायुक्तं गरुडं च आरुढं स्वसम्मुखं अवलोकितवन्तः। तमवलोक्य सर्वे देवाः प्रणम्य अकथयन् यत्-नाथ! प्रसीद। अस्मान् सफल-शरणागतान् दैत्यैः रक्ष। अस्माकं शत्रुगणः दैत्यः वर्णधर्मस्य पालकः वेदमार्गावलम्बी तपोनिष्ठश्चास्ति। अतएव ते मया न हन्तुं शक्यन्ते। अतएव हे सर्वात्मन्! यस्मात् वयं तेषामसुराणां बधे समर्थाः भवेयुः एतादृशः कोऽपि उपायः दातव्यः। तेन एवं कथिते भगवन! विष्णुः स्वशरीरात् मायामोहरूपेण समुद्भूतवान्। तञ्च देवेभ्यः दत्वा अकथयत् यत् अयं मायामोहः दैत्यगणं मोहितं करिष्यति तदा ते वेदमार्गं उल्लंघ्य युष्माभिः हन्तुं शक्यन्ते।

तदनन्तरं जितेन्द्रियः मायामोहः रक्तवस्त्रं धारयित्वा असुराणां समीपं गत्वा तान् मृदु-मधुर-अल्पशब्दे अकथयत्-यदि भवन्तः स्वर्गस्य मोक्षस्य वा इच्छुकाः सन्ति तर्हि पशुहिंसादि दुष्कर्माणि विसृज्य बोधिं प्राप्नुवन्तः। जगदिदं विज्ञानरूपमस्ति-एवम् अवगच्छत। अस्मिन् विषये बुद्धजनानां मतमिदमस्ति यत् अयं संसारः निराधारोऽस्ति भ्रान्तिज्ञानमात्रमस्ति, रागादिदोषैः दूषितमस्ति। एवं युक्तिपरके वचने कथिते दैत्यः वेदधर्मः त्यक्तः पश्चात् ते देवैः पराजिताः जाताः।[१२]

ब्रह्मा-विष्णु-शिव-शक्ति-इत्यादीनामुपासकाः यस्मिन् रूपे स्वकीयान् उपास्यदेवतान् अवलोकयन्ति, तस्मिन् रूपे बौद्धसाधकाः बुद्धं न पश्यन्ति। सर्वाधिक भेद-विरोधयोः वृत्तं तु इदमस्ति यत् बुद्धस्य सर्ग-स्थिति-लयैः नास्ति कोऽपि सम्बन्धः। परं ब्रह्मणः अन्यदेवस्य च सर्ग-स्थिति-लयैः पूर्णसम्बन्धोऽस्ति। अयं विरोधः महत्त्वपूर्णमस्ति। सर्ग-स्थिति-लयैः निर्लिप्तं भगवतः बुद्धस्य रूपं चतुर्विधज्ञानेन स्पष्टमस्ति।[१३]

धर्मकायः यथा ब्रह्मणः समरूपं प्रतीयते तथैव स्वसम्भोगकायः, परसम्भोगकायः निर्माणकायश्च तस्य सगुणब्रह्मणः सदृशं प्रतीयते योऽवतारं धारयति संसारे च अनेकैः विभूतिभिः चमत्कारैश्च आत्मानं प्रकटयति। धर्मकाये ब्रह्मणि (निर्गुणब्रह्म) च यः मौलिकभेदः दृश्यते तदेव एषु त्रिषु कायेषु सगुणब्रह्मणि च अवशिष्यते। सर्ग-स्थिति- लय-इत्यादीनान् अहंता एषु पूर्णरूपेण स्वकीयामस्ति। भगवतः बुद्धस्य त्रिकायः सगुणकायत्वेन अवगन्तुं शक्यते। अस्यापेक्षया धर्मकायः निर्गुणकायत्वेन अवगन्तुं समीचीनस्ति। सगुणकाये सगुणब्रह्मणि च बहुभेदः सम्भाव्यते। बुद्धस्य सगुणकायः कुशल-कल्याणयोः प्रतीकोऽस्ति।

## संदर्भ-संकेतः


१. अष्टसाहस्रिका पृ. ५१३
२. अष्टसाहस्रिका पृ. ३६६
३. विज्ञप्तिमात्रतासिद्धिः -त्रिंशिका २६-३०
४. लंकावतारसूत्रम् पृ. ७६
५. महायानसूत्रालंकार ६/२४

६. महायानसूत्रालंकार : ६, ६६, ६६
७. महायानसूत्रालंकार: ६, ७०-७१
८. महायानसूत्रालंकार : ६-७३
६. महायानसूत्रालंकार : ६/७४
१०. अष्टसाहस्रिका ४१४-५१५
११. महायान सूत्रालंकार : ६/७७
१२. विष्णुपुराणम् तृतीयोऽंशः, १७/१८ अध्यायः
१३. महायानसूत्रालंकारः ६/६०

दृष्टव्यः
- बौद्धधर्म दर्शन-आचार्य नरेन्द्रदेव
- सौत्रान्तिक दर्शनम्-डॉ. रामशङ्कर त्रिपाठी
- बौद्धदर्शन मीमांसा-डॉ. वल्देव उपाध्याय

# बौद्धधर्मस्य परिणतिः

डॉ. गोविन्दचन्द्रपाण्डेयमहाभागः 'बौद्धधर्म का इतिहास' इति स्वकीये सुप्रसिद्धे ग्रन्थे बौद्धधर्मस्य ह्रासः पतनं च इति शीर्षके बौद्धधर्मस्य स्थितिं विभिन्नेषु प्रदेशेषु वर्णयति स्म बौद्धधर्मस्य च ह्रासस्य कारणमपि अचिन्तयत्। तस्य विवरणम् एवमस्ति-

सप्तमशताब्द्यां श्वान्च्वांग महाभागस्यानुसारं सिन्धस्य शासकः शूद्रजातीय-बौद्धः आसीत्। तत्र च विहाराः भिक्षवश्च बहुसंख्यकाः आसन्। अनन्तरं ब्राह्मणामात्यः नवराजवंशं स्थापितवान्। 'चचनामा' इत्यनेन ज्ञायते यत् ब्राह्मणवादे अस्मिन् समये बुद्धरक्षित नाम्नः बौद्धश्रमणः आसीत् यः स्पष्टतया एको सिद्धः तान्त्रिकः आसीत्। तस्य प्रभावेन चचः बौद्धधर्मस्य विरोधः नाकरोत्। चचमहाभागस्य भ्राता 'चन्दरः' कश्चन श्रमणः निगद्यते। द्वादशाधिकसप्तमखीष्टाब्दे चचस्य सूनुः दाहिरः मुहम्मदकासिमः दिवङ्गतः। हिन्दूनां च स्थाने अरबवासिनः सिन्धदेशे शासनव्यवस्थां दृष्टवन्तः। अरबविवरणैः अयं निस्सन्देहोऽस्ति यत् तस्मिन् काले सिन्धदेशे बौद्धश्रमणानां सङ्ख्या प्रचुरः तेषां प्रभावश्च पर्याप्तः आसीत्। अरबानां धार्मिकसहिष्णुभावात् अष्टमशताब्द्यां सिन्धी बौद्धाः सहसैव न लुप्तवन्तः। अष्टमशताब्द्याः पूर्वार्द्धे हि-चचमहाभागस्य यात्रा विवरणेन (७०६-८) इदं परिज्ञायते, पश्चात् धर्मपालस्य समये 'सैन्धव श्रावकानामुल्लेखः तारानाथः अकरोत्। बुदोन्महोदयेन बुद्धाब्दस्य गणनायां सैन्धवश्रावकानां मतम् उद्धृतम् । परं 'इस्लाम्' इत्यस्य सान्निध्ये मुस्लिमशासने च सिन्धस्य पूर्वात् बौद्धधर्मस्य क्रमशः परम् अविदितरूपेण क्षयः लोपः चाभूताम्।

उत्तर-पश्चिमे-कोरियाप्रदेशस्य भिक्षुः ही-चाओमहाभागः षडविंशत्याधिक-सप्तशतेन नवविंशत्याधिकसप्तशतस्य मध्ये भारतयात्राम् अकरोत्। तस्य

उकुंगमहाभागस्य विवरणैः (७५१-६०) इदं ज्ञायते यद् अष्टमशताब्द्यां कपिशागन्धारूड्डियाकश्मीरदेशेषु सद्धर्मस्य प्रचुर-प्रचारे आसीत्। अयं स्मरणीयः यत् श्वान्-च्वांगमहादयेन गन्धारूड्डियानयोः सद्धर्मस्य ह्रासः निर्दिश्यते। सद्धर्मस्य पुनरुज्जीवनं कदाचित् उड्डियानस्य मंत्रयान-वज्रयानयोः रूपेऽऽसीत्। तत्र यस्य प्रचारस्य संकेतः श्वान्-च्वांगमहाभागः अकरोत् । उड्डियाने वज्रयानस्य नेतारौ इन्द्रभूतिः पद्मसंभवः आस्ताम्। अष्टमनवमशताब्द्योः कपिशागन्धा-रूड्डियानेषु तुर्किशाहिनरेशाणां शासनं प्रतीयन्ते। अकुर्वन् ते च बौद्धधर्मस्यानुकूलाः नवमशताब्द्यां पुरुषपुरस्य कनिष्क-विहारे अध्ययनस्युल्लेखः प्राप्यते। सप्तत्यधिकाष्टाख्रीष्टाब्दे (८७०) अरबाः काबुलं जितवन्तः अस्मिन्नेव काले लल्लिय नामा विप्रः तुर्किशाहिवंशस्य स्थले ब्राह्मणशाहिवंशं स्थापितवान् यस्य एकादशशताब्द्यां कटुधर्मान्धमुस्लिमतुर्काः विनिष्टवन्तः। अस्मिन्नेव समये अलबेरूनी अफगास्तिाने उत्तरपश्चिमीभारते च बौद्धधर्मं लुप्तं प्राप्तवान्।

**कश्मीरः**-श्वान्-च्वांगमहाभागः कश्मीरे शतविहाराः दृष्ट्वान् प्रायः एकशताब्दिपश्चात् नवपञ्चाशताधिकसप्तशते (७५९) उ-कुंगमहोदयेन तत्र त्रिशतविहाराः उल्लिखिताः। कल्हणेन अनेन ज्ञायते यत् वैष्णवबौद्धः उभावपि ललितादित्यः जयापीडः विविधबौद्धविहारान् निर्मितवन्तौ। नवमशताब्द्याम् अवन्तिवर्मनः शासनकाले बौद्धसाहित्यस्य तन्त्रानां च प्रगतेः प्रमाणं प्राप्यते। क्षेमगुप्तस्य समये बौद्धमठानां राजनीतिकहस्तक्षेपः सूच्यते। दिद्दा (९५०-१००३) विविधबौद्धविहारान् निर्मितवान्। एकादशशताब्द्यां कलशः तान्त्रिकान् बौद्धान् च षोषितवान् हर्षस्य (१०८९-११०१ ) घोरात्याचार भ्रष्टाचारैः मन्दिरस्य धनं विनिष्टम्। बौद्धविहारस्य अस्मिन् समये कियती क्षतिरभूद् इदम् अनिश्चितम्। जयसिंहस्य (११२३-४०) समये बौद्धधर्माय प्रदत्तदानानि उल्लिख्यन्ते।

इदं सुस्पष्टं यत् कश्मीरे बहवः शासकाः बौद्धाः न भवन्तोऽपि बौद्धधर्मस्य प्रतिकूलाः नासन्। बौद्धभिक्षुभ्यः विविधाः विहाराः निर्मीयन्ते कश्मीरे नवमशताब्द्यां धर्मोत्तरादयः अनेकाः प्रसिद्धबौद्धाचार्याः अभूवन् प्रत्यभिज्ञा-दर्शनस्य बौद्ध-दर्शनेन निश्चितः सम्बन्धः प्रतीयते। ज्ञानश्रीसोमनाथप्रभृतयो बुद्धः श्रीज्ञान कश्मीरिबौद्ध पंडिताः तिब्बते धर्मप्रचाराय अनुवादाय च आहूतवन्तः

कल्हणेन सस्त्रीकभिक्षवः उल्लिखिताः सद्धर्मे। श्रद्धालुक्षेमेन्द्रस्य कृतिषु भिक्षुषु व्यंग्यस्याभावः नास्ति। उत्तर-पश्चिमवत् कश्मीरेऽपि बौद्धधर्मस्य विनाशं इस्लामस्य योगदानं मन्तव्यम्। नवत्रिंशताधिकत्रयोदशखीष्टाब्दात् कश्मीरे मुस्लिम-प्रभुत्त्वं निश्चितरूपेण विदितमस्ति।

**पश्चिमः मध्यदेशश्च** -श्वान्-च्वांगस्य इ-चिंगस्य च विवरणैः सप्तमशताब्द्यां सद्धर्मस्य समृद्धिः ज्ञायते सप्तमाष्टमशताब्द्योः अभिलेखैः सद्धर्मं प्रति शासकानाम् अनुकूलत्वं दानशीलत्वं च सूच्यते। बलभी अस्मिन् युगे बौद्ध विद्यायाः एकं प्रकृष्टं केन्द्रम् आसीत्। पश्चात् मध्ये-भारते पश्चिमे च बौद्धानां क्रमशः ह्रासे राजकीयोपेक्षया ब्राह्मणजैनधर्मयोः प्रसारं कारणं च मन्तव्यम्।

**मध्यदेशे श्वान्-** च्वाङ्गस्य कालैव सद्धर्मस्य ह्रासः सूच्यते। स्पष्टतया बौद्धधर्माय गुप्तानां सहिष्णुत्वं पर्याप्तं नासीत्। तं स्वविकासाय राजकीय पोषणं अपेक्षितं प्रतीयते। अष्टमशताब्द्यां ह्वी-चाओ, उ-कुंगः उभौ कान्यकुब्जे सद्धर्मं समृद्धोऽस्ति, परं वाराणस्यां लुप्त प्रायः दृष्टवन्तौ छि-ये नाम्नः चीनि-यात्री कान्यकुब्जेऽपि बौद्ध-धर्मं लुप्तम् अपश्यत् परं मगधे तस्य स्थितिः समृद्धाऽऽसीत्। सारनाथे पुरातत्त्वीय सामग्री द्वादश-शताब्द्याः अन्ते बौद्ध-परम्परायाः सहसैव उच्छेदः सूच्यते यः सम्भवतः तुर्कीविजयस्य परिणामोऽऽसीत् ।

मगधः पूर्वश्च - पाल -सम्राटः स्व 'परमसौगतः अकथयत् मगधे च तस्य शासनकाले बौद्धधर्मदर्शनतन्त्रकलानां एकमुज्ज्वलं युगम् आविर्भूतम्। अष्टमशताब्द्यां पालवंशस्य प्रभुत्वस्य बंगाले उद्भवः मगधे च विस्तारः अभूत्। द्वादश-शताब्द्यां नालन्दाविक्रमशीलोदन्तपुरीसोमपुरीप्रभृतविहाराणां विद्याख्याति च स्व चरमशिखरपर्यन्तम् अगच्छत्। बौद्धधर्मश्च तिब्बते विजयं लब्धवान् यत्र शान्तरक्षित, पद्मसम्भवातीशाः प्रधाननेतृत्वं अकुर्वन्। तन्त्र-हठयोगस्य विकासेन बौद्धब्राह्मणधर्मयोः मध्ये वैमनस्यम् उद्भूतम्।

तारानाथस्यानुसारं पालयुगे सद्धर्मस्य मगधमङ्गलाडिविश-परान्तक-जनपदकश्मीर-नेपालदेशेषु विस्तारः अभूत् । अस्मिन् विस्तारे सद्धर्मस्य रूपं प्रधानतया महायानयुक्तं मन्त्रमयं चासीत्। प्रथमपालशासकगोपालस्य मत्स्यन्यायेन

अभिभूता प्रजा राजपदे वरणम् अकरोत्। गोपालः मङ्गलेन प्रारभ्य स्वशासनं मगधेऽपि स्थापितवान्। ओदन्तपुर्यां गोपालस्य समयैव कदाचित् तत्रस्थाः सुप्रसिद्धविहाराः स्थापिताः। अभयाकरगुप्तस्य समये अत्र सहस्त्रभिक्षवः आसन्। अस्मिन्नेव युगे कश्मीरे आचार्यशान्तिप्रभः, पुष्यकीर्तेः शिष्यः शाक्यप्रभः, दानशीलः, विशेषमित्रः, प्रज्ञावर्मा आचार्यशूरश्च विद्यमानाः आसन्। पूर्वे अस्मिन् काले आचार्याः ज्ञानगर्भः आसीत् विरूपनाम्नः च एकः सिद्धाचार्योऽपि अस्य कालस्याऽऽसीत्। शान्तरक्षितः नालन्दाक्षेत्रस्य प्रसिद्धाचार्यः आसीत् पश्चाच्च, धर्मप्रचाराय तिब्बतं गतवान्। तस्य 'तत्त्वसंग्रहः' बौद्धदर्शनस्य अनुपमाकृतिः अस्ति। अत्र अन्यदर्शन सम्प्रदायानां विस्तृतं खण्डनम् अस्ति । ग्रन्थकारस्य स्वसिद्धान्तखण्डने माध्यमिक-स्वतान्त्रिकेन, प्रमाण-मीमांसायां सौत्रान्तिकेन परमार्थचिन्तने च योगाचार-विज्ञानवादेन प्रभावितमस्ति ।

धर्मपालस्य शासनं सुदीर्घं निगद्यते। धर्मपालः सिंहभद्रं ज्ञानपादं च स्वाचार्यः अमन्यत् प्रज्ञापारमितायाः गुह्यसमाजस्य च विशिष्टं समादरम् अकरोत्। सः एव विक्रमशील-विहारं स्थापितवान्। अयं विहारः मगधे उत्तरं प्रति गंगातीरे पर्वताग्रे स्थितोऽऽसीत्। विहारं परितः प्राकारम् आसीत् मध्ये च अष्टाधिकशतानि चैत्यगृहाणि आसन्। तत्र अष्टाधिकशताः आचार्याः आसन् यैः ऋतं विहाराणां विविध-प्रबन्धने षडाचार्याः आसन्। कालान्तरे अत्र एकस्मिन् मध्ये स्थिताऽऽवासस्य षड्दिशासु षडान्यावासाः विकसितवन्तः। विहारस्य षड्द्वारेषु विख्याताः विद्वांसः द्वारपण्डितस्य रूपे न्यवसन् धर्मपालस्य समयस्य प्रसिद्ध-पण्डितेषु कल्याणवर्द्धनवज्राचार्यबुद्धज्ञानपादबुद्धशान्तिबुद्धगुह्याः उल्लेखनीयाः सन्ति। सिंहभद्रः शान्तरक्षितात् माध्यमिकशास्त्रं शिक्षितवान् वेरोचनभद्रात् च प्रज्ञापारमिताम् अभिसमयालंकारोपदेशं च। अनेन अष्टसाहस्रिकायां व्याख्यादिकविविधग्रन्थाः प्रणीताः। आचार्यसागरमेधस्य बोधिसत्त्वभूम्यां व्याख्या प्रसिद्धाऽस्ति। वज्राचार्यबुद्धज्ञानपादस्य चमत्काराणां विषये बहवः प्रसिद्धयः आसन्। गुह्यसमाजमायाजालबुद्धसमायोगचन्द्रगुह्यतिलकमंजुश्रीक्रोधनामानां तन्त्राणां सः प्रायः व्याख्यानम् अकरोत् । अयं स्मरणीयः यत् अस्मिन् युगे सैन्धव श्रावकः सिंहलस्य च भिक्षवः विक्रमशीले मन्त्रतन्त्रयोः विरोधं प्रकटितवन्तः।

तारानाथस्यानुसारं देवपालः योगिशिरोमणिना प्रेरितो भूत्वा ओडिविशस्य तीर्थिकराज्ञा सह अयुध्यत्, ओडिविशः च जितवान् यतः पूर्वकाले तत्र सद्धर्मस्य प्रचारः आसीत् यस्य स्थानं तस्मिन् काले तीर्थिकाः गृहीतवन्तः। देवपालः श्रीत्रैकूटकसोमपुरी वा विहारस्य उद्धारम् अकरोत्। अस्य समये अपर कृष्णाचारिन् नाम्नः आचार्यः अभूत्। अयं कामरूपे वसुसिद्धिः प्राप्तवान् अयं च सम्वर- हेवज्र-यमान्तक-तन्त्राणां पण्डितः आसीत् । अनेन शम्वरव्याख्या अन्यशास्त्राणि च प्रणीतानि। अस्य समयस्य अन्याः प्रमुखाः आचार्याः आसन् शाक्यप्रभः, शाक्यमित्रः, सुमतिशीलः, दंष्ट्रासेनः, ज्ञानचन्द्रः, वज्रायुधः, मंजुश्रीकीर्तिः, ज्ञानदत्तः, वज्रदेवश्च । दक्षिणं प्रति अस्मिन् काले भदन्तः अवलोकितः आसीत् कश्मीरे च आचार्यः धनमित्रः। शाक्यमित्रेण तत्त्वसङ्ग्रहनाम्नः योगतन्त्रे कोशालंकारनाम्नः व्याख्या लिखिता। व्रजाचार्यमंजुश्रीकीर्तिना नामसंगीत्यां टीका लिखिता।

महीपालश्च समये आचार्यः आनन्दगर्भः, परहितः, चन्द्रपद्मः, ज्ञानदत्तः, ज्ञानकीर्तिः प्रभृताः महापुरुषाः आसन्। तारानाथस्यानुसारं महीपालस्यरान्तरं महापालः शासितवान्। महापालः ओदन्तपुर्याम् उरूवास-विहारं स्थापितवान् तत्र च पंचशतक सैन्धवश्रावकानां प्रबन्धः अकरोत्। सोमपुरीनालन्दादिषु सः अनेकान् विहारान् स्थापितवान्। कालचक्रतन्त्रस्थ अस्मिन् समये प्रचारः अभवत्। आचार्याः प्रज्ञाकरगुप्तश्च, पद्माकुशः, जेतारिः, कृष्णसमयवज्रादयः अस्य समयस्य सन्ति।

तारानाथस्यानुसारं 'चणकस्य' प्रशासनकाले रत्नाकरशान्तिः, प्रज्ञाकरमतिः, वागीश्वरकीर्तिः, नारोपा, रत्नवज्रः , ज्ञानश्रीमित्रश्च विक्रमशीलश्च द्वारपण्डिताः आसन्। नारोपा मर-पा महोदयस्य गुरूः आसीत्। तिब्बतस्य प्रसिद्धतमः सिद्धः मिल-रे-पा मर-पा महोदयस्य शिष्यः आसीत्। रत्नवज्रः कश्मीरात् विक्रमशीलम् आगतवान्। काश्मीरं प्रत्यागत्य तेन तत्र धर्मं प्रचारितम् अन्ते च उद्यानं गतवान्। ज्ञानश्रीमित्रः गौडदेशीयः आसीत् पूर्वं च सैन्धव -श्रावकानां पण्डितः आसीत्। पश्चात् सः महायानं स्वीकृतवान्।

अतीशदीपंकरश्रीज्ञानं नयपालस्य समये मन्तव्यम्। तारानाथेन नयपालस्य समये अमोघवज्रः प्रज्ञाकररक्षितादयः पण्डिताः आसन्। प्रज्ञाकाररक्षितं पितृ-मातृ-तन्त्रेषु विद्वान् निगद्यते। नरोपामहाभागस्य शिष्यः रिरि जात्या चाण्डालः आसीत्। आचार्यः अनुपमसागरः कालचक्रतन्त्रस्य पण्डितः आसीत्। कश्मीरे अस्मिन् समये शंकरानन्देन धर्मकीर्तेः ग्रन्थेषु व्याख्याः लिखिताः सन्ति।

रामपालस्य समये अभयाकरगुप्तनाम्नः महान् आचार्यः वज्रासनपण्डितः आसीत्। तारानाथस्यानुसारं अस्मिन् समये संघस्य ह्रासः अभूत् । विक्रमशीले अस्मिन् काले १६० पण्डिताः आसन् १००० एकसहस्र च भिक्षुवः आसन् यद्यपि पर्वस्यावसरे पंचसहस्राः एकत्रिताः अभूवन्। वज्रासने राज्ञा पोषिताः ४० महायानस्य अभिज्ञाः शतद्वयश्रावकभिक्षवः अवसन्। विशिष्टेषु अवसरेषु दशसहस्रश्रावकाः भिक्षवः एकत्रिताः अभवन्। औदन्तपुर्यां एकसहस्रभिक्षवः सततं न्यवसन् परम् अवसरेषु द्वादशसहस्राः एकत्राः अभूवन्। अस्मिन् समये मगधं ऋतं प्रायः सर्वत्र तार्थिकम्लेच्छधर्माणां वृद्धिः अभवत् ।

तारानाथेन राथिकसेनस्य समये चतुर्विंशति महानाचार्याः उल्लिखिताः। येषु केचित् कश्मीरे केचिच्च नेपाले आसन् । सर्वे वज्रधरस्य सम्बरस्य च अभिज्ञाः आसन् परं सेनवंशस्य कालेव म्लेच्छैः केषांचित् भिक्षूणां सहाय्येन मगधं विजितं, विहाराः च समाप्ताः। बौद्धाचार्याः तिब्बत-नेपाल-दक्षिणादीन् प्रति गतवन्तः मगधे बंगाले चापि सद्धर्मस्य सूर्यास्तः अभूत्।

**भारते बौद्धधर्मस्य ह्रासस्य कारणम्**-भारते सद्धर्मस्य ह्रासस्य पतनस्य च विषये अनेकाः भ्रान्तयः प्रचलिताः। इदं कथ्यते यत् सद्धर्मस्य प्रचारः मात्रं स्थानीयः कदाचित् चासीत् अत एव तस्य पतनं आश्चर्य जनकं नास्ति। इदमपि कथ्यते यत् बौद्धधर्मः हिन्दूधर्मे कवलितः जातः यस्मिन् सप्तमशताब्द्याः साम्मितीयः तान्त्रिकः सम्भवतः सहायतां दत्तवान्। बौद्धसंघे तन्त्रानां कारणात् ज्ञानाचारयोः लोपमपि तस्य नाशस्य कारणं निगद्यते। कुमारिलशंकरयोः वाद कौशलमपि बौद्धधर्मस्य ह्रासे कारणं मन्यते। अस्मिन् प्रसंगे अयं निर्विवादः यत् बौद्धधर्मस्य कतिपयानि तत्त्वानि हिन्दूधर्मे अवश्यमेव स्वीकुर्वन्ति। इदमपि स्वीकार्यमस्ति यत् अनेकेषु भिक्षुषु विहारेषु च भ्रष्टाचारस्याभावः

नासीत् यस्य 'राष्ट्रपालपरिपृच्छायां स्पष्टं निर्दिष्टमस्ति, परं तान्त्रिकः आचारः तत्त्वसम्बद्धाः च कतिपयाः विकृतयः मात्रं बौद्धेषु एव विदिता नासन् अपितु शैवेषु शाक्तेषु चापि विदिता आसन् येषां प्रचारः न लुप्तः इति स्वीकर्तुं शक्यते। वस्तुतः बौद्धधर्मः प्रधानतया भिक्षूणां धर्मः आसीत् भिक्षूणां च जीवनं विहारेषु केन्द्रितम् आसीत्। उपासकेभ्यः बौद्धधर्मः नैतिक-सामाजिक- आचारसंस्थाः च न स्थापितवान्। नैयायिकोदयनस्य कथनमस्ति यत् बौद्धाः अपि वैदिक-संस्कारान् अपालयन्। उपासकानां बौद्धधर्मः मुख्यतया विहारेभ्यः चैत्येभ्यः च दानं तारालोकेश्वरादिप्रतिमानाम् अर्चनम् एव आसीत् । बौद्धविहाराः प्रायः राज्ञैः प्रदत्ते अनुमते वा भूमिदाने निर्भराः जाताः । अस्मात् कारणात् बौद्धधर्मस्य प्रचारे राजकीय-समर्थनस्य प्रोत्साहनं च विशिष्टं हस्तक्षेपमस्ति । दक्षिणे पश्चिमे हिन्दूशासकानाम् उपेक्षया वैमुख्येन वा उत्तरे च तुर्कानां विजयेन बौद्धविहाराः नष्टाः लुप्ताः च जाताः विहाराणां लोपाः उपासकानां क्षीणबुद्धत्वस्य विलोपः अनिवार्यः आसीत्।

प्रोफेसरसंघसेनमहोदयप्रभृत्याधुनिकविद्वांसः उपर्युक्तं मतं न स्वीकुर्वन्ति। सामान्यतया मान्यताऽस्ति यत् बौद्धधर्मस्य भारतदेशात् लोपो जात इति, किन्त्वाधुनिकशोध द्वारा स्पष्टं भवति यत् भारतदेशस्य मध्य भूभागात् बौद्धधर्मानुयायिनः वस्तुतः लुप्तप्रायाः जाताः किन्तु सीमावर्तिप्रदेशेषु सदैव बौद्धधर्मानुयायिनां स्थितिः आसीत्। वर्तमानसन्दर्भे तु सम्पूर्ण भारते नवबौद्धानां संख्या वृद्धिंगता। बौद्धधर्मस्य ह्रासस्य कारणं वैमत्यमस्ति।

## आधारग्रन्थाः

१. बौद्धधर्म के विकास का इतिहास- गोविन्दचंद पाण्डेय
२. बौद्धधर्म दर्शन- बल्देव उपाध्याय



अन्नदो बलदो होति, वत्थदो होति वण्णदो
यानदो सुखदो होति, दीपदो होति चक्खुदो
सो च सब्ब ददो होति, यो ददाति उपस्सयं
अमतंददो च सो होति, यो धम्ममनुसासती।

